नं. ७८
वाक्यपदीय टीका
पत्र-६२—

१ श्रीगणेशाय नमः ॥ ॥ अविघ्नमस्तु ॥ एवं शब्दस्य प्रयोजनसहितं स्वरूपादिकं लेशेन निर्णीतं ॥ तस्य च साधारण्येन वाचकत्वं व्यवस्थापितं ॥ इ
दानीं मतभेदेन केषांचिन्मते वाचकं अन्येषां वाक्यमिति वाचकात्मनो वाक्यस्वरूपस्यानवस्थितस्वरूपप्रतिपादनाय द्वितीयकांडारंभः ॥ तत्राचा
र्यमतभेदाश्रयेण तावद्वाक्योद्देशार्थमाह ॥ आख्यातशब्दः संघातो जातिः संघातवर्त्तिनी । एकोऽनवयवः शब्दः क्रमो बुद्ध्यनुसंहृतिः ॥ पदमाद्यं
पृथक्सर्वपदं साकांक्षमित्यपि ॥ वाक्यं प्रतिमतिर्भिन्ना बहुधा न्यायवादिनां ॥ एतेष्टौ वाक्यविकल्पाः आचार्याणां ॥ तत्राखंडपक्षे जातिः सं
घातवर्त्तिन्येकोऽनवयवः शब्दो बुद्ध्यनुसंहृतिरिति त्रीणि लक्षणानि अखंडपक्षे तु आख्यातशब्दः क्रमः संघातः पदमाद्यं पृथक्सर्वपदं साकां
क्षमिति पंच लक्षणानि ॥ अत्रापि संघातः क्रमश्च अभिहितान्वयपक्षे लक्षणद्वयं ॥ आख्यातशब्दः पदमाद्यं पृथक्सर्वपदं साकांक्षमित्य
न्विताभिधानपक्षे लक्षणत्रयमिति विभागः ॥ इह च पदप्रकृतिः संहितेति प्रातिशाख्ये ॥ तत्र पदानां प्रकृतिः कारणं पदप्रकृतिः संहितेत्य
खंडपक्षः ॥ पदानि प्रकृतिर्यस्याः सेति खंडपक्षः प्रादुर्भवति ॥ तत्राख्यातशब्दो वाक्यमिति पारत्ताछब्दार्थनिर्णय इति प्रकरणे दर्शयि
ष्यति ॥ यथा ॥ आख्यातशब्दो नियतं साधनं यत्र गम्यते । तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयत इति ॥ केवलेन पदेनार्थ इत्यादिना श्लो
काष्टकेन संघातो वाक्यमिति दर्शयिष्यति ॥ यद्येक एव सर्वार्थ इत्यादिना देवदत्तादयो वाक्ये तथैव स्युरनर्थका इत्यंतेन ग्रंथेनानया राम० १

अथ क्रमः क्रमवानित्यादिना व्याहृत्तमेदोपि नार्थ इत्यनेन चाखंड एव स्फोटलक्षणः शब्दो वाक्यमिति निदर्शितं॥ उक्तं च॥ येनोच्चरितेन सास्नालांगूल
खुरककुद्विषाणप्रत्यर्थरूपं प्रतिपाद्यते स शब्दः॥ तस्मात्स्फोटः शब्दो ध्वनिः शब्दगुणः इति॥ स्फोटश्च द्विविधो वाह्य आभ्यंतरश्चेति॥ वाह्योपि जातिव्यक्तिभेदे
न द्विविधः॥ तत्र जातिलक्षणस्य जातिः संघातवर्तिनीति॥ व्यक्तिलक्षणस्यैको नवयवः शब्द इति॥ आभ्यंतरस्य तु बुद्ध्यनुसंहृतिरित्यनेनोद्देशः॥ तत्र जा
तिव्यक्तिलक्षणस्य वाह्यस्य यथैक एवेत्यादिना पनराख्यं क्रमं क्रमवानित्यादिना ग्रंथेन स्वरूपमुक्तं॥ यदंतः शब्दतत्त्वमित्यादिना श्लोकचतुष्टये
न नियतं साधने साध्यमित्यनेन च श्लोकद्वयेन पदमाद्यं पृथक्सर्वपदं साकांक्षमिति लक्षणद्वयं व्याख्यास्यति॥ अन्यदपि वार्त्तिककारीयं प्राग्भा
षिकेशाख्यं वाक्यलक्षणमस्ति॥ आख्यातं साव्ययकारकविशेषणं वाक्यं॥ एकतिङिति च॥ जैमिनीमांसकोक्तं लौकिकमप्यस्ति॥ अर्थैकत्वा
देकं वाक्यं साकांक्षं चेद्विभागे स्यादिति॥ अनयोः संघातपक्षेंतर्भावः॥ एतेपि मध्यमभेदवनिघातादिव्यवस्थार्थमित्यादिना विचारयिष्यते॥ इ
त्थमष्टावेव वाक्यविकल्पा मतभेदेन संपद्यंत इति वोद्धव्यं॥ यत्तु नानेन ह तावुक्तं॥ उदाहरणमात्रमेतत्॥ अन्यान्यपि वाक्यलक्षणानि निदर्श
यिष्यतीति॥ तद्वार्त्तिककारीयवाक्यलक्षणादेरंतर्भावमनपेक्ष्येति मंतव्यं॥ उद्दिष्टानां च वाक्यलक्षणानां यथान्यासमग्रे कारिकाभिरेव द
र्शितक्रमेण स्वरूपमुन्मीलयिष्यतीति नार्थ इह तत्प्रदर्शनेन॥ वाक्यलक्षणप्रसंगेन च तथा वाक्यार्थस्य संवंधस्य च मतभेदं दर्शयिष्यति॥

२ तत्राखंडपक्षे त्रिष्वपि लक्षणेषु प्रतिभा वाक्यार्थः ॥ यथा दर्शयिष्यति ॥ विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते । वाक्यार्थ इति तामाहुरिति ॥ अवशिष्टे
षु पंचसु लक्षणेषु मध्यादाख्यातशब्दो वाक्यमित्यस्मिन्पक्षे क्रिया वाक्यार्थः । यथा वक्ष्यति ॥ क्रिया क्रियान्तराद्भिन्नेत्यादि ॥ यथा च प्रतिभा यस्य
मृतार्थीयामनुष्ठानमाश्रितो ॥ फलं प्रत्यपेतयतः सा क्रिया वाक्यगोचरा इति । संघातपक्षे क्रमपक्षे च संसर्गो वाक्यार्थः । स च । संबंधे सति यत्त्वन्यदा
धिक्यमुपजायते । वाक्यार्थमिति तं प्राहुरनेकपदसंश्रयमित्यादिना दर्शयिष्यति । तथा संघातपक्ष एव सर्वभेदानुगुणमित्यादिनाप्रकारांतरे
णाभिहितान्वयपक्षे प्रतिपाद्यमानो । कार्यानुमेयः संबंधो रूपं तस्य न विद्यते । इत्यनेन श्लोकेन विशेषविश्रांतः पदानामेवार्थो वाक्यार्थ इति
लक्ष्यते । पदमाद्यं पृथक्सर्वं पदं साकांक्षमित्यस्मिंल्लक्षणद्वये संसृष्ट एव प्रथमतरं प्रक्रमस्ततो वाक्यार्थः । यथा निरूपयिष्यति । तेषां तु कृत्स्नो
वाक्यार्थः प्रतिभेदं समाप्यते । तथा पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः । संसर्ग एव प्रक्रांतस्तथाद्यपृथग्वक्ष्यति । अभिधेयः पदस्यार्थो
वाक्यस्यार्थः प्रयोजनं ॥ इत्यनेन प्रयोजनं वाक्यार्थत्वेन प्रदर्शितं । तत्केषांचिन्मते सर्वलक्षणसाधारणमिति तत्प्रयोजनं वाक्यार्थो वाक्य
लक्षणेषु पृथग्विभज्यते । तदेवं प्रतिभा संसर्गः । संसर्गवशान्निराकांक्षो विशेषावस्थितः पदार्थ एवं संसृष्ट एवार्थः क्रिया प्रयोजनं चेति
षड्वाक्यार्था इहोपदर्शिताः । संसर्गे संसर्गवशाद्विशेषावस्थिते पदार्थे च वाक्यार्थेऽभिहितान्वयः । संसृष्टे क्रियायां चान्विताभिधानं । प्रति राम०
२

भाषांल्लेकारस्यैव प्रतिपन्ना इति ननु अत्र काचिद् अभिहितान्वयान्विताभिधानवादौ । प्रयोजने त्वभिहितान्वय एव । विधिनियोगभावनासंसक्तवाक्या
र्थानि निरूपितानि । यस्माद्भावनाक्रिययोः पर्यायतया प्रायशो लक्ष्यते । केवलं महत्स्वर्थप्रसाधितायामत्रैव वैयाकरणमीमांसकयोर्विवादः ।। किं च भाव
नाम कर्मिकैवाकर्मिकापि क्रियेति मतस्यापि भेदे साध्यत्वाविशेषादभेद एवानयोः । यथा धात्वर्थभूता क्रिया साध्यरूपैव तथा भावनापीति कथमवान्तर
भेदाद्वैतेनयोर्भवेत् । विधिनियोगौ तु लिङ्ङ्कृत्सान्ते चैव वाक्यार्थौ वित्त सर्वविषयत्वाद्ना हृता विहितनित्यदर्शनेक्षणानं तन्त्रं दनादिवाक्यार्थविक
ल्पाहितवासनाप्रबोधजन्मा क्रमवद्भिरिवाक्रमैर्वहीरूपतयाध्यस्तैः पदार्थैः खचीकृतरूपविकल्पविशेषोल्लिख्यमानाकार एव बहीरूपतया
ध्यस्तो निर्विभाग एव शाब्दज्ञानं वाक्यार्थ इति प्रायशः प्रतिभासोदर एवासौ मन्तव्यः । वाक्यमपि तन्नदनादिवाक्यविकल्पाहितवासनाप्रबोध
जन्मक्रमवद्भिरिवाक्रमैः पदैः खचीकृतरूपवहीरूपतयाध्यस्तसमानो विशिष्टविकल्पोल्लिख्यमानाकारविशेष एव बहीरूपतयाध्यस्त इ
ति प्रायशो [illegible] नुसंहृतिरित्यस्मोदरमेवेति ननन्यतानुसारेण वाक्यवाक्यार्थयोः द्रूसंग्रहो वेदितव्यः । नैयायिकादीनां तु पूर्वपूर्ववर्णस्मृ
तिसचिवोऽन्त्यो वर्णो नश्यत्पदवस्त्वनुभवविषयीक्रियमाणः पदं यथा तथैव पूर्वपूर्वपदस्मृतिसचिवमन्त्यमेव पदं नश्यत्पदवस्त्वनुभवविष
यीक्रियमाणं वाक्यमिति प्रायशः संसर्गपक्ष एवान्तर्भवति ।। तथा पूर्वपूर्वपदार्थस्मरणसचिवेनान्त्येन पदेनोपजन्यमाना प्रतीतिर्वाक्यार्थ इ

२ ति मायथाः संसर्गपक्ष एवास्तां न भीव इति न न द संग्रहेण व्याप्तिरुक्त्वा। अथ यात्रानवयवए कस्मिन् स्फोटात्मके वा को प्रतिभालक्षणो च वाका
3 र्थे वाकवाकार्थयोरध्यासरूपः संबंधः। यद्दृष्ट्यानि। वाकार्त्रस्य वाकार्थे इति। इत्यादि। अव शिष्टेषु पक्षेषु वाच्यवाचकभावलक्षणो योऽप्यतात्म ए
व शब्दार्थयोः संबंधो मीमांसकेष्टः। शाकदर्शनानुसारेण तु विज्ञानवादनयेन बौद्धशब्दार्थे सर्वत्र कार्यकारणभाव एव। वाकार्थवादे तु तत्र
संकेतलक्षणो सो बोद्धव्य॥ नैयायिकाद्यनुसारेण च संकेतलक्षण एवासाविसेवमत्र वाकवाकार्थसंबंधानां संक्षेपतः स्वरूपं बोद्धव्यं संबंधेषु
मध्यात्त्वाध्यासमेव दर्शयिष्यति पदकांडे तु सर्वानभिधास्यति। तत्र वैयाकरणस्याखंडएवैकोनवयवः शब्दः स्फोटलक्षणो वाक्यं प्रतिभैव वाका स्प
व्द र्थो ध्यासश्च संबंध इति पदवादिपक्षरूपण परः परंटीकाकारो व्यवस्थापयतीत्यस्य कोऽप्यस्य संक्षेपः॥३॥ अथ वार्तिककार मीमांसको क्रमयोर्वा का लक्ष
णयोः किं समावेश उत भिन्नविषयतेति विचारार्थमाह॥ निघातादिव्यवस्थार्थं शास्त्रे यत्परिभाषितं॥ साकांक्षावयवं तेन न सर्वत्र तुल्यलक्षणं॥३॥
इह पदविधिः सामर्थ्ये सति परिभाषितः। तत्र सत्यपि पदानां सामर्थ्ये निघातादयः क्वचिन्नेष्यन्ते॥ यथा॥ अयं दंडो हरानेन ओदनं पच मम भ
विष्यति ओदनं पच तव भविष्यतीति। अत्रानेनेति सर्वनाम्नाहंडस्य परामर्शाद्धरेति नासह तस्य सामर्थ्यं तथा युष्मदर्थस्यौदनेन संबंधात् पचस
र्थस्यानेन सह सामर्थ्यं॥ एवं च सति सामर्थ्ये तिङ्ङतिङः इति निघातः प्राप्नोति। तेमयावेकवचनस्येति वादेशौ। न चेष्यंते। वाक्याभेदात् सामर्थ्या स्य
२

भावेपीष्यते। यथा नद्यास्तिष्ठति कूले शालीनां ते ओदनं दास्यामीति। अत्र नद्यास्तिष्ठतीत्यस्य च संबंधानुपपत्तेः सामर्थ्यं नास्ति। इष्यते च निघातः॥ तथा शा
लीनां युष्मदस्मत्सामर्थ्याभावः॥ इष्यते चैतन्मतैकवचनस्य निर्युष्मदादेश इत्यालोच्य वार्तिककृता निघातादिव्यवस्थार्थमारब्धं। समानवाक्ये निघा
तयुष्मदस्मदादेशा वक्तव्या इति एवं चायं दण्ड इत्यत्र सत्यपि सामर्थ्ये नास्ति निघातस्समस्तं गौर्वध्यवधिमतोर्भिन्नवाक्यत्वात् यावस्थानात्। अत्र ली
सधाहारेण ह्ययं दण्ड इत्येकं वाक्यं। हरानेनेति च द्वितीयं वाक्यं। नद्यास्तिष्ठतीत्यादौ तु वध्यवधिमतोः पदयोः सामर्थ्याभावेप्येकवाक्यव्यवस्थि
तौ अपवर्जनं एव निघातादय इति नान्येषामव्यवस्था। समानवाक्ये निघातादयो वक्तव्या इत्युक्तौ न तु वाक्ये विज्ञाते समानवाक्यत्वं ज्ञायत इति
असंगात् तत्र वार्तिककारेण द्वावेव वाक्यलक्षणमुक्तौ। आख्यातं साव्ययकारकविशेषणं वाक्यमेकतिङिति चेति। एवं च मीमांसकोक्तेनाप्यसर्वत्र
समावेशोस्तीति न वेति विचार्यते। शास्त्रे वाक्यकारेण निघातादिव्यवस्थार्थमपि वाक्यलक्षणं परिभाषितं तेन मीमांसकोक्तं वाक्यलक्षणं सकलं
न तुल्यलक्षणं। साकांक्षावयवमित्यनेन मीमांसकोक्तं वाक्यलक्षणं सूचितं तत्र क्वचिद् द्वयोर्न समाविशतः। यथा नद्यास्तिष्ठति कूले। शालीनां ते
ओदनं दास्यामीति। अयं दण्डो हरानेनेति। ओदनं पचतव भविष्यतीत्यादौ च समावेशः। मीमांसकवाक्यलक्षणसमाश्रयणे नात्र समासुर्वांति निघाता
दयः एकपदयोजनत्वात्। न चेष्यते। तस्माद्वार्तिककारीयमेव वाक्यलक्षणं ज्यायः॥३॥ अथात्र प्रसंगान्मीमांसकवाक्यलक्षणमर्थद्वारेण प्रदर्शयि

४ तुमाह॥ ॥साकांक्षावयवं भेदे परानाकांक्षशब्दकं॥ कर्मप्रधानं गुणवदेकार्थं वाक्यमिष्यते॥४॥ भेदे विभागे विशेषजिज्ञासायां परानाकांक्षावयवं॥ अविभागे तु
परानाकांक्षाः शब्दाः पदानि यस्मिन् तत् परानाकांक्षशब्दकं। कर्मप्रधानं। क्रियापदप्रधानमित्यर्थः। तस्यैव प्रधानाभिधेयप्रयुक्तत्वादित्यभिप्रायः। गुणवद्वि
शेषणपदयुक्तं। एकार्थमेकप्रयोजनं॥४॥ इदानीं वार्त्तिककारीयस्य वाक्यलक्षणस्याव्याप्तिमाशंक्याह॥ ॥संबोधनपदं यच्च तत्क्रियाया विशेषकं॥ व्रजा
नि देवदत्तेति निघातो न प्राप्नोति॥५॥ व्रजानि देवदत्तेत्यत्र देवदत्तेत्येतत्पदं नाव्ययेन चकारकेनापि न हि विशेषणमिति वाक्यलक्षणेनासंग्रहीतत्वाद्दा
ष्टमिकस्यामंत्रितस्य वेति निघातो न प्राप्नोतीति चोद्यं॥ आख्यातेनाव्ययेन सकारकं सविशेषणमिति सामान्येनाभिधानात् क्रियाविशेषणस्याप्याख्या
तस्य वाक्यत्वे तद्दोषः। तथा ह्यत्र संबोध्यमानदेवदत्तविषया व्रजतिक्रिया। अत्र संबोध्यमानदेवदत्तविषयायाः संबोध्यमानपदवृत्तदत्तविषयाया वा एव
गेवेति विशिष्टैवात्र व्रजतिक्रिया॥ क्रियायाश्च विशेषणं कदाचित्सामानाधिकरण्येन भवति। यथा सुष्ठु करोति शोभनं करोतीति। अत्र करोत्यर्थस्य
सुष्ठुत्वादिविशेषणविशिष्टस्यैव प्रतीतेः सुष्ठुत्वादीनां करोत्यादिक्रियया सामानाधिकरण्यं। एवं चासत्त्वभूतायाः क्रियाया विशेषणमिति स
सत्त्वप्रधानत्वाल्लिंगसर्वनाम्ना नपुंसकेन योगः क्रियायाश्च निर्वर्त्यत्वात्कर्मत्वमिति न्यायसिद्धमेव कर्मत्वं नपुंसकता चेति क्रियाविशेषणानां कर्म
त्वं नपुंसकलिंगता चेति नारंभणीयं वचनं। वैयधिकरण्येनापि विशेषणं भवति। यथा व्रजानि देवदत्तेति। अत्र हि देवदत्तव्रजानीति देवदत्तस्य व्रजन एमु॰ ४

क्रियायाश्च सामानाधिकरण्यं नास्ति। केवलमाख्यं अदेवदत्तं व्रजन्तमपश्यदिति देवदत्तान्वयं चाविशेषिता केवलाद्धाताविलक्षणा व्रजनक्रियेसाध्यानेस
विशेषणामेवेतिवा कालक्षणसद्भावान्नवर्ततेएव निघातः। देवदत्तव्रजन्तीसेवमुहूर्तान्नमद्राक्षीत्। अग्निमित्रे पूर्वमविद्यमानवदिति न निघातः
स्यादिति पुनरप्यव्याप्तिं वार्त्तिककारलक्षणस्याशंक्य परिहर्तुमाह॥ ॥यथानेकमपि त्क्तोनेतिङ्. तस्य विशेषकं। नयातिङ्. तेन त्वाङ्गुलिङे. नस्य
विशेषकं॥ इह पूर्वं त्वाजि पचति नतो व्रजति ननड्न्यचननड्सेनस्मादुत्तरस्य व्रजतीत्यस्य निघातो न प्राप्नोतीति वाक्यभेदान्नुदृष्यते च॥ अत्रति
ङ्. तादुत्तरस्य तु तिङ्. तस्यातिङ्. तिप्रतिषेधान्निघातनिवृत्तिः सिद्धेतिनाचत्वानीत्यस्मादुत्तरस्य पचतिशब्दस्य निघातः प्राप्नोतीति चोद्यमुद्भाव
नीयं॥ इष्टस्य निघातस्याप्राप्तिर्वा चोद्भावनीया॥ अत्रोच्यते॥ नात्र च वाक्यभेदः॥ व्रजतीत्येतत्साधात्येनैकक्रियापदमवस्थितं अन्याति
क्रियान्तराणि तद्विशेषणान्येव यथा स्नानभोजनपानैः कुर्वन्नेव विशिष्यते व्रजतिक्रिया न यथात्र तिङ्. तैः स्नातिप्रभृतिभिः प्रधाना व्रजतिक्रि
येव विशेष्यते इत्येकेवाक्यस्य विशेषणाव्रजतिक्रियां केवलायात्वस्याः पृथगेवेसनत्वविशेषणामेकमेववाक्यमितिवाक्यभेदाभावान्नास्ति
निघातासिद्धिदोषः। एकवाक्ये च तिङ्न्तादुत्तरस्य तिङ्. न्तस्यातिङ्. तिप्रतिषेधा॰न्निघाताभावः। यथा वक्ष्यति वक्तुमपि तिङ्. न्तेषु सा
काङ्क्षेष्वेकवाक्यतेति तिङ्ग्रहणे तिङ्ग्रोनिघातस्य प्रसिद्धासत्त्यर्थं वा न दुष्टिः। एवं चातिङ्ग्रहणे समयोजने स्थिते वार्त्तिककारेणापदुक्तमतिङ्ग्रह

५ 5 णमनर्थकं समानवाक्याधिकारादिति। तत्राभिप्रायो वाच्यः॥ एवंवादिनस्तस्य वाक्यभेदो नाभिमत इत्यभिप्रायः। आख्यातं साव्ययकारकविशेषणमिति
चैकवचनस्याविवक्षितत्वादिति। तथा च टीकाकारः प्रदर्शयिष्यति। एकतिङ्ग्रहणस्य कारकान्तरे तु एकनियमलक्षणः। तस्मात्तिङ्ग्रहणेनार्थो वाक्यभेदान्न
विद्यत इति। सूत्रकारस्य त्वतिङ्ग्रहणादेकमेवाखण्डं वाक्यमर्थैकत्वादाख्यातभेदेप्यभिप्रेतमिति गम्यते। तदभिप्रायानुसारेणैव निरूपयिष्यति। अ
नेकाख्यातयोगेपि वाक्यं न्यायपर्यनुयोगे। एकमेवेष्यते कैश्चिद्भिन्नरूपमिव स्थितमिति। टीकाकारस्त्वमुमेव पक्षं सूत्रकाराभिप्रायसमाश्रयेणे
न युक्तियुक्तं मन्यमानो बहीरूपश्चान्तरो वा निर्विभागः शब्दार्थमयो बोधस्वभावः शब्दः स्फोटलक्षण एव वाक्यमिति क्रमेण व्याजिहीर्षुश्चित्र
ज्ञानचित्ररूपदृष्टान्तप्रदर्शनं पूर्वमुपक्रमते। तत्र चित्रबुद्धिदृष्टान्तप्रदर्शनार्थमाह॥ यथैक एव सर्वार्थः प्रत्ययः प्रविभज्यते। दृश्यभेदानु
कारेण वाक्यार्थानुगमस्तथा॥७॥ चित्रज्ञानं सर्वाकारमेकमेवाप्रविभागं तस्य दृश्यभेदसमाश्रयेणाक्रियते। नीलपीताद्यनेकाकारमेव विज्ञा
नमुपजायत इति। वस्तुस्थित्या तत्र ज्ञाने आकारभेदो नास्तीति। तथा वाक्यवाक्यार्थयोः स्वरूपं बोद्धव्यं वाक्यार्थानुगमस्तथेत्यनेन हि वाक्य
वाक्यार्थयोरखण्डत्वे पानकरसमयूराण्डरसचित्ररूपनरसिंहगवयचित्रज्ञानवत्समानमेवेत्युच्यते। यथा निर्विभागः स्फोटलक्षणो वाचकं तथा
वाक्यार्थोपि तथाविध एवेत्यनयोरेकयोगक्षेमत्वमुक्तौ ॥७॥ एवमान्तरं दृष्टान्तमुपदर्श्य बाह्यमप्युपदर्शयितुमाह॥ ॥चित्रस्यैकरूपस्य यथा एम्०
८

थाभेदनिदर्शनैः। नीलादिभिः समाख्यानं क्रियते भिन्नलक्षणैः॥८॥ चित्रं हि रूपमवयवविभक्तमनंशमेकमेवानंशैर्वावयवगतैर्यथा नीलादिभिर्भेदेन
निदर्शनं प्रदर्शनं येषां तैः पृथग्रूपैरेव समाख्यानं क्रियते। तथा प्रकृते किमित्याह॥॥ तथैवैकस्य वाक्यस्य निराकांक्षस्य सर्वतः। शब्दान्तरैः समाख्या-
नं साकांक्षैरनुगम्यते॥९॥ एकस्य निर्विभागस्य वाक्यस्य सर्वतः परिपूर्णस्य वाक्यान्तरगतैः पदान्तरैरन्वाख्यानं तत्रैव क्रियत इति। न वा पदस्यार्थप्रयो-
गादिसम्भिन्नदर्शने यथाखण्डमेव पदं प्रकृतिप्रत्ययादिभिः कल्पितैरेव विभज्यते। तथा वाक्ये प्रयुक्तस्य भन्ना नामेव बुधबोधनाय पदानां विभा-
गोऽपोद्धृत्य प्रकृतिप्रदर्शयितुमाह। यथा पदे विभज्यन्ते प्रकृतिप्रत्ययादयः। अपोद्धारस्तथा वाक्ये पदानामुपवर्ण्यते॥१०॥ पदे हि यथा प्रकृतिप्रत्ययवि-
भागोऽसत्य एव बालव्युत्पादनाय क्रियते। तथा वाक्ये वाक्यार्थप्रतिपादनायापोद्धारः पदानामुपवर्ण्यत इति बोद्धव्यम्। तत्र वाक्यादपोद्धृतानां
पदानां केवलमितरपदसारूप्यमात्रं दृश्यत इति प्रतिपादयितुमाह॥ ॥वर्णान्तरसरूपत्वं वर्णभागेषु दृश्यते॥ पदान्तरसरूपाश्च पदे भागा
अवस्थिताः॥११॥ यथा संध्यक्षरेषु भागा वर्णान्तरसरूपा दृश्यन्ते परमार्थतस्त्ववयवपृक्तत्वान्निर्विभागा एव॥ एवं वाक्ये पदान्तरसरूपाः प
दरूपा भागाः पदभागाः। पदे वा निरंशे ये भागाः प्रकृतिप्रत्ययरूपास्ते व्यवस्थिता इति॥१२॥ एतदेव व्यक्तीकुर्वन्नाह। भागैरनर्थकैर्युक्ता वृष-
भोदकयावकाः। अन्वयव्यतिरेकौ तु व्यवहारनिबन्धनौ॥१३॥ नहि वृषभे ऋषभस्योदकयावकयोर्वा उदयावशब्दयोरर्थानुगमः कश्चिद

६ स्ति। अपि तु शास्त्रे पदस्य प्रकृतिप्रत्यययोरन्वयव्यतिरेकाभ्यां विना कथमर्थो साध्यते। एवं च निरंशमेव वाक्यं वाचकमिति व्युक्तं ॥१२॥ अथ वा कार्य
स्यापि तथैव निर्विभागत्वमिति पादमपि तु माह॥ शब्दस्य न विभागोऽस्ति कुतोऽर्थस्य भविष्यति। विभागैः प्रक्रियाभेदमविद्वान्प्रतिपद्यते॥ शब्दस्य स्फोटलक्ष
णस्य विभागो नास्ति। तद्वाच्यस्य प्रतिभारूपस्यार्थस्य कुतो भविष्यति। यथा निदर्शयिष्यति। विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते। वाक्यार्थ इति नामा
ह्रीति। तस्य पदानुरोधेन पदार्थस्यापि प्रकृतिप्रत्ययानुरोधेन भागकल्पना॥ प्रकृत्यादिविभागेन प्रक्रियाभेदं प्रक्रियाभेदे वार्थभेदमसमप्रमापि प्र
तिपद्यत इति। किं कुर्मः। ॥१३॥ युक्तं चैतत्। यद्वाक्ये पदार्थभेदो नास्तीति दृष्टान्तप्रदर्शनपूर्वकमाह॥ ॥ ब्राह्मणार्थो यथा नास्ति कश्चिद्ब्राह्मणकंब
ले। देवदत्तादयो वाक्ये तथैव स्युरनर्थकाः॥१४॥ यथा ब्राह्मणकंबलशब्दे ब्राह्मणशब्दस्य न कश्चिदर्थो विद्यते। तथैव देवदत्त गामभ्याज शुक्लां दण्डेनेति वा
क्ये देवदत्तादीनां पृथगर्थो नास्तीत्यनर्थकान्येव पदानि। अत एव स्थितमेतत्॥ पदं खण्डं निराकांक्षमेकं पदव्यतिरिक्तं वाक्यं पदार्थव्यति
रिक्तो वाक्यार्थश्चेत्येवेति। ॥१५॥ एतत्तु न मीमांसकैरुच्यते। यथा पदसंघात एवाकांक्षायोग्यतासन्निधानवशात्परस्परसमन्वितो वाक्यं संस
र्गश्च वाक्यार्थ इति तद्दूषयितुमाह॥ ॥ सामान्यार्थस्तिरोभूतो न विशेषेऽवतिष्ठते॥ उपात्तस्य कुतस्त्यागो निवृत्तः कावतिष्ठताम्॥१६॥ इह देवद
त्त गामभ्याज शुक्लां दण्डेनेति देवदत्तादीन्यपि पदानि वाक्यान्तरे देवदत्तपदं तावद्यदि सामान्यमात्रे प्रथमं वर्तते तत्तत्स्य गवादिपदैः काले एम० ६

वाचः क्रमवर्त्तित्वान्निरोधानादसत्त्वमेवेति कुतः पदान्तराश्रवणकालेन दृष्टमतीतिः सत्त्वादेव वचनपदान्तरसंनिधानेन स्वविशेषेऽवस्थानं । अभ्यु
पगम्यापि स्वार्थमात्रेण तया पदान्तरसंनिधाने विद्यमानत्वे पदस्य न विशेषेऽवस्थानं युज्यत इत्याह ॥ उपात्तस्येति ॥ सामान्यलक्षणस्य सकलपदार्थसा
धारणस्यार्थस्य पूर्वमुपात्तस्य वाच्यत्वेन परिगृहीतस्येदानीं पदान्तरसंनिधाने त्यागः कुतो युज्यते शब्दार्थसंबंधस्यानित्यता मा भूत् । न च तथा
मीमांसकस्याभ्युपगम इति । तदप्यभ्युपगम्योच्यते । निवृत्त इति । स्वार्थान्निवृत्तोऽसौ पदान्तरसंनिधाने शब्दः क्वेदानीमवतिष्ठताम् । शब्दा
न्तरबोधेऽर्थे तस्य वाचकभावविरहात् स्थितिः कथं युज्यते । अथोच्यते । अर्थप्रतिपत्तिर्दृष्टादेवदत्तेत्यादिकात्समुदायात् । सा कथम
पह्नूयते । तत्राह ॥ अशब्दो यदि वा कार्यः पदार्थोऽपि न यो मतः । एवं च सति संबंधः शब्दस्यार्थेन हीयते ॥ उक्तनीत्या शब्दान्तरप्रसंगे वा
चकः । तदभावात् । शब्दो वा कार्योऽपि यद्यभ्युपगम्यते तदपि परिच्छेदोषः । पदार्थोऽपि पदप्रतिपाद्यो न कश्चित् [illegible] अनेकवर्णाव
र्त्तित्वाद्धाच्चोच्चारितप्रध्वंसित्वाद्वर्णानामिति पदमप्येकं नास्ति तदभावात्कः पदार्थः स्यात्तादृशस्य च शब्दोऽवाचको वा कार्य इति वाच्य
वाचकभावलक्षणः संबंधः शब्दार्थयोस्त्यक्तः स्यान्मीमांसकेनेत्याह । एवं चेति । एवं तावदभिहितान्वयवादीनि[illegible]स्तः । इदानीम
न्विताभिधानसमाश्रयणेन पदमाद्ये पृथक्त्वे पदं साकांक्षमित्यादिदृष्टे वा काललक्षणे प्रदर्शयितुकाम आह ॥ विशेषशब्दाः केषां

७ चिन्तामान्यमतिरूपकाः। शब्दान्तराभिसंबंधाद्वाक्ये नेममतिपत्तृषुं॥१८॥ इह देवदत्त गामभ्याजेत्यत्र देवदत्तपदं गां बधानेत्यस्माद्धि शिष्टमेव वक्रा
समुदीरितोऽप्यमात्रानुसकलसाधारणां प्रतिभां नि उत्तरकालं गवादिपदसंबंधाद्विशिष्टां प्रतिपत्तिरभिव्यज्यत इति तद्देववाक्यं सकलविशे
षणरवचितस्वभावमथमन्तरमेवोपक्रान्तः संसृष्ट एव वाक्यवाक्यार्थ इति। यथा वक्ष्यति। पूर्वैरर्थैरनुगतो यथार्थात्मा परः परः। संसर्ग एव प्रक्रान्तस्तथाद्येष्वर्थ
वस्तुषुइति। एतदेव स्फुटीकर्तुमाह। तेषां तु कृत्स्नो वाक्यार्थः प्रतिभेदं समाप्यते॥१९॥ उपक्रम एव विवक्षितार्थप्रसाधनाय विशिष्टपदोदीरणमारभ
न्त इत्याद्य एव पदे प्रत्येकं वा सकलस्य वाक्यार्थस्य समाप्तिरवगन्तव्या। यद्येकस्मादेव पदात्सकलवाक्यार्थप्रतीतिः तर्हि इतरपदवैयर्थ्यमित्याशं
क्याह॥ व्यक्तोपव्यंजना सिद्धिरर्थस्य प्रतिपत्तृषु॥ प्रतिपत्तृषु वाक्यार्थस्य सिद्धिरवगतिर्व्यक्तोपव्यंजना। व्यक्ता उदीरिता उपव्यंजना अभिव्यंजकाः
पदविशेषा यस्याः सा तथोक्ता। अभिव्यक्ताभिव्यंजका वा वाक्यार्थावगतिरिति पदान्तराणां वाकेनात्यैव वैयर्थ्यमित्यन्विताभिधानमदर्शनं।
दूषणमप्यायातं तत्र तत्राभिधास्यति। यथा॥ नियमार्थापि श्रुतिर्भवेदित्यादि। तथा हि। यद्येकेन पदेन सकलवाक्यार्थस्याशेषविशेषणखचि
तस्यावगतिस्तदेतरेषां पदानां नियमायानुवादाय वोच्चारणं स्यात्। न चैतद्युक्तमिति वक्ष्यामः। एकस्मादेव पदात्समस्तविशेषणखचित
स्य वाक्यार्थस्य प्रतीतिः इतरेषामानर्थक्यं स्यादेवा न च तस्मादेव वाक्यार्थप्रतीतिर्दृश्यते। व्यक्तोपव्यंजनेत्यसमाधानमेवं यतः॥ किमेकस्माद्वा एम ७

कार्थावसायोन्येषामुपव्यंजकत्वं। अथसमस्तेप्येवंतेप्यन्त्यः सर्वेषां त्रयाणां पदानि वाक्यार्थप्रतीतये उपादीयन्ते एवं तन्विनाभिधानमसमंजसमेव॥
एकस्य वा परपदोच्चारणकाले तिरोधानादभिहितान्वयस्याप्यसंभव इत्यर्थभागे दूषणं। शब्दभागसमाश्रयणेन द्वयोरपि पक्षयोर्दूषणं। पदानि
वाक्ये नानैवेत्यादिश्लोकद्वयेनाभिधास्यति॥ संप्रति प्रतिभाभेदव्याविव्यासमयाऽखंडपक्षमेवानुबध्नन्नाह॥ अथ क्रमः क्रमवान् शब्द उपांश्वयम
धीयते। अक्रमस्तु विततेव बुद्धिर्यत्रावतिष्ठते॥ इह नित्य एवाभिन्नो व्यक्तिस्फोटो जातिस्फोटो वा बहीरूपश्चान्तरः शब्दार्थमयो वा बुद्ध्यनुसंहारो वा
चाभिमतः स एव वाचक उपपन्नः। यस्तु भेदप्रतिभासः सोसावुपाधिकृत एवेत्यर्थः। तथोपांशुपरमोपांशुव्यक्तोव्यक्ततरस्वरः। विलंबितो विलम्बि
ततरद्रुतद्रुततरस्वरेत्यादिकाः प्रतिभासा अभिव्यंजकध्वनिकृताः न पुनः स साक्षादिति बोद्धव्यं। तस्मादयं शब्दोऽव्यक्त उपांशुरूपत्वाधीयते। सोभि
व्यंजकध्वनिकृतात्क्रमात्क्रमवान्नानाविधावस्थाकः प्रतीयते। परमार्थतस्त्वसावक्रम एव स्फोटात्मा प्रतिभासः उपाधिवशात्तत्र बुद्धिर्वि
ततेवानुगम्यत इति बोद्धव्यं। अनेनैकोनवयवः शब्द इत्युद्दिष्टस्य व्यक्तिस्फोटस्य स्वरूपमुक्तमिति बोध्यं॥ अथ जातिः संघातवर्तिनीत्युद्दि
ष्टस्य जातिस्फोटस्यापि दृष्टान्तप्रदर्शनद्वारेणास्फुटीकरणायाह॥ यथाक्षेपविशेषेपि कर्मभेदो न गृह्यते। आवृत्तौ व्यज्यते जातिः कर्मभि
र्भ्रमणादिभिः॥ वर्णा वाक्यपदेष्वेवं तुल्योपव्यंजनाश्रुतिः। असंतभेदेनत्वसमत्वेव प्रतीयते॥ इह भ्रमणलक्षणकर्मजातिर्यथाविशिष्टप्रय

२
8 त्वजातिनेन स्वेषु विशेषणाभिव्यक्तामसेकपरिसमाप्तत्वात्। न च पार्थक्येन साविज्ञायते। भ्रमणा नामार्थत्वौ तु भ्रमणो भ्रमणोपमितिमितिप त्रासा
ग्रहत्वात्। एवं वर्णपदवाक्येषु स्फुरति। अभिव्यंजको ध्वनिरसंतभेदेन स्वस्य वर्णपदवाक्यस्फोटलक्षणस्य साभिव्यंजिका स्वरूपेव मतीयते। परमा
र्थतो भिन्नापि सती। कीदृशी तुल्योपव्यंजनेति। तुल्यः सदृश उपव्यंजनः स्थानकरणाभिघातलक्षणोपस्थाः सा तथेति। तेन भिन्नमयत्वो
दीरितध्वनिभिर्व्यक्तोऽयं ज्ञाने स्फोटो विलक्षण एवेति बोद्धव्यः। युक्तं चैतद् यथा नित्यस्य तस्य स्फोटस्य पूर्वपरभावउपाधिकृतो न स्वतो नित्यत्वादिति २१॥
वैतस्येन नित्यत्वसमर्थनार्थमाह॥ ॥नित्येषु तु कुतः पूर्वपरं वा परमार्थतः। एकस्यैव तु सा शक्तिर्यदेवमवभासते॥ नित्येषु हि परमार्थतः पूर्वापरभा
वोऽसंभवदुपाधिकृतो दृश्यत एव। ननु सदैकरूपतया किं नावभासते। न हि तत्स्वभावभेदस्यासंभवदित्याशंक्याह। क्रमेकस्यैव सा हि एकस्व
भावोपि तथाविधशक्तियुक्त एव वस्तुस्वाभाव्यात्। यदेवं वैतस्येन पूर्वापरभावस्वरूपतया उपाधिभेदानुवर्तनेनावभासते। दृष्टोऽपि नाप्यु
पाधिभेदेनैव शब्दस्य भेदप्रतिभासो न स्वतो नित्यत्वादिति दृष्टान्तप्रदर्शनपूर्वकमाह॥ ॥चिरं क्षिप्रमिति ज्ञानेकालभेदाद्यथा। भिन्न २
कालेप्रकाशेने सधर्मो ह्रस्वदीर्घयोः। चिरमिति ज्ञानं क्षिप्रमिति च यथा ज्ञानत्वाविशेषादेककालमपि ज्ञेयसमाश्रयणे न भिन्न
कालमिव प्रथते। चिरज्ञानं विततप्रतिभासमिवाभाति। क्षिप्रज्ञानमेतद् विपरीतं। तद्वद्ध्रस्वदीर्घयोर्धर्मः स्वभावो वगन्तव्यः। ननु ह्रस्वादि एम०
२

रूपता काचित्स्फोटइति नास्ति स्फोटस्स्वलक्षणो भेदः ॥२३॥ अथोच्यते न नित्यसमुपाधिवशाद्भिन्नत्वं वक्तुं युक्तं। स्वभावभेदप्रसंगादित्याशंक्याह॥ ॥न नित्यः प
रमात्माभिः कालो भेदमिहार्हति॥ इह कालोऽपि नित्य एवाभ्युपगतो नित्यमेकमित्यादिलक्षणकथनात् तानतस्येदानीं क्षणलवनिमेषत्र्यादिव्यवहारः क
थमुपपद्यते। अथ परमात्माभिन्नस्य भेदउपचर्यते। यथा परमात्मनः स्वात्ववरुद्धनभोदेशसागोपलक्षितः कालः क्षणः क्षणद्वयं चलवइत्यादि। तथा नि
रंशो वा केनचिदौपाधिकभेदपरिकल्पनायां कः प्रद्वेषः ॥२४॥ अपप्रद्वेषे। न वयं नित्यमेकमित्यादिलक्षणलक्षितं कालं ब्रूमः किंतु जानीमः पूर्वापरीभूताः
पदार्थमात्रा एव स्वभावभिन्नाः कालः तत्समाश्रयणेन चायं क्रमयोगपद्यव्यवहारः न पुनस्तद्व्यतिरिक्तनित्यस्वभावकालकृत इति तत्राप्या
ह॥ व्यावर्तिनीनां मात्राणामभावे कीदृशः क्रमः ॥१०॥ ताः पूर्वापरीभूताः पदार्थमात्रा उदयव्ययोगिन्य एवेति विशरारूणां तासां कीदृशः क्रमः।
कथं च तत्समाश्रयणेन कालव्यवहार इत्यपि न किंचिदेतत् ॥१०॥ अथ तथाविधपदार्थसमाश्रयेण बुद्धिरुपजायमाना कालव्यवहारं निर्वर्तयिष्य
तीत्याशंक्याह॥ ॥ ताभ्यो या जायते बुद्धिरेकासौ भागवर्जिता॥ ॥२५॥ ताभ्यः पदार्थमात्राभ्यो या जायते बुद्धिः सापि न शक्नोति कालव्यवहारं निर्वर्तयि
तुं यत एकासौ बुद्धिर्निर्विभागेति कथं पूर्वापरव्यवहारं निर्वर्तयेत् ॥२५॥ अत्राह॥ सा हि स्वशक्त्याभिन्नैव क्रमप्रत्यवमर्शिनी। क्रमोल्लेखानुषंगेण ॥१०॥ बु
द्धिर्हि भिन्नैव स्वशक्त्या क्रमप्रत्यवमर्शिनी भविष्यतीति यतः क्रमोल्लेखानुषंगेण वासनानुभववासनावशादुपजायत इति कालव्यवहारं निर्व

९ नैनचनुरैवसा ॥१०॥ एतद्दूषयितुमाह ॥ तस्माद्यद्बीजमाहितं ॥२६॥ तन्नानात्वयोस्तस्मान्निरुक्तिर्व्यक्तिच्छतो ॥२७॥ तस्मात्तु बुद्धौ यत्र दाहितं पदार्थमात्राभिरनुभववशाद्बीजं
वासनारूपं संस्कारस्वभावं ततः किं व्यतिरिक्तं तस्मात्। उताव्यतिरिक्तमिति द्वयी गतिः। व्यतिरेके तस्यालेनन किंचिदिति कथं तद्दशात्क्रमादिको व्यवहारः।
अव्यतिरेके पुनरपि सैवैका निर्विभागेति पदार्थमात्रावत कालव्यवहारं कथं निर्वाहयेदिति तत्त्वनानात्वाभ्यां निर्वचं न बुद्धेः कर्तुं न पार्यत इति पर
किंचिदेतत् ॥२८॥ पुनस्त्वात्रकोऽकललवदाविभक्त एव युक्तः इति मतमपि दूषयितुमाह ॥ भावनासमभ्येत्य ते न तत्क्रमसामर्थ्यमक्रमो व्याहतनमेदो येनार्थाभि
दवानुपलम्भतो। ब्रह्मकाण्डे सर्वशंकानिवारणपूर्वकं स्फोटस्वरूपं निरूपितमेवं। तस्मादेतद्धाक्रमकमं स्फोटस्वभावमेकं वाचकं स्वपदार्थभावनावस
रेतत्पाधिवशात्क्रमसामर्थ्यं क्रमेसामर्थ्यं शक्तिर्यस्य तत्क्रमसामर्थ्यमवगतमायेनार्थो वा व्यवस्थितो व्याहतनमेदोऽखण्ड एव पदार्थोपाधिवशाद्भेदवा
निवोपलभ्यते न परमार्थतः। यस्य उ न तानि पदान्येवोपलभ्यमानानि वक्तृसंतिवाक्येभिन्नतानि नन व्यतिरिक्तमेकमनंशमखण्डस्वभावं वा
क्यं। तस्य पदान्यपि न वर्णव्यतिरेकेण विद्यन्ते। वर्णा अपि भागवन्तः इति प्रकर्षप्राप्तो भेदः एवं सर्वत्र स्यादिति पदवादिनं दूषयितुमाह ॥ पदानि वाक्ये
तान्येव वर्णास्ते च पदे यदि। वर्णेषु वर्णभागानां भेदः स्यात्परमाणुवत् ॥ यथावयवव्यतिरेकेणावयविन एकस्यानंगीकारोऽवयवानामपि भागव
त्त्वाद्भागपरिकल्पनाया अतिप्रसंगात् परमाणूनामवशेषः। तेषामपि केषांचिन्मते षड्भिर्युगपद्योगात्सांशतायामणीयसामवयवस्यानुपपत्तिः। एम०

अतश्च व्यपदेश्यपदार्थविरहितं निरीहमेव जगदापतितं ॥२८॥ तथैव वर्णभागानामनुपश्लेषान्न वर्ण एकः कश्चित्स्यात्तदभावे पदमपि न भवेदिति प्रतिपा
दयितुमाह ॥ भागानामनुपश्लेषान्न वर्णो न पदं भवेत् । तेषामव्यपदेश्यत्वात्किमन्यदपदिश्यतां ॥ अत्र श्लोकः । सा भागानाममसत्त्वाद्व्यपदेशविरहा
त्किमत्र वाचकमेतन्नाम इति किमन्यदपदिश्यतां । अखंडस्यानंगीकरणात् इदानीमुक्तेन न्यायेनानुपपत्तेः इति न कश्चिद्वाचकः स्यात् । अस्ति च वाक्या
र्थस्य प्रतीतिः सा सनिमित्ता भवितुमर्हतीति स एकः एवानिरंशः पदाभिधेयोऽखंडो व्यक्तिस्फोटो जातिस्फोटो वा वाचकोऽङ्गीकार्य इति सिद्धान्तः । एवं तावद्बहीरूप
व्यक्तिस्फोटं जातिस्फोटं वा वाचकमाश्रित्य वाक्यं व्याख्यातं । इदानीमन्तरे वानवयवे बोधस्वभावे शब्दार्थमये निर्विभागे शब्दतत्त्वमिति यज्ञीतं तदेव ना
दैर्वैहिः प्रकाशितं वाक्यमाङ्गराचार्या इत्सान्तं बुध्यन्त संहृतिरित्यभिदृष्टं व्याख्यातुमाह ॥ यदन्तः शब्दतत्त्वं तु नादैरेकं प्रकाशितं । तदाहुरपरे शब्दं तस्य
वाक्ये तथैकता ॥ वाक्यविचारे प्रक्रान्तेन सान्तरस्यैकस्यानिरंशत्वे वयमिति पाठ्यत इति तदेव समस्तवाक्यमप्रक्रिं तद्यतिरिक्तेनासम्येन वाक्येने
सर्थः ॥३०॥ न केवलं वाक्यं तथा । यावद्वाक्यार्थोऽप्यखंडः प्रतिभात्मकः पदार्थभागैरभिव्यज्यत इति प्रसंगादाह ॥ अर्थभागैस्तथा तेषामान्तरोऽर्थः प्र
काश्यते ॥ तेषामान्तरवाक्यवादिनामाचार्याणां मते आन्तर एव वाच्योऽपि वाक्यार्थ इति बोद्धव्यं ॥ ते च शब्दार्थाविभिन्नभावे कस्यान्तरस्य न त्वस्य संबंधि
नो वस्तुनः बहिःस्थितौ भेदाविव प्रतिभासेते इति बोध्यमित्याह ॥ एकस्यैवात्मनो भेदौ शब्दार्थावपृथक्स्थितौ ॥ न तु शब्दार्थौ वाच्यवाचकाविति

१० प्रसिद्धमतः कथं तयोर्भेद इत्याशङ्क्याह॥ ॥ प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता। अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा॥३२॥ तस्माद्धि शब्दतत्त्वस्या
10 नाद्यन्तस्यैतौ रूपस्य शक्तिभेदाद्यौ भेदप्रतिभासो नाविरुद्धः। एतच्चाद्यावुक्तमागमकाण्ड एकस्य सर्वबीजस्य सादित्वौ॥ इदमपि तस्य शक्तिभेदाद्वभास
नमिति प्रसङ्गादाह॥ ॥ तस्यैवात्मनस्तत्त्वसामर्थ्यसमवस्थितेः॥ अक्रमे क्रमनिर्भासे व्यवहारनिबन्धने॥३३॥ तस्य न देवैकं निर्विभागं परं तत्त्व
माश्रित्यायं सकललोकसंव्यवहारः शक्तिभेदात्प्रतीयते। किं पुनरयं वाच्यवाचकविभागमात्ररूपः इत्यवाणडपक्ष एव प्रक्र॥३३॥ इदानीं पदवादि
मतमाशंक्य पुनरपि दूषयितुमाह॥ संप्रसप्रमाणत्वात्पदार्थास्तित्वकल्पने। पदार्थाप्रसृज्येसागादानर्थकं प्रसज्यते॥ यदि पदार्थसंप्रत्ययः प्रमाणं
पदपदार्थसत्तायामुच्यते। तदा देवदत्तगामभ्याजशुक्लां दण्डेनेत्यस्मिन्वाक्ये एवं पूर्वपदार्थानामुत्तरेणान्यपदार्थाभ्युच्चयेऽर्थसागात्तेनदेपाद
नस्यानर्थकं प्रसज्यते॥ तत्रस्थानर्थकस्योच्चारणे वैफल्यादुच्चारितादुत्तस्माच्छब्दमात्रात्पदार्थप्रत्ययस्यानुपपत्तेः। किं निबन्धना वाक्यार्थप्रतीतिः
स्यादिति प्रसक्तेकिंचिदेतत्॥ तथा च पदानामव्यवस्थितेः पदवादोऽनुपपन्न एव लक्ष्यते इत्यभिधातुमाह॥ राजशब्देन राजार्थोभिन्नरूपेणागम्यते॥ राजा
राजानं राज्ञा राज्ञे राज्ञो राज्ञि राजन्नीत्येवमनियतस्वरूपेण राजपदेन राजार्थः प्रतीतिर्दृश्यते। यदि पदस्य सत्यता स्यात्तदा नियतेन तस्यार्थदृश्येत सर्वत्र
न च दृश्यतेऽतो मन्यामहे मिथ्यैव पदानीति॥ इतोपि नास्ति पदमित्याह॥ वृत्तावाख्यातसदृशे पदमन्यत्प्रयुज्यते॥ राजपुरुष इत्यस्यां वृत्तौ राज एम॰ १०

शब्दस्याख्यातसदृशः तत्र ह्यहेराजपुरुषेत्यत्र राजन्शब्दात्पुरुषेत्यर्थप्रतीतिः स्यात् न चैतदिष्टं तस्मात्सार्थिकानि पदानि न संसर्गे वा ॥१०॥ न केवलं केवलानीति
पतत्रूपासंभवस्तेषां यावद्वृत्तावपि स्थिता नामित्याह ॥ यथाश्वकर्णादिषु केचिद्विनैवावयवैर्न गम्यते । कश्चिदेव विशिष्टोऽर्थः सर्वेषु प्रत्ययलक्षणो ॥ अश्वकर्णादित्य
त्राश्वपदार्थेन विनैवज्ञातेनार्विशिष्टः कश्चिदर्थो गम्यते । तस्मात्सर्वेष्वपि पदेषु परमार्थविभागेष्वाक्याभिव्यंजकेषु सत्स्वेवं वाक्यावगतिः सर्वको वाका
र्थमतस्य पदस्य वर्णानुक्तौ नैतुरेवं सति योयं रूढ्युपलब्धिविभागः शब्दानामुच्यते सह्यर्थेत्याशंक्याह ॥ वाक्ये तद्यथान्तरगतेः साहस्थपरिकल्पने । केषांचिद्रूढिश
ब्दत्वं शास्त्र एवानुगम्यते ॥ तन्निवाक्ययोः साहस्थपरिकल्पने केषांचिच्छब्दानां वाक्ये विग्रहरूपे यौगिकत्वमतीतिः रूढिशब्दत्वमुच्यते । यथा तैलपायिके
ति । अत्र चैतैलं पिबतीति वाक्ये लायामर्थमाह भीवः । इत्यत्रवस्यायां तैलपायिकेति ज्ञाते न प्रयुक्तोऽर्थस्य कस्यचित्प्रतीतिः । न च तस्य तैलपानक्रि
यालक्ष्यत इति रूढिरूपता स्योच्यते केषांचित्तु तन्निवाक्ययोरर्थस्य साहश्यात् यौगिकत्वं । यथा राजपुरुष इति । परिकल्पनं इत्यनेन सर्वमेतदवयवविभा
गादिकं शास्त्रसमयएव कल्पनामात्रं । परमार्थतस्तु व्यवहारकाले निर्विभागमेवोपलभ्यत इति प्रतिपादयते । एतदेव शास्त्र एवानुगम्यत इत्यनेनव्यक्ती
कृतमर्थं कथमेतदुच्यत इत्याह ॥ ॥ उपादायापि ये हेयास्तानुपायान्प्रचक्षते । शास्त्रमुपायः शब्दपरिज्ञाने । तानेषु च नेषु प्रयोजनसंपूर्त्तेरनुपयोग इ
ति तस्य परित्यागः । उपायाश्च न नियता इत्याह ॥ उपायानां च नियमो नावश्यमवतिष्ठते । अयं कथंचित्स्तुतः कश्चित्तं प्रतिपद्यते ॥ कश्चिदाचार्यः

११ गृणाति॥ निविरचितेन लक्षणेनान्वाख्यानेन शब्दानधिगच्छति॥ कश्चिदन्येनेति नियमः॥ एतदेव स्पष्टीकर्तुमर्थे किंचिदित्यादिना॥ ३८ ॥ तस्मात्संसृष्टस्य विभक्त
॥ स्य वाक्यार्थविशेषस्य वाक्यमेकमनंशमेव मन्वानानि निबंधनमिति पदपदार्थप्रविभागकल्पनमसमञ्जसमेवेति प्रतिपादयितुमाह॥ संसृष्टा वा विभक्ता वा भेदा
वाक्यनिबंधनाः॥३९॥ अन्यत्वातिरेशः एव वाक्यं पदार्थसंसृष्टो वाक्यार्थोऽध्यासमनाश्च संबंधगर्भः एकस्मादपि वर्णान्प्रतीयत एवेत्यभिधातुमाह॥ सोऽयमित्यभिसंबं
धाद्रूपमेकीकृतं यदा॥ वाक्यार्थस्य तदेकोऽपि वर्णः प्रत्यायकः क्वचित्॥ सोऽयमित्यभिसंबंधाध्यासरूपो वाक्यार्थस्य वाक्येन सह पदाव्यक्तमेकमन्य
तो यदैकोऽपि वर्णो वाक्यार्थस्य वाचको भवत्येव॥ किंतु नरानेकमशेषविशेषाभिधानविवक्षयोदीरितं पदमिति॥ एवमध्यासवशाद्वाक्यवाक्यार्थयो
रभिन्नस्वरूपत्वाद्वाक्यार्थाभिव्यक्तो वाक्यमपि स्फोटात्मकमभिव्यक्तमेवेत्युक्तो वाक्यार्थस्य तदेकोपीत्यादि॥ इदानीं मृत्पिण्डादिनान्यापक्षसमा
श्रयणेन संघातपक्षस्य प्रदर्शनायाह॥ केवलेन पदेनार्थो यावानेवाभिधीयते॥ वाक्यस्थं तावतोऽर्थस्य तदाहुरभिधायकं॥ संबंधे सति यत्त्वन्यदाधि
क्यमुपजायते॥ वाक्यार्थमेव तं प्राहुरनेकपदसंश्रयं॥४१॥ केवलेपदे यस्यैवार्थस्य वाचकं वाक्यस्थमपि तमेवाभिदधातीति॥ ततः समुदाये पदानां परस्परान्व
ये पदार्थवशाद्यदाधिकं संसर्गः स वाक्यार्थः॥ उक्तं च पदत्राधिकं वाक्यार्थ इति॥ अनेकपदसंश्रयमित्यनेन संघातो वाक्यमिति दर्शितं॥ वाक्यार्थ
स्य चास्य जातिवत्प्रत्येकपरिसमाप्तिः॥ केषांचिन्मते सोऽप्यावयवसमुदायपरिसमाप्तिरिति पक्षद्वयं दर्शयितुमाह॥ सत्स्वनेकपदस्थोऽपि प्रतिभेदं समाप्य एम॰
११

तो। जातिवत्समुदायेपि संख्यावत्कल्प्यते ॥४४॥ पौः। अथात्र संघातपक्ष एवमकारान्तरेणान्विताभिधानप्रदर्शनात्पदार्थ एव वा कार्य इति पक्षमिनुमाह॥ सर्वभेदा
नुगुण्यं तु सामान्यमपरे विदुः। तदर्थांतरसंसर्गाद्भजते भेदरूपताम्॥ सर्वेषां भेदानामानुगुण्यं यस्मिन्न तत्तथाविधं सामान्यं संसर्गलक्षणमाकांक्षायोग्य
तासन्निधानवशेन पदार्थानां संसर्गान्वयित्वस्वरूपं वाक्यार्थः। तत्र चाकांक्षावशाद्योयमस्फुटरूपता वाक्यार्थस्य तामितरपदार्थसंनिधिर्निवारय
तीत्याह॥ भेदानाकांक्षतस्तस्य यापरिप्लवमानता। अवच्छिनत्ति संबंधस्तां विशेषनिवेशयन्॥ पूर्वं च पदानां वाक्येनावान्तरवाक्यार्थो यावान्नेव केव
लानां संसर्गस्तु संघातवाच्यः। इह तु तथाभूत एव सामान्यरूपः पदस्यार्थः यस्तत्तद्विशेषसन्निधानात्तद्विशेषविश्रान्त इति संघातपक्षे संसर्गो वा
क्यार्थ इत्युक्तं। स च पूर्वत्र जातिवत्संख्यावद्वा पदार्थव्यतिरेकेण वाक्यार्थत्वेन कल्पितः। इदानीं पदार्थव्यतिरेकेणासन्नेवैकोत्रानुमेयो न स
मुदायवाच्यः किं तर्हि सर्वभेदानुगुणसामान्यरूपो विशेषान्तरसन्निधानाद्विशेषविश्रान्तः पदार्थ एव वा वाक्यार्थ इति दर्शयितुमाह॥ कार्यानुमेयः
संबंधो रूपं तस्य न दृश्यते। असत्वभूतमसंतमतस्तं प्रतिजानते॥४७॥ कार्येण पदार्थानां विशेषविश्रान्तिलक्षणेनानुमीयत इति कार्यानुमेयः इद
न्तदिति तु रूपं तस्य न दृश्यते। अत एवासत्वभूतं पदार्थव्यतिरेकेणासत्वं नास्तित्वस्य तमेवंभूतमाचार्याः प्रतिजानते॥ एतदेव व्यक्तीकर्तुमाह॥
नियतं साधने साध्यं क्रिया नियतसाधना। स सन्निधानमात्रेण नियमः सन्प्रकाशते॥ साध्यं साधनं च परस्परं नियतमेव केवलमाकांक्षा

॥४८॥

१२ वशादिति। पदार्थसंनिधाने प्रतिनियमः सन्नेव प्रकाशत इत्याक्षिप्तपदानां गणिपदार्थानां वा वाक्यं पदार्थाश्च वाक्यार्थ इत्युच्यते इति। क्रमः संघातपक्षे यो व्याख्या

त्रपरस्य पक्षस्य योऽसमानायां विशेषमभिधातुमाह॥ गुणभावेन साकाङ्क्षं तत्र नाम प्रवर्तते। साध्यत्वेन निमित्तानि क्रियापदमपेक्षते॥ नामकारकप

दं क्रियायां गुणभूतं सत् पदान्तरमाकाङ्क्षति। क्रियापदं तु प्रधानभावेनावस्थितं कारकपदान्यपेक्षते इति। क्रमो वाक्यमित्युद्दिष्टे। क्रमपक्षं व्याख्यातु

माह॥ सन्त एव विशेषा ये पदार्थेषु व्यवस्थिताः। ते क्रमादनुगम्यन्ते न वाक्यमभिधायकं॥ पदार्थेषु देवदत्तादिपदवाच्येषु गोकर्मिकापाकप्रभृति क्रि

यायां देवदत्तपदार्थस्य कर्तृत्वं गोपदार्थस्य देवदत्तकर्तृकायां कर्मत्वमित्यादयो विशेषाः सन्त एव ये तेभ्यः क्रमेण प्रतीतेभ्योऽवगम्यन्त इति क्रम एव वाक्यं

५६ न वाक्यमभिधायकमित्यनेन क्रमव्यतिरेकेण शब्दात्मकेन वाक्यमभिधायकमसतीत्युच्यते। एतदेव स्फुटीकुर्वन्नाह॥ शब्दानां क्रममात्रे च नान्यः

शब्दोऽस्ति वाचकः॥५०॥ अनपेक्षितविशिष्टानुपूर्वीकः क्रमः क्रममात्रं तस्मिन्सत्यर्थप्रतीतेर्नान्यः स्फोटादिः शब्दो वाचकोऽभ्युप

गन्तुं युक्तः। अपितु क्रम एवोपलभ्यमानो वाचकः॥५१॥ अथ क्रम इति किमुच्यत इत्याह॥ क्रमो हि धर्मः कालस्य तेन वाक्यं न विद्यते॥ क्रमवत्सु पदार्थो

पाधिवशेनापि कालस्य धर्म उच्यते। उक्तं चैतत्। यत्क्रम एव वाक्यमित्याह॥ एवं समभिव्याहृतेनो भेदाः पदार्थैरविभाविताः। तेषां संनिधाने व्यञ्जनेन तु वर्ती

क्षपक्रमः॥५२॥ पदार्थेषु ये भेदाः पूर्वोक्ताः संसर्गे केवलेष्वविभाविताः सन्तः क्रमवत्पदार्थान्तरसंनिधानेऽभिव्यज्यन्त इति दर्शनात्क्रम एव वाक्यमिति पद एम० १२

५२

क्रमो वा कामुक्तो। वर्णक्रमस्य ननन्वर्थेत्युक्तो। ननु वर्णस्यैव पदक्रम इति। एतदेवोपसंहारेणास्फुटयितुमाह॥ वर्णानां च पदानां च क्रममात्रनिवेशिनी॥
पदाख्यावाक्यसंज्ञा च॥८०॥ वर्णक्रमः पदमुच्यते नाम। वाक्यसंज्ञा पदक्रम एव युक्ता न तथार्थप्रतीतिदर्शनात्॥ क्रम एव शब्दो न वर्णपदे इत्युक्त-
मुपसंहर्तुमाह॥ शब्दत्वं नेष्यते तयोः। नयोर्वर्णपदयोः शब्दत्वं श्रोत्रेन्द्रियग्राह्यत्वेपि वाचकत्वलक्षणं नेष्यते। अपि तु क्रमस्यैवोपद-
क्रमस्य शब्दत्वं वाक्यार्थेनार्थवत्तायामावाक्यार्थभागेषु पदानामर्थवत्त्वमा एवं वर्णक्रमस्यापि शब्दत्वं पदार्थेनार्थवत्तः तदर्थवत्त्वो
वर्णानां किं नोगीक्रियत इत्याह॥ समानेपि तु शब्दत्वे दृष्टः संप्रत्ययः पदात्ताम न तु वर्णात्त्वसौ नास्ति पदस्यार्थमतो विदुः॥८१॥ वर्णपदत्वस्व-
णस्योभयरूपस्याप्यशब्दत्वे समानेपि पदानां क्रमाद्वाक्यार्थस्यावगमो दृष्ट एवं नेन वर्णादिभ्यः। ततः पदान्येवार्थवन्ति। न तु क्रमस्यैव वाक्यो।
संसर्गो वाक्यार्थ इति॥८५॥ इदानीं संघातः क्रमस्त्वयेको नवयवश्च शब्दः स्फोटात्मेति व्याख्यातानि त्रीणि वाक्यलक्षणानि श्लोकत्रये
णोपसंहरति। न च संघातपक्षमुपसंहर्तुं तावदाह॥ यथासावयवा वर्णा विना वाच्येन केनचित्। अर्थवन्तः समुदिता वाक्यमप्येवमिष्य-
त्रै २ ते॥८५॥ वर्णानां समुदायार्थवत्त्वे केवलानामनर्थकत्वं यथा न तथा पदानां केवलानामर्थासंभवात्समुदायरूपं वाक्यमिति व्याख्यातं॥ क्रम-
पक्षमप्युपसंहर्तुमाह॥ अनर्थकानां पायत्वात्तदर्थेनार्थवत्तेति वा। क्रमेण ज्ञानानान्ताहुर्वाक्यार्थभिन्नलक्षणं। पदानि केवला- ८६

15

(15)

१३ नन्वर्थकानि किंषांचिन्मते स्वार्थे नार्थवन्ति। क्रमेणोच्चारितानि वाक्ये। तथाविधाद्वाकाङ्क्षाकार्थेभिन्नलक्षणे व्यतिरिक्तरूपं संसर्गात्मकं
13 ॥विशिष्टमेव वा संसर्गवशान्निराकाङ्क्षविशेषावस्थितं पदार्थस्वरूपमेव व्यतिरिक्तमभ्युपगम्यत इति॥ स्फोटपक्षमप्युपसंहरन्नाह॥॥ नि
त्येषु समुदायानां जातिर्व्यापी कल्पने। एकस्यैवार्थतामाहुर्वाक्यस्याव्यभिचारिणीं॥ इह देवदत्त गामभ्याज शुक्लां दण्डेनेत्यादिकानि भि
न्नवक्तृकदीरितानि पदसमुदायात्मकानि शब्दरूपाद्भिन्नान्येव। अयमर्थः। तत्र तत्र वक्तृभिन्नान्यपि तु न यदेकमेव स्फोटं व्यक्तिस्फोटा
त्मकं नित्यमभिव्यञ्जन्ति देवदत्त गामभ्याज इत्यादिकेषु भिन्नवक्तृदीरितेषु वा स्फोटजातिर्नित्या देवदत्तपदसमुदायाभिव्यङ्ग्या वाक्यार्थ
स्यैकस्य प्रतिभात्मकस्य प्रतिपादिकेति मतभेदाज्जातिव्यक्तिस्फोटयोः संहारः। नन्वेवं संघातादीनि चोरिणवाक्यलक्षणानि व्याख्या
तानि॥ आख्यातं वाक्यमिति व्याख्यास्यति एषां च मध्यादिति। सूत्रकाराभिप्रायमनुसृत्यावेडपक्ष एव वाक्यं वाक्यार्थयोरभ्युपग
म्यत इति प्रदर्शितं। इदानीं भाष्यकाराभिप्रायेणापि स एवाभ्युपगन्तव्य इत्युपक्रम्यते। तथा च भाष्ये। न लक्षणेन पदकारा अनुवर्त्याः
पदकारैर्नाम लक्षणमनुवर्त्यं। यथा लक्षणमप्रयुक्त इति। अत्र यदि पदानां सत्यता स्यात्तान्न दानेषां स्वत एव सिद्धत्वात्पदा
नि कुर्वन्तीति पदकारा इत्येतदसंगतं स्यात्। लक्षणेन च तदनुवर्त्तनं वक्तव्यं सत्यत्वात्तेषां पदकारैर्नाम लक्षणमनुवर्त्यमिति सप्रसंग एम०
१३

तमाऽनर्थ्यं प्रयुक्तपदविषये पदानां ससत्वात्तत्त्वविभागोऽयं न सिद्ध इति। यथालक्षणं लक्षणानुसारेण पदकरणमप्रयुक्तमिति न तदनुपपन्नमेव।
आह चैवं भाष्यकारः। न स्मान्मन्यामहे पदान्यसत्यानि एकमभिन्नस्वभावकं वाक्यं। तद्बुद्धबोधनाय पदविभागः कल्पित इति। तदेतदभिधातुमाह॥
अभेदपूर्वका भेदाः कल्पिता वाक्यवादिभिः॥०॥ यत एवं सत्यत्र कारस्य भाष्यकारस्य चाखण्डपक्षोऽभिरुचितः। तस्माद्वाक्यवादिभिः स्फोटवादिभिरभेदकल्प
नमाश्रितो काल्पनिकः पदवादोऽभ्युपगत इत्यर्थः॥०॥ पदवादिमतमपि प्रसंगात्प्रदर्शयति॥ भेदपूर्वान भेदांस्तु मन्यन्ते पददर्शिनः॥५१॥ भेदप्रतिभासपूर्वका
न भेदान् त्वाभिमतान्पददर्शिनः पदमेव सत्यं ये मन्यन्ते ते तेह्येकमखण्डं वाक्यं नाम काल्पनिकमाहुः॥५८॥ अथ यदि नैवं स्थितिः तत्कथं पदप्रकृतिः संहि
तेति प्रातिशाख्ये। अत्र चाह पदानि प्रकृतिर्यस्याः संहितायाः इत्यर्थो व्याख्यायते। पदानां चासत्त्वात्तत्कारणिका संहिताप्ययुक्ता स्यादित्यालो
च्याखण्डपक्षेणाप्येतत्संवादयितुमाह॥ पदप्रकृतिभावश्च वृत्तिभेदेन वर्ण्यते॥ वृत्तिभेदमेव प्रदर्शयितुमाह॥ पदानां संहिता योनिः संहिता वा
पदाश्रया॥५२॥ अखण्डपक्षे पदप्रकृतिः संहितेति षष्ठीसमासेन व्याख्यायत इत्यर्थः॥५३॥ इदानीं येनाभिप्रायेण भाष्ये न लक्षणेनेत्यादिकमुक्तं तम
भिव्यंक्तुमाह॥ पदाम्नायस्त्वयं यत्नः संहितायां निदर्शकः॥ नित्यसत्त्व कथं कार्यं पदं लक्षणदर्शनात्॥५४॥ यदि हि पदाम्नायः संहिताप्रदर्श
को नित्यः सत्यभूतोऽभ्युपगतस्तदा कथं लक्षणादर्शनात्सहं कार्यमिति तेन लक्षणेन पदकारा इत्यादिना भाष्यकारेण दर्शयेत्यं यत एव पदान्यसत्यानि

१४ तत्समतिभासते तेनानन एवमभिहितमिति भाष्यकारस्य पूर्वोऽपक्षोऽभिमत इति दर्शितं ॥६०॥ इदानीं पदवादिनं प्रति दूषणमाह ॥ प्रतिवर्णमसंवेद्यः पदार्थ

14 प्रत्ययो यथा। पदेष्वेवमसंवेद्यो वाक्यार्थः स्यान्निरूपणे। देवदत्तादौ पदे यथा नदकारादिवर्णे वर्णप्रति देवदत्तप्रत्ययो जायते। तथैव देवदत्तगामभ्याजे

त्यादि वाक्यार्थस्य देवदत्तादिपदे पदे प्रति नास्ति प्रत्ययोऽन्तु चेत्। एतावन्न नर्थकानेव वाक्यादेवार्थप्रतीतिर्दर्शनात् वाक्यमेवार्थवदिति। एतत् समुदितेष्वित्यर्थः ४

वन्यानि विधातुं पदवाद्याह॥ वाक्यार्थः संनिविशते पदेषु संहत्य निष्ठाय यथा तथैव वर्णेषु पदार्थः संहत्य निष्ठाः इह पदे वर्णाः अर्थवंतो वाक्ये पदानां

प्रतीति दृष्टत्वात्। केवलं यथा समुदितेषु पदेषु मन्त्रवाक्यार्थः संनिविशते स्वरूपं प्रतिलभते तथैव वर्णेष्वपि बुद्धौ संहत्य निष्ठेषु पदार्थ उपजायत इ

४ ति। नेतावता वर्णे दृष्टांतेन पदानामनर्थकत्वं एतद्देवदत्तदृष्टांतेन दर्शयितुमाह॥ सूक्ष्मं यातं पश्यन्नेन संसृष्टं संहत्य हेतौ। वर्णेष्वप्यनेन वर्णेन संबद्धो

वाचकस्तथा। ग्राह्यमपि सूक्ष्मं वल्लाजः प्रभृति पश्यन्नेन केनचित्सजातीयेन विलक्षणेन वा संसृष्टं संहत्य हेतौ एवमर्थवानपि वर्ण एकैकेन

संप्रत्यायकोऽन्येन संसृष्टस्तु वाचक एव। एतद्दुक्तं भवति। अर्थवंत एव वर्णाः प्रतिपत्त्रा तु पाटवविरहादेकैकेन न यथा गृह्यंत इति। नात्र तेषा

मपराधः। न चानर्थकमेव पदमिति वक्तुं युक्तं प्रत्यक्षविरोधादित्याह॥ ॥ पदस्योच्चारणादर्थो यथा कश्चिन्न लभ्यते॥६१॥ न हि किंचित्पदं केन

चिदर्थेनानिरूपितमिति युज्यते वक्तुमनुभवविरोधात्॥६०॥ यथा चैवं पदोच्चारणकाले तत्किंचिदर्थप्रतीतिरेवं तेनैवार्थेन संहता अप्यर्थ एम० १४

वेनेड़ इति प्रतिपादयितुमाह॥ वर्णानामपि सान्निध्यात्तथा सोऽर्थः प्रतीयते। केवलेसान्निध्यात्सहोच्चारणात्सावयर्थत्वेनोपनीयते तस्माद्घयासमुदिताः
परस्पराकांक्षावेशाद्धर्मी वाचकाः एवं पदान्यपि तु यथैवेति वर्णपदव्यक्तिः केनवा कोनाम नास्तीति तद्बुद्धौ। यावंतो यादृशाये च यदर्थप्रतिपादनेऽव
र्णाः प्रसन्नानसामर्थ्यालेनथैवावबोधकाः इति॥ यदि च पदार्थनिबंधनो वाक्यार्थावभासो नांगीक्रियेत तदा प्रतिनिधिकल्पनं पिकादिनियतपदम
स्तः श्रुतिवाक्ययोर्विरोधस्मृतिर्दुर्बलीयसी नवान्तरवाक्यानामर्थवत्त्वं वचनस्याल्लक्षणानुपपत्तिरित्येतिपंच चोद्यान्यापतंति। तानि क्रमेण प्रदर्शयि
तुमाह॥ प्राप्तस्य प्रसामर्थ्यान्नियमार्थापुनः स्मृतिः। तेनासंतं विशेषेण सामान्यं यदि बाध्यते॥ इह यजेतेत्याख्यातपदप्रतिपाद्यो यजनविधिर
पदिश्यते। तत्र क्रियाप्रधानमाख्यातमिति यजतिक्रियासाधननिर्वर्तनसमर्थो कारकमात्रस्याक्षेपिकः कदाचिद्द्विशिष्टस्यैवेति दृष्टयोगतिः। तत्र यस्य
व्रीहित्वस्य यजतिक्रियासामर्थ्यात्प्राप्तस्य व्रीहिभिर्यजेतेति पुनर्व्रीहिस्मृतिर्वचनं तीनियममवगमयति व्रीहिभिरेव न यवैरिति। ततश्च तेन द्र
व्यविशेषेणासंतं द्रव्यसामान्यमात्रं यदि बाध्यते॥ अतः किमित्याह॥ यजेतेति पदाद्व्याप्रासे सामर्थ्यलक्षणो व्रीहिस्मृत्या निवर्तितं तस्यान्यथानि
निविसत्वा यजेतेत्यनयाक्रियया निःसाधना क्रिया न भवतीति सामर्थ्याद्यदाक्षिप्तं द्रव्यमात्रं तद्व्रीहिभिर्यजेतेति पुनर्व्रीहिश्रुत्या बाधितं तस्
न्निवर्तितं तदभावे प्रतिनिधिर्न स्यात्॥ क्रियया द्रव्यमात्राक्षेपे व्रीहिलक्षणस्य द्रव्यस्याभावेन तत्सदृशं द्रव्यान्तरमेव नीवारादिकं समानीयतन्निर्व

व्रीहेरभावे २

१५ त्तेनेक्रियते। विशिष्टद्रव्याक्षेपे तु तथाकृतेनहु पादानं नियमायपर्यवस्यतीति कथं व्रीहिकारणकं यजनमन्यो निर्वर्त्तयेदिति प्रतिनिध्यभावः। तस्माद्द्रव्यमात्रा
15 क्षेपे प्रतिनिध्युपपत्तिः। तदेतदेव दर्शयितुमाह॥ तस्माद्व्रीहित्वमधिकं व्रीहिशब्दः प्रकल्पयन्। द्रव्यत्वमविरुद्धत्वान्नासत्त्यः सन्नबाधते॥ तस्माद्द्रव्य
मात्राक्षेपे व्रीहिशब्दो न सामर्थ्याद्व्रीहित्वमात्रमापणमप्रयोजनो व्रीहित्वमेवाधिकं कृत्वाभ्युपकल्पयन्न करोति कुर्वन्द्रव्यत्वं न बाधते। अविरुद्धत्वात्॥
सामान्यस्यविशेषेण सहाविरोधात्। अतश्च किमित्याह॥ तेन चापि व्यवच्छिन्ने द्रव्यत्वे सहचारिणि। असंभवाद्विशेषाणां तत्रान्येषामदर्शनात्
न च व्रीहिशब्देन व्यवच्छिन्ने कृताभ्युच्चयेऽपरेत्तोपचये द्रव्यत्वे सति। कीदृशे सहचारिणि। अविरुद्धे कार्यसमवेते। द्रव्यविशेषाणां तत्रान्येषां समस्ता
नामसंभवाददर्शनप्रमाणाक्षेपणं वा। तदेवोन्मीलयितुमाह॥ न च सामान्यवत्सर्वे क्रियाशब्देन लक्षिताः। विशेषा न हि सर्वेषां समस्तो शब्दोऽभिधायकः।७०॥
यजतिना हि क्रियाशब्देनात्र द्रव्यत्वसामान्यवत्सर्वे विशेषास्तद्गता न लक्षिता नाक्षिप्ता अपि तु द्रव्यत्वमेव। तदेव चाभ्युच्चयीकृतं व्रीहिशब्दे
न। सामान्यमात्राक्षेपः किमिति नांगीक्रियत इत्याशंक्याह॥ न हीत्यादि। न हि सकलसंनिहितविशेषाभिधायकः शब्दः परिदृष्टः। तथाऽप्रतीतेः।७०॥
एतदेव दृष्टान्तेन स्फुटीकर्त्तुमाह॥ शुक्लादयो गुणाः संतो यथा तत्राऽविवक्षिताः। तथाऽविवक्षा भेदानां द्रव्यत्वसहचारिणां॥ व्रीहिभिरित्यत्रय
थाशुक्लकृष्णादिगुणायोगो न विवक्षितः तथा च व्रीहिभिर्यजेतेति भेदानां द्रव्यविशेषाणां सामान्याविरोधिनामविवक्षैवेति। न तत्र स्थितमेत एम०
१५

त।यद्व्रयजतिक्रियाक्षिप्तद्रव्यमाचाप्युच्चयाभिधायकोव्रीहिशब्दोनद्रव्यविशेषवचनइतिनतच्छ्रवणात्क्रियाप्रतिनिधीयतेद्रव्यंतुप्रतिनिधीयत
इतिमुख्याभावेतत्सदृशनीवारादिद्रव्योपादानेनयागनिर्वृत्तिरितिप्रतिनिधिसमाश्रयणेनविध्यर्थानुष्ठानंसिध्यतीतिनतदवसादेनदेव
देवप्रतिनिधिप्रयोजनमाह॥॥ असंनिधौप्रतिनिधिर्नाभक्तिस्तस्यकर्मणः।काम्यस्यवाभवत्यस्यलोपइत्युपादिश्यतेमुख्यस्यासन्निधानेऽभा
वेमाभक्तिस्तस्यकर्मणोलोपइतिप्रतिनिधिरुपपद्यते।काम्यस्यवाभवत्यस्यतथैवलोपोमाभूदितिभवत्यस्यकाम्यस्यतेनैवनदाहायमु
ख्याभावेकाम्येभवत्यत्रैवनत्वापत्तिः।भवत्येवाकेनचित्हेतुनासंपत्तौसमुदायस्यप्रतीतेः।नचापिप्रतिनिध्युपादानेनतन्निर्वर्त्तनंविधेयं।
अन्यथाशिष्टविगर्हणलक्षणःप्रत्यवायः।एवंद्रव्यमाचाक्षेपपक्षेप्रतिनिधिमुपपाद्येदानींपदपदार्थानामनंगीकरणेऽखंडवादिनोद
षणमाह॥॥ विशिष्टैवक्रियायेनवाक्यार्थःपरिकल्प्यते।द्रव्याभावेप्रतिनिधौनस्यात्तस्याक्रियोपमा।येनाखंडवाक्यवादिनाव्रीहिकरणिका
यजतिक्रियानिरंशावाक्यार्थोव्रीहिभिर्यजेतेत्यत्रवाक्यार्थइत्युच्यतेतेनद्रव्यस्यव्रीहिलक्षणस्याभावेयदाप्रतिनिधिसमाश्रयणेनतन्नि
र्वर्त्तनंकार्यंतदाव्रीहिभिर्यजेतेतिव्रीहिकरणकयागलक्षणस्यवाक्यार्थस्यत्यागात्प्रतिनिधिनातन्निर्वर्त्तनेनीवारकरणिकायजति कर२
क्रियांन्यैवानुष्ठितास्यानाभवतीतिनक्रियाप्रतिनिधीयतेद्रव्यंतुप्रतिनिधीयतइतिन्यायस्योपेक्षणात्।अन्नोदितस्याकरणमेवस्यात्।अ

१६ यत्त्वया प्रतिनिधिर्नाश्रीयत इत्युच्यते। तन्न। माषाभूत्तिलस्येत्यादिनानदाश्रयणस्य समप्रयोजनत्वाद्वशणाश्रयणीयः प्रतिनिधिरिति पदपदार्थाना
मभावे वाक्यस्यावेंडरूपस्याप्युपगमे प्रतिनिधिर्भावु इति चोद्यं पिकादिनियतपदप्र श्नो नोपपद्यत इत्यसामभिधातुमाह॥ विज्ञातार्थपदं यच्च तदर्थे
प्रतिपादितो पिकादिपदविज्ञातेन किमित्यनुयुज्यते। न वनात्पिकश्च आनीयतामित्युक्ते वनादानीयतामिति पदद्वयविज्ञातार्थेन तदर्थे चावगते कः पि
क इति कस्यचिन्नागरिकस्य प्रश्नो नोपपद्यते किलावनादित्याद्यवेंडमेव निरस्तपदप्रविभागं वाक्यमनंशमेव वाचकं वैयाकरणस्य मतो। अतः
किं पिकपदार्थः पृथग्विज्ञातः कश्चिदस्ति तद्विज्ञातपिकपदार्थानुयोगो नोपपद्येत। अस्ति च तदर्थैकस्य चित्तं देह इति पृथगेवार्थवन्ति
पदानि विज्ञातानि वाक्यमित्येव वक्तुं युक्तमिति। इदानीं श्रुतिवाक्ययोर्विरोधे श्रुतेरेव बलीयस्त्वमिति न्यायेनस्यादिति प्रदर्शयितुमाह॥ सामर्थ्य
मापितं यच्च वाक्यार्थमनुपज्यते। श्रुतिर्वानुषंगेण बाधिका लिंगवाक्ययोः॥ इह श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यालक्षणाः संदिग्ध
वाक्यार्थविचारे वाक्यविदां प्रसिद्धाः। तेषां च परस्परविरोधे पूर्वः पूर्वो बलीयानिति व्यवस्थाप्यते। तत्र श्वेतं छागमालभेतेत्यत्रालंभनक्रिय
यायो द्रव्यस्य संबंधः स द्वितीयाश्रुत्या साक्षात्प्रतिपादितः। गुणस्य तु तस्यासामानाधिकरण्याद्वाक्यीयः। निर्गुणस्य हि द्रव्यस्याभावाद्गुणस्य
च निरधिकरणस्यासंभवाद्वाक्यीयश्चाश्रयाश्रयिणोः संबंधः। तदुच्यते। आश्रयाश्रयिणोर्वाक्यान्नियमस्त्ववतिष्ठत इति। यद्वा तु द्रव्य एम॰ १६

गुणयोर्द्वयोरप्यालंभनक्रियया साक्षात्संबंधः। यद्वक्ष्यति। क्रियया योऽभिसंबंधः स श्रुतिप्रापित इत्ययोरिति। ननु श्वेताभावेऽन्यगुणस्य छागस्यालंभन
मनुष्ठीयते। छागाभावे च श्वेतगुणयुक्तस्य मेषस्याप्यालंभनमिति प्रतिनिधिसमाश्रयणेन न श्रुतिबाधः। वक्ष्यति चात्र द्रव्यगुणाभावे प्रत्येकं
स्याद्विकल्पनं। श्रुतिशास्त्रो हि संबंधो बलवान्वाक्यलक्षणादिति। यदि च वाक्यीयः संबंधो बलवान्स्यात्तदान्यतराभावे नालंभनमनुष्ठीयेतेति वि
पर्ययः श्रुतिः। अतः श्रौतस्यैव संबंधस्य वाक्याद्बलीयस्त्वादन्यतराभावेऽपि श्रुतिप्रापितमालंभनमनुष्ठितमिति न कश्चिच्छ्रुतिबाधः। तदेतन्नू
निपादयितुमुक्तं। सामर्थ्यप्रापितमित्यादि। निर्गुणस्य द्रव्यस्याभावाच्छ्वेतगुणयुक्तस्यालंभनं क्रियासामर्थ्यप्रापितं श्रौतमेव व्यक्तार्थं स्फुटीकरणाय श्वे
तमालभेतेति श्वेतादिपदसंबंधस्तु ततः। किमित्याह। श्रुतिरित्यादि। तत्र श्रुत्या साक्षाद्द्रव्यगुणयोः श्रुत्यानुषंगोऽभिसंबंधः श्रुतिरेव तत्र लिंगवाक्ययोर्बाधि
केति न वाक्यीयसंबंधस्तत्र भवति। श्रौतवाक्ययोर्भेदमुपदर्शयितुमाह॥ अमात्सीयश्रुत्यादिसन्निधाने न गम्यते। स यत्नप्रापितो वाक्ये श्रुतिध
र्म्मविलक्षणः। छागमालभेतेत्यत्र द्रव्यस्यैव साक्षात्संबंधः शुक्लादिगुणस्य तु सन्निधानवशाद्वाक्यीयो यत्नप्रतिपाद्यः। स वाक्येयत्वादवगतः श्रुति
धर्म्मविलक्षणः साक्षात्संबंधविलक्षण इति यदुक्तं। इदानीं प्रकृते योजयितुमाह॥ अभिन्नमेव वाक्यं तु यद्यपि भिन्नार्थमिष्यते तत्संबंधश्रुतिभूतवान्न
श्रुतेरेव विरोधस्यान्ते तु। यद्यपि पुनरभिन्नमखंडमेव निरस्तपदविभागं वाक्यमभिन्नार्थं श्वेतगुणविशिष्टछागालंभनरूपकमेवानानार्थत्वं यस्य नत्त

(15)

१७ ष्याभक्तमभ्युपगम्यते। तदाकुत्रायं प्रविभागो यः ऽश्रौतो यं वाक्यीय इति। तत एव सर्वस्य श्रौतत्वात्केन कस्य बाध इति नष्टे न गुणाभावे छागालभनेन छागाभा
17 वे च श्चेनगुणायुक्तस्यान्यस्य स्यादिति। स्वेतं छागमालभेतेत्यत्रान्यतराभावे अप्यालभनानुपपत्तेर्विधेयस्य संकोच इति। अथ वांतरवाक्यार्थानुपपत्तिम
प्यत्रोपदर्शयितुमाह॥ वाक्यानां समुदायस्यैकार्थप्रसिद्धये। साकांक्षावयवत्वं वा कार्थ्योपि न विघ्यते। एकस्य समुदायार्थस्य प्रसिद्धये प्रतीतये योयम
वांतरवाक्यानां समुदायः साकांक्षावयवः साकांक्षा अवयवा यस्मिन्समुदाये स तथाभूतो भिजानामपि देवदत्तकर्मीरेष्ववन्यामङ्साघ्यात्मकोत्राव
यवार्थो वांतरवाक्यार्थात्मको न विघ्यते कश्चिन्नान तत्स्युगपत्सकलशास्त्रस्य ग्रहणं प्रतिपादनं वा ऽसंभवीति सकलव्यवहारोच्छेदः॥ किंचामीप
दार्थोपनिबंधना वाक्येषु न्यायाः सकलशास्त्रीयलौकिकव्यवहारनिबंधनभूताः पदपदार्थानंगीकरणेन प्रकल्पितः स्याद॥ ॥ प्रासंगिकमिदं
कार्यमिदं तं चेण लभ्यत इदमाह॥ त्रिभेदाभ्यामत्र बाधासमुच्चयौ॥ ओं होस्मिन्विषये न्यायः संबंधोस्य नतु बाध्यते। सामान्यस्यातिदेशो यं विशेषो त्रा
तिदिश्यते। अर्थित्वमत्र सामर्थ्यमस्मिन्नर्थेनुमिघ्नते। शास्त्रात्त्राप्ताधिकारो यं कुदासोस्य क्रियांतरे। इयं श्रुत्या क्रमप्राप्तिरियमुच्चारणादि
भिः। क्रमो यमत्र बलवान्नास्मिंस्तु न विवक्षितं। इदं प्रागैः संबद्धमंगनाम प्रयोजकं। प्रयोजकमिदं तेषामत्रेदं नांतरीयकं। इदं प्रधानं शेषो यं वि
नियोगक्रममत्त्वयं। साक्षादस्योपकारीदमिदमाराद्विशेषकं। शक्तिव्यापारभेदोस्मिन्फलमत्र तु भिघ्यते। संबंधाज्ज्ञानभेदो यं भेदस्तत्राविवक्षितः। ८५ १७

८४

एतैश्च निरूपितैर्वाक्यगोचरोऽर्थस्तायप्यावल्लक्ष्येनैव नियम्यत इत्येतानि मीमांसकैर्लक्षणानीत्युच्यन्ते। तत्र षड्भिर्द्वादशचतुर्विंशतिर्वैतानि लक्षणानि
तावद्विहमदर्श्यन्ते। एतेषां च वितत्य सौपपत्तिकं सन्निदर्शनं स्वरूपं पदकाण्डे लक्षणसमुद्देशे विनिर्दिष्टमिति ग्रन्थकृते व लघुत्वे प्रतिपादितो। आग
मध्वंशालेखकप्रमादादिना वा लक्षणसमुद्देशस्थपदकाण्डमध्येन प्रसिद्धः। तत्र तावत्तद्द्वादशलक्षणानि द्वादशस्वध्यायेषु सप्रपञ्चं प्रासंगिक
विचारसहितानि निर्णीतानि। तथा च तत्राद्यो ध्यायो धर्मजिज्ञासेत्युपक्रमात्को धर्मः किंलक्षणश्चेत्याद्याशंकानिरासार्थं चोदनालक्षणाद्य
स्त्वाम प्रथमेनाध्यायेन चोदनालक्षणो निर्णीते चोदनैव प्रमाणमित्युक्ते मतभेदेनापि विधिनियोगेत्यादिकाश्च प्रवृत्ताः सन्ता उपवर्णि
ताः। तत्रैव च स्थिताः मानान्तरं व्यवस्थापितं। तदनुरोधेन च प्रत्यक्षादीनामपि स्वत एव प्रामाण्यमुपपादितं। चोदना च शब्दादिर्वैचित्र्याद्भिन्न
रूपेति भेदप्रतिपादनाय प्रयाण एव द्वितीयोऽध्यायः। भिन्नस्य च शेषशेषिभावेन विनियोगप्रतिपादनाय तृतीयोऽध्यायः। विनियुक्तस्य प्रयोज
कामप्रयोजकभावप्रतिपादनाय चतुर्थः। प्रकृतस्य त्वारणादिभिः क्रमेण विनियोग इति तदर्थं पंचमः। एतत्समग्रं यदर्थमसावर्त्तिसमर्थः शा
स्त्रेणापि यद्दृष्टोऽधिकारीति तत्प्रतिपादनाय षष्ठः इतिवं विधिभेदशेषशेषिभावप्रयुक्तिक्रमाधिकारिणां प्रतिपादनायाध्यायाः षड्डिति २
षड्लक्षणानि। तत्र प्रकृतिषट्कमुपदेशषट्कमिति चोच्यते। तदनंतरं मतं केतिकर्त्तव्यता कमपि कर्मान्यतो विध्यंतमागमोऽतिमानान्यातिदे

॥ए२

शादितिप्रतिशादनायसप्तमः॥ कश्चित्सामर्थ्याद्विशेषाएवातिदिश्यंतइतिनिरूपणायाष्टमः॥ अतिदेशप्रसंगेनचैमऊतिदेवताविकृतियाग
देवतात्वेनविपरीणामयितव्येत्यादिसमर्थनायनवमः॥ सामान्यस्यविशेषेणबाधाभिधानायदशमः॥ येनसकृदनुष्ठानात्प्रयसिद्धिस्तत्तंत्रेणतदर्थ
मेकादशः॥ यदन्यदर्थमारब्धमन्यदप्येकेनैवप्रयत्नेनसंभवलाघवाभ्यांनिष्पाद्यतितत्प्रासंगिकोनद्वादशोध्यायइत्येवंनातिदेशषट्के
नसहद्वादशलक्षणानि। एतेनप्रतिपक्षभूतानान्यानिद्वादशयथायोगमेतेष्वेवाध्यायेषुदर्शितानि। तत्रप्रमाणस्यप्रतिपक्षासंभवः॥ नह्यप्र
माणंप्रमाणस्यानेनिपुणत्वाभिमतंसंपत्तिर्भवतिभेदस्यतुश्रुत्यादिभेदभिन्नस्यानन्तरभेदादभेदः प्रतिपक्षः॥ तत्रभेदस्यस्वरूपोनिर्दिष्टशक्तिक्रिया
पाभेदोस्मिन्नफलमवत्तुमिष्टं। संबंधाज्ञानभेदोयमितिभेदस्तत्वाविवक्षितइतितत्प्रतिपक्षः॥ तथाशेषशेषिभावस्यगुणप्रधानभावावि
वक्षाप्रतिपक्षः॥ सामनीयमानत्वादत्रनोक्ता। तत्रशेषशेषिभावस्येदंप्रधानंशेषोयमितिस्वरूपकथनं। विनियोगक्रमस्त्वयं। साक्षादस्योप
कारीदमिदमाणाद्विशेषकमित्यस्यैवेतिकर्तव्यतायाः प्रभेदस्यचातिदेशः॥ प्रयुक्तेरप्रयोजकः प्रतिपक्षः॥ तत्रेदंप्रसंगैः संबद्धमंगानामप्रयोज
कमित्यनेनैकफलतयाप्रयोजकाप्रयोजकप्रदर्शनंकृतं। प्रयोजकमिदंतेषामत्रेदंनांतरीयकमित्यनेनफलभेदेनप्रयोजकाप्रयोजकोप
न्यासः॥ तदेवंप्रयुक्तेर्द्विभेदाभ्यांसापवादायाःस्वरूपंनिर्दिष्टमनेनश्लोकेनेतिविशेषः। क्रमस्याविवक्षाप्रतिपक्षः॥ असंख्येयक्रमाक्रम ०

प्राप्तिरियमुच्चारणादिभिरिति स्वरूपं। क्रमोयमत्र बलवानस्मिंश्च न विवक्षित इति प्रतिपक्षः। अधिकारिणः स्वरूपापवादो शास्त्रात्मा स्वाधिकारोयं

प्रतिपक्षः॥ २ युदासो यस्य क्रियां न तरतीति कृतौ। सामान्यातिदेशविशेषातिदेशयोस्त्वपवादविरहितेन स्वरूपं निर्दिष्टं। सामान्यस्यातिदेशो यं विशेषो वातिदिश्यत इ

ति। ऊहस्य संबंधाबाधोपवादः। अस्मिन्होमिन्विषये न्याय इति स्वरूपं। संबंधोस्य न बाध्यत इत्यपवादः। तुल्यबलानामविरोधात्समुच्चयो बाध

स्यापवादः। तुल्यबलानां चरितार्थानां विरोधाद्विकल्पोपि बाधस्यापवादत्वेन दर्शितः। अत्र बाधासमुच्चयाविति बाधस्य स्वरूपमपवादश्चो

क्तः। तंत्रस्याप्यावृत्तिः प्रतिपक्षः। तत्स्य इदं तंत्रेणालभ्यत इति स्वरूपं। इदमावृत्तिभेदाभ्यामित्यनेन तंत्रस्यावृत्तिः प्रतिपक्ष उक्तः। एकमपत्व

निर्वर्त्यमपीच्छावशाद्भेदेन छन्नीतिं प्रासंगिकस्यापवादो भेदः। तत्र प्रासंगिकमिदं कार्यमिति प्रासंगिकस्वरूपनिर्देशः। आवृत्तिभेदाभ्यामित्य

स्माद्भेदः प्रासंगिकस्यापवादो योजनीयः। प्रपरस्परेषां चोदनैवमप्रमाणं प्र सिद्धांतयापी हटीकाकारो न्यायमात्रस्य प्रमाणत्वमंगीकरो

ति। अतः प्रकृतशास्त्रव्याख्योपयोगिन तस्यानेन न्यायजातं प्रमस्य प्रतिषेधो यमित्यादिना प्रदर्शयति। अत एव चोदनायामेव प्रमाणत्वं स्याभा

वान्यायप्रमेवलक्षणनिदर्शनेन कृतो। सामान्येन वा काथ धर्माणां प्रासंगिकादीनां सापवादानाम् च निर्देशः कृत इत्यभिप्रायः। एतदुक्तं भव

ति। पदपदार्थव्यवस्थापनाप्रस्तावे योयः कश्चित्तद्व्यवस्थापने न्यायः प्रभवति स सकीर्तनीयः। तदत्र चोदनायाः कीदृशं प्रायश्यं साधान्येवा।

तं च प्रसंगे तु प्रत्येकं नाविनितन्त्रः सर्वत्रैव पदपदार्थविधानमिति। समुच्चयो विकल्प आवृत्तिश्चेत्येवमादिभिः सह द्वाविंशतिर्लक्षणानि भवंति। द्वे ल
क्षणे समुद्देशात् द्वे। अथ यथा सामान्यातिदेशस्तद्भाव एवापवादः। विशेषातिदेशस्य सामान्यातिदेश एव विशेषान्तरातिदेशो वेत्यनयोः सम
तिपक्षत्वमाश्रित्य चतुर्विंशतिः संपद्यन्त इत्येवमनेन क्रमेणैतानि लक्षणानि। एतदेवमन्नमित्यत्र षड् द्वादश चतुर्विंशतिर्वा लक्षणानीत्युक्तो
ऽयमेषां निदर्शनार्थं लेशतः स्वरूपमभिहितानुदाहरणानि टीकाकारेण प्रदर्शितानि। तत्र द्वयोरर्थिनोः कार्येण संभवि नाम प्रयोजकत्वेन निर्दि
त सामर्थ्यपोर्थत्वात्तत्र प्रयुक्तेनार्थेनापरोऽभिसंबध्यमानः कृतार्थत्वात्पृथक्प्रयोजकत्वेनोपैति। स प्रसंगः। तत्प्रयोजनकं प्रासंगिकं त
द्यथा। संघातोध्ययनेन तत्र हि केचिदेवशिष्यमुद्दिश्य प्रवृत्तेऽध्यापने भेदेनाध्यापनोत्तरस्य प्रयोजने समर्थ्यतराध्येतारः सन्त्यपार्थित्वेऽप्य
गध्यापने संभवाल्लाघवाच्च न प्रवर्त्तयति। अपि त्वेकेनैव प्रवृत्तेन तदनुतिष्ठंति। वेदे यथा। अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशु
पुरोडाशमेकादशकपालं निर्वपति। अत्राग्नीषोमीयपश्वर्थः प्रयाजानुयाजविध्यंतः प्रसंगादग्नीषोमीयं पशुपुरोडाशमप्युपकरोति
॥ शब्दानुशासने पि यथा। सर्वादीनि सर्वनामानीत्यत्र गणलाभावं प्रासंगिकमुदाहरंति। न चाहि संज्ञासंज्ञिसंबंधविधानपरे वाक्ये रूपविशे
षमात्रादृक्तगणत्वाद्भयप्रसाधनत्वे विज्ञायते। शकोऽपि स्वस्वरूपस्य निर्दिश्यान्यगणत्वप्रतिषेधो वक्तुमिति एकेनैव प्रयत्नेनोभयप्रवृत्ति ०

नइति। अथ यत्तंत्रोपचारश्चिन्तः सर्वप्रयोजकाभेदेनाष्टत्वावायोर्थः प्रतिपत्तव्यस्तमर्थमेकमेवसंभवाल्लाघवात्स्वप्रयोजयेति। तन्त्रे चोत्तरयोः शा
स्त्रायामेकमप्रदीपं व्याकरणाध्यायिनः प्रयोजयंति। वेदे यथा प्रधानमन्वायेषडूयागा आग्नेयादयस्तदर्थं यैः प्रयाजादयः। ते पूर्वपक्षाद्दृष्टत्तनाः स
र्वेषां तंत्रेण साधारणेनोपकारकाभवंतीत्युच्यते। शास्त्रे यथा। भिन्नार्थयोस्तपरशब्दयोस्तपरस्तत्कालस्येतितंत्रेण उः सत्र उपादानं क्रियत
इति। एवं च नत्रनत्र लक्षणोपपत्तेत्रलक्षणं प्रभवसेवेति विशेयो। नत्वथासे व्यासंज्ञायां रूपविशेषानुरोधात्प्रदेशेषु तंत्रेणैवयुगपद्ग्रहणं यथा प्रतिपत्तिरि
ति। अथ यावृत्तिभेदयोस्तंत्रप्रसंगप्रतियोगिनोर्निदर्शनमुच्यते। आवृत्तौ तावत्तंत्रप्रतिपक्षभूतायां निदर्शनं। यथा एकं वस्त्रमाभरणं वा रणभूमि
षु भटानामुपयोगाय कल्पत इति। वेदे यथा सप्तदश सामिधेन्यो भवंतीति। अत्रैकशब्ददर्शने सामिधेनीषु सप्तदशत्वमावृत्तिसंख्यानात्प्र
कल्पेत। यदुच्यते त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाहेति। व्याकरणे यथा। संप्रसारणसंज्ञायां ज्ञापकपक्षानाश्रयणे नवरीवाक्यविषय यथा आ
वृत्त्या कृत्स्नस्याभिन्नप्रतीयमानोपस्कारप्रवृत्तिरवसायते। यथा चैकशब्ददर्शने एकानेकार्थग्रहणेषु वावृत्तिसंख्यानादिति परिहार उच्यते॥
भेदस्य तंत्रप्रतियोगिनो निदर्शनं। यथा भिन्नानि पात्राण्युपसहभुंजते भुजिक्रियायामभेदेनाधिकरणभावं प्रतिपद्यंते। वैदिकेपि विषये यथा ग्रहं
संमार्ष्टीत्यत्र यः संमार्गो ग्रहविषये चोदितः सभेदेनैव व्यवतिष्ठत इति। शास्त्रे यथा। नवेति विभाषेत्यस्मिन्नयोगे प्रत्याख्याते उभयत्र विभाषा

२०
20
णो क्वचिद्विधिमुखेन क्वचिन्निषेधमुखेन नं विभक्ता नो विभक्ता इत्निराशङ्कीयतदुक्तं। अपबाधानिदर्शनं क्रियते। अर्थित्वात्सामान्योपदेशाद्वा समि
द्धस्य निःसंभवेदृष्टादृष्टार्थ माघ्यानुमानमात्रेण प्रत्यक्षाबाधा। यथा र्थित्वान्मांसद्रव्ये मांसमासेत्तन भक्षणे। अभक्ष्यो ग्राम्यकुक्कुट इति ग्राम्यकुक्कुटभक्षणे क्षु
न्मजिघांसार्थमर्थित्वात्प्राप्तमनेन बाध्यते इति वैदिकमुदाहरणं। लौकिकं यथा। ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्यायेत्यत्र दधिदानेनौत्स
र्गिकं तक्रदानेन विशिष्टविषये बाध्यत इति। शास्त्रेयथा कर्मण्यणिता स्मानोनुपसर्गे क इति कप्रत्ययेन बाधेति। एषा च टीकाकृतास्वष्टेनौसमा
च तुल्यबलेषु संभवादिसादिना बहुप्रकारा दर्शिता। न चैव मन्त्रामकारणा मस्माभिस्तेनापि न तद् दर्शिता। यस्मादुक्तो सेयमपरिमाणा विकल्पाबाधाविस्त
रेण बाधा समुद्देशे समर्थयिष्यते इति। अथ समुच्चयः तुल्यबलानामविरोधिनां समुच्चयः। तद्यथा वेदे दन्तं भोजयलवणेन सर्पिषा शाकेनेति वेदेपि॥
ब्राह्मणेभ्यः पाद्यमाचमनं च दीयतामिति। शास्त्रेप्यविरोधात्फलभेदाद्वा प्रत्ययकृतत्कृत्समसंज्ञाः प्रत्ययतद्धितनद्यादिसंज्ञाश्चैकत्र समुच्चीयन्ते इ
ति। विकल्पोपि बाधमतियोगी। स च तुल्यप्रमाणविशिष्टानां विकल्पानां भवति। वेदे यथा। व्रीहिभिर्यजेत यवैर्यजेतेति। लोके दधि तक्रं कौण्डि
न्याय दीयतामित्येकफल दधितक्रदानचोदने। शास्त्रेपि एवं ल्युट्चाविसादि। विधिप्रतिषेधयोरपि तुल्यबलत्वे विरोधाद्विकल्पो भवेत्स वा। यथा वेदे
षोडशिनं गृह्णाति न गृह्णातीति। लौकिकेपि किंचिद्दस्मा दीयतां न दीयतामिति। शास्त्रेपि वाग्रहणानर्थके विधिनिषेधसामर्थ्याद्विभयोः एम०
२०

सिद्धत्वादिति। यथा प्रदर्शितं खट्वन्तौ टीकाकोराणां विधिप्रतिषेधयोः खल्वपि तुल्यबलत्वे विरोधाद्विप्रतिषेधमाह॥ नासिकादिभ्यो विभाषायाः
न्र२ सह नञा विद्यमानपूर्वेभ्यः प्रतिषेधो विप्रतिषेधेन। अयं विधिः सप्रतिषेधः विधिप्रतिषेधयोः प्राप्ययुक्तो विप्रतिषेधः। अयमपि विधिर्न्नसहनासि
वकापिसानां छन्दः प्रतिषेधविषय एवारभ्यते। समर्थेष्वबद्धन्त्यक्षणां संयोगोपधलक्षणां च बाधते एवं विद्यमान पूर्वलक्षणमपि तत्र पुर
स्तान्मध्येपवादा इति बाधकत्वे प्रतिषिद्धे विप्रतिषेधाद्बाधा व्यवस्थाप्यत इति। ऊहः खल्वपि प्रकृतौ समर्थानां विकारे सामर्थ्याभावात्प्रकृति
रूपलिंगवचनान्तरोपादानेन क्रियते। न यथा प्रकृतावग्नयेत्वाग्निशब्दः समर्थो गाराधीदृष्टः। तत्राविकारे सूर्यायेत्यूहः। इत्येवमादिना निमि
त्तभेदेन बहुभेदो भवत्यूह इति वैदिकमुदाहरणं लौकिकं यथा देवदत्तस्योच्चानिगृहाणि। आद्यावैधवेयइत्यत्र षष्ठ्यन्तमपोह्यानिमित्तवशान्यथ
मानं नऊह्यते। व्याकरणेपि ऊहविषयत्वमापन्नाः सर्वे विभक्तिविपरिणामाः। तेषु हि योगांतरे यथा विभक्त्या संबद्धो यः शब्द उपलब्धस्तत्संबंधस्यागे
नैव विभक्त्यंतरयोगं संप्रतिपद्यते। न यथा। उपदेशे ऽजनुनासिक इत्। इतो लोपः। अध्वादयो धातवः। धातोरनुदात्तेतोऽङित आत्मनेपदमिति। अ
योहप्रतिपक्षप्रत्तेः संबंधाबाधनमपि निदर्श्यते। यथा देवदत्तस्योच्चानिगृहाणीत्युक्ते नान्यस्मिन् ज्ञातस्येति। अत्र यद्विभक्त्यंत स्यैव प्रकृतिः। तथा
वाक्यांतरेष्वपि संबंध इति। न यथा वरीसुक्ष्मकं टकामथुराद्दक्षः। पंचालाजनपद इत्येवमादिषु संबंधाबाधनं भवतीत्याहुः। वैदेपियथा यजमानं

२१ दृंडे न दीक्षयति । अद्रिं दीक्षयति । मेखलया दीक्षयतीत्यत्र यजमानमित्यश्रावितमेव संबध्यते । शास्त्रेऽपि बहुगणवतुडति संख्येति प्रयोगे विधीयमानसंबं
21 धस्य स्वरूपपदार्थकस्य संख्याशब्दस्य भूतस्य योगो नोऽसंज्ञिविशेषणत्वे विज्ञायते । ष्णान्ता संख्या षट्संज्ञा भवतीति । अथातिदेशनिर्देशः क्रियते । अन्य
त्रान्यधर्मपरिभाषणमतिदेशः । तस्य च द्विप्रकारः सामान्यातिदेशो विशेषातिदेशश्चेति । सामान्यातिदेशो यथा । अन्यत्र रूढसंबंधधर्मानि नीतभेदेष्व
यैषु प्रसिद्धेरनुमेयभेदसंभवेः संबंधिभिर्व्यपदिश्यते । तत्र यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति स च यावान् धर्मो ब्राह्मणशब्देन व्यभिचरति
नावत्स्वर्थयानि संबद्धानि कार्याणि तान्यसंतमलब्धब्राह्मणव्यपदेशे क्षत्रिये निर्दिश्यन्ते । न यागुरुवद्गुरुपुत्रे वर्तितव्यमिति । वेदे यथा दर्श
पूर्णमासवदन्येष्वपि यागेषु प्रचरितव्यमिति । शास्त्रेऽपि स्थानिवदादेशोऽनल्विधाविति । अथ विशेषातिदेशः । लीनसामान्यकार्येषु ब्राह्मण निर्लीनदेशेषु सामान्ये ष्वपि यागेषु प्रचरित व्यमिति ६
दिषु पुनरतिदेशः सामर्थ्यादिविशिष्टप्रकृतिगतकार्यातिदेशः । ब्राह्मणवदस्मिन् ब्राह्मणे वर्तितव्यमिति । अत्र येन ब्राह्मणो ब्राह्मणवदेव वर्ते
तेनान्यस्य यमेवमतोऽतिदेशो विज्ञायते । येषां तु बुध्यसंभेदान् संगाह्वा व्यतिकरः तेषु नियम एव क्रियते । उक्तं च । सामान्यमात्रं शब्दार्थो वि
शेषाव्यभिचारिणः । सामर्थ्यमंतरेणातो विशेषो नातिदिश्यत इति । तत्र वेदे यथा । आग्नेयवत्सौर्य इत्यत्रैकदेवताकस्यैकदेवताकसंबंधेव
विधेर्नद्वैर्गिर्विधो नद्द इति कर्तव्यतो च्यते । शास्त्रेऽपि रूपातिदेशादिभिः षड्भिः प्रकारैर्विशेषातिदेशः परिहृश्यते । तत्र रूपातिदेशो यथा द्विर्वचने २१

वीतस्त्वहि घृतकल्पमेवादेशस्यातिदिश्यते। ननु श्यामाकादीनामेव बर्हिर्वचनं भवति। यथाऽऽस्यस्तुष्वक्रतुरिति। निमित्तातिदेशो यथा। एवंव
त्स नइति। अत्र पूर्वस्य यन्निमित्तं श्यामनेपदे ऋकारादित्वे तदेव समानं तस्यातिदिश्यत इति। तादात्म्यातिदेशो यथा। सुब्रह्मण्ये त्रैते परागवत्स्वर
इति। अत्र सुब्रह्मण्यामामन्त्रितस्य मत्वां सूरकवत्ता तादात्म्यमाघ्यतस्वरं लभत इति। शास्त्रातिदेशः कार्यातिदेशो वा यथा कर्मवत्कर्मणा तुल्य
क्रिय इति। अत्र हि शास्त्रातिदेशे यकः शपावाधनं स्यादिति यग्विधौ कर्मकर्तर्युपसंख्यानमारभ्यते। विप्रतिषेधाद्धि शपो बलीयस्त्वमि
ति। कार्यातिदेशे तु कर्मवत्कर्मणेत्यनेनैव यग्विधीयत इति यक एव परत्वान्नास्तुस्य शपाबाधेति नोपसंख्यानारंभः। व्यपदेशातिदे
शस्तु व्याकरणे नैव संभवति। संज्ञापक्षादविशेषाद्धलकारणं वैफल्यमसंगतं चेति। अथाधिकारस्य निदर्शनं। अर्थित्वं सामर्थ्यं शास्त्रा
पर्युदासयोगित्वमधिकारः। स विद्यते यस्यासावधिकारी। अर्थित्वमधिकारकारणं। परं हि पुरुषार्थमत्रापवर्गमाचक्षते। अस्मादप्य
र्थी भमायति कश्चिदिति तस्यैवार्थिले सामर्थ्यमधिकारकारणमंतुसत्त्वापां अपि ह्याभिनयनदृष्टक्षायामन्धो दर्शने नाधिक्रियते॥
अर्थिनः खल्वपि सामर्थ्याभावः केषुचित्कर्मसु शास्त्रेण पर्युदासात्। यथा शूद्रास्त्र्यां नाधिक्रियते। अदृष्टार्थविशेषे हि सामर्थ्यं
सामर्थ्यं शास्त्रादेव समधिगम्यते। तस्मात्प्रधानमधिकारकारणं शास्त्रोपदेशमाचक्षते। तत्र लोके यथा। अग्रममग्नित्वमत्र ग्रामे नग

रेवाधिकृत इति। तज्ज्ञानियुक्तो विदेय यथाग्निहोत्रं जुहुयात्स्वर्गकामो ब्राह्मण इत्यत्र ब्राह्मणस्यार्थित्वादिभिरधिकार इति। शास्त्रस्य तु शब्दार्थ
पुरुषधर्मेष्वधिकारः। तत्र षोढा शब्दः साधुरसाधुश्च। साधुरपि शास्त्रीयः प्रायोगिकश्च। शास्त्रीयोपि त्रेधा प्रतिपाद्यः प्रतिपादक उभयरूपश्च॥
तत्र प्रतिपाद्यो यथा दाधर्त्यादिर्निपात्यमानः। प्रतिपादको यथा प्रकृतिप्रत्ययादिः। तेन हि कुंभकारादिः प्रयोगस्थः प्रतिपाद्यते। उभय
रूपो यथा इत्यव्ययशब्दः। स हि तव्यशब्देन प्रतिपाद्यते। प्रयोगस्थं च सत्तव्यशब्दं प्रतिपादयति। प्रायोगिकश्च लौकिकवैदिकभेदेन
द्विधे सैवमसाधुना सह षोढा शब्दः। तेषु मध्ये प्रतिपाद्येषु व्याकरणशास्त्रस्याधिकारः। न प्रकृत्यादिषु। न हि ते व्याकरणेन व्युत्पाद्यन्त
इति। अर्थोप्यष्टादशधा। तत्र वस्तुमात्रमभिधेयश्च। अभिधेयोपि द्विधा। शास्त्रीयो लौकिकश्च। पुनरपि विशिष्टावग्रहसंप्रत्यय
हेतुस्तद्विपरीतश्चामुख्यः परिकल्पितरूपविपर्यासश्च व्यपदेश्योऽव्यपदेश्यश्च सत्त्वभावमापन्नोऽसत्त्वभूतश्चास्यापि लक्षणो
तृतीयमानस्य ३ विवक्षाप्रापितसंनिधानश्च। अभिधीयमानः प्रतिपाद्यमानश्च। अभिसंहितो नान्तरीयकश्चेति। तत्र वस्तुमात्रे बाह्यः पर्यायो वक्तुं
प्रतिपादयितुं न समीहितः। यस्तु समीहितोसावभिधेयः। तत्रैव शब्दस्याधिकारः। स च द्विधा शास्त्रीयलौकिकभेदेन। तत्र शास्त्रीय
आचार्योद्धारिकः। लौकिकस्तु खंडः। लौकिके चार्थे शब्दस्याधिकारो न शास्त्रीये। शास्त्रीयो हि पौरुषेयः परिकल्पितः। एवमतथा एम० २२

भ्नतोपिशब्दस्य साधुत्वस्य निमित्तभावेन प्रतिपादको विज्ञायते। अत उक्तस्य व्यभिचारो व्यभिचार एवं स्मार्त्तानाम्। स चानियमनावधित्वेनुद्धाप्रविभज्यते
आख्यातम्भिन्नः विशिष्टावग्रहसंमन्वयहेतुर्यथा। अकं संघातपतिता वलिवधयतीति। अत्र हि येनन यथामतोऽपि तु विशिष्टाकारेणैव सम्प्रत्ययेन गोचरीक्रि
तोऽप्यवहारविषयतामनुपततीति। नहि पुरोनेतो पोवाहिरेवनञ्चावचवस्थितः। यथा गोः शुक्ल इत्यादि। मुख्योऽयथा सास्नादिमान्गौरिति। परिकल्पितो निमित्त
वशेन रूपविपर्यासोऽयस्य सोऽपरिकल्पितनिमित्तरूपविपर्यासो गौर्णोऽर्थ उच्यते। यथा गौर्वाहीक इति। व्यपदेश्य आपोद्धारिक एव जातिर्द्रव्यं वेत्ये
वमुक्त इति। अव्यपदेश्यस्त्वखण्ड एव वा कार्यलक्षण इति। सत्त्वभावमापन्नो व्यपदेश्य एवापोद्धारिकसंसर्गः। असत्त्वभूतो वा कार्यलक्षण एवाउ
क्तिभेदादेवात्रमायशोभेदकथनोः स्थितलक्षणो यथा राजपुरुष इत्यत्र राजसंबंधित्वं पुरुषस्य न हि न व्यभिचरति। विवक्षाप्रापितसंनिधानो यथा रा
ज्ञः पुरुषस्येति। अत्र हि संबंधित्वं व्यभिचरति। विशेषणविशेष्ययोर्यथेष्टत्वात्। अभिधीयमानो यथा। राजसत्व इत्यत्र राज्ञः सत्वायमितस्याभिधीय
ते। तस्मिंस्तत्वमभिधीयमाने राज्ञा सत्वास्ये स्वयमर्थः प्रतीयमान एव। अभिसंहितो यथा। गोशब्दे जातिर्द्रव्यं वेति। नांतरीयको यथा। तत्रैवेदं वर्णसंस्थाना
दि। इत्येवमभिधेयभेदा उपदर्शनीयाः। पुरुषधर्मा वक्तृत्वप्रतिपत्तृत्वप्रभृतयः। तत्र वक्तृधर्मा आबाधः। असत्यासम्प्रतिको ऽपकुत्सनमतीनादय
श्चेति। प्रतिपत्तृधर्मास्तु कुत्स्यमानत्वप्रभृतय एवात्र शास्त्रस्य स्तुतौ द्विर्वचनादिविधायकत्वे नाधिकार इति। अत्र च य एवं धर्माः शब्दानां शास्त्रस

२३ 23 वाऽनधिकारविषयत्वेनोक्तत्वान्नेवाये क्ष्योच्यते। यदा सोमक्रियानारइति। अथ क्रमस्य निदर्शनं। इयं श्रुत्वा क्रमस्य माश्रियमुच्चारणादिभिरिति। श्रुत्यादि
भेदेनापेक्रमोनेकप्रकारः। तथा च श्रुतिक्रमोऽर्थक्रमः पाठक्रमः कोऽक्रमः। प्रवृत्तिक्रमः मतिपत्तिक्रमः प्रयोगक्रमः बुद्धिक्रमश्चेति। तत्र श्रुतिक्रमो यथा।
स्नात्वा व्रजतीति। अत्र स्नानस्ययेनेव श्रुत्या स्नात्वा क्रम उक्तः। वेदे यथा। हृदयस्याग्रेऽवद्यत्यथ जिह्वाया अथ वक्षस इत्यत्र श्रुत्यैवाग्रेऽथशब्दाभ्यां क्रम उक्तः। शास्त्रेपि च प
रस्मैपदानां णलतुसित्यादौ यथासंख्यमनुदेशः समानामिति श्रुत्यैव क्रमः। अर्थः सामर्थ्यं तन्निमित्तः क्रमोऽर्थक्रमो यथा। भुक्त्वा स्नात्वा व्रजतीत्यत्र स्ना
नादीनामन्यथा शब्दोपात्तानामप्यर्थस्वरूपपर्यालोचनया भोजनादिक्रमो लक्ष्यते। वेदे यथा। अग्निहोत्रं जुहोति यवागूं पचतीत्यत्र श्रपणोप
स्यादिनिर्दिष्टमपि पूर्वमनुष्ठीयते ततोऽग्निहोत्रमित्यर्थक्रमः। शास्त्रेपि गुणकर्मणि लादिविधिरित्युक्ते न याहि गां दोग्धि पयः इत्यत्र गवाकर्मणा पूर्व
दुहेर्योगस्ततः पयसः। न ह्यनुपादाय गां कश्चित्पय आदातुमर्हतीति। तस्मादत्र गोपयसोर्दुहिना यः क्रमेण संबंधः सोऽर्थसामर्थ्यादुपजायते। तस्मात्तत्स
पि प्रधाने पयसि दुहेर्गवैव पूर्वं संबंध इति तत्रैव लादयो नांगत्वात् दुग्धेनेगो दुग्धा सदोहा गौरिति। उच्चारणक्रम एव पाठक्रमो यथा। इंदुः खर्वाणामातंग
पुंस्कोकिलकलापिनः। वक्रकांतीक्षणगजित्वरकेशैस्तया जिताः। इत्यत्र यथा पठितानां यथापठितैरेव संबंध इति। वेदे यथा। समिधो यजति तनूनपा
तं यजति। इडो यजति बर्हिर्यजति स्वाहाकारं यजतीति एवमात्मकेषु प्रयाजेषु यथापाठमेव क्रमेणानुष्ठानं। शास्त्रे यथा। विप्रतिषेधे परं कार्यं पूर्वत्रासिद्ध सम० २३

मिति च। अत्र हि शास्त्रपाठमेवापेक्ष्येदं सर्वमिदं प्रमितिमित्यवस्थाप्यते। काण्डक्रमो यथा। येनैव क्रमेण ब्राह्मणक्षत्रियविशां वर्णाः समाचारमिति पादकानिमक
रणानुद्दिष्टानि तेनैवाभिधीयन्त इति। वेदेषु कुत्र विद्यास्ते कर्माणि येनैव काण्डिकाक्रमेण कर्माणि चोद्यन्ते तेनैव क्रमेण प्रवर्त्तन्ते। यथा याज्यानुवाक्यानामा
ग्नेयादीनां च। अत्र येनैव क्रमेण याज्यानुवाक्यानां संनिवेशः तेनैव क्रमेणाग्नेयादीनां संनिवेशात् काण्डक्रमेण संबन्धः। शास्त्रे यथा। द्विर्वचनकाण्ड
स्य समासारणकाण्डमिति। तदेव विप्रतिषेधसूत्रे पूर्वं भवतीति। प्रवृत्तिक्रमो यथा। येनैव क्रमेण ब्राह्मणाः समानाः प्रविशन्ति तेनैव क्रमेण यथास्वं चोदि
ते कार्यं प्रतिलभन्त इति। वेदे यथा। सप्तदश प्राजापत्यान् पशूनालभेत। तत्र सप्तदशानां प्रजानां प्रोक्षणविशसनपर्यग्निकरणानि क्रमेण चोदि
तानि। अनुष्ठानं पुनरिच्छावशात् प्रवर्तमानमप्यत एवारम्भप्रयोगेनानुष्ठानात् तेषां माघस्यानुष्ठानमारब्धं तेनैव प्रवृत्तिक्रमेण पुनरपरयोरप्यनु
ष्ठानं विधत्त इति सोऽयं प्रतिपत्तुरिच्छावशात् प्रवृत्तः क्रमः प्रवृत्तिक्रम इत्युच्यते। शास्त्रे यथा भाष्य उक्तं यथैवानुपूर्व्यार्थानां प्रादुर्भावः तथैव शब्दा
नामपि। यथा पद्मामहोत्स्य प्रथमो लिङ्गसंबन्धात् स्त्रीप्रत्यय उत्पद्यते तदनु कर्मसंख्यादिसंबन्धादेकवचनमुत्पद्यते। तथैव च प्रत्ययादेशादिकार्यं तेने
व क्रमेण प्रवर्त्तत इति। प्रतिपत्तिक्रमो यथा। लट्-लङ्-लङ्- लडुदाहरन्त्यत्र यद्यपि प्रयोगे पूर्वमडागम उच्चार्यते तथापि वयं विधिवाक्यार्थं प्रतिपद्यमा
ना लुङादीन् प्रतिपद्यामहे। पश्चादडागममिति शास्त्रीयमुदाहरणम्। लोके यथा। पुरुषोऽत्र स्त्यै केपुच्चारणक्रममतिक्रम्य राजार्थव्यवच्छेदेनैव पुरु

२५

२४ ष्वस्य प्रतिपत्तिः। वेदे यथा। प्रयाजयागाः पूर्वमुक्ताः। अप्यवान्तरयागनिर्वर्त्तनानुसारेणैव प्रतिपत्तिमुपारोहन्ति। यथा दीक्षणीयादीनां सोमस्य च। अत्र हि सोम
24 यागस्य प्रधानस्य पूर्वं बुद्ध्युपारोहेऽपि दीक्षणीयादियागनिर्वर्त्तनपूर्वकमेव सोमप्रतिपत्तिः। प्रयोगक्रमस्तु यथा। दुष्कृतिसादीयप्रयानुपूर्व्या अनुबन्धाः
प्रयुक्तास्तथैवेत्थं तालम्भनमिति। शास्त्रीयमुदाहरणं वेदे यथा। दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेत्यत्र दर्शपूर्णमासयागपूर्वकमन्यानुष्ठानं विज्ञेयम्। बुद्धि
क्रमो यथा। शास्त्रे वर्णानामिकोयणचीत्यादौ बुद्ध्या पौर्वापर्यकल्पितानां यथा चापौर्वापर्यमकालव्यपेतं संहितानां चेत्पूर्वपराभावादसंहितता। एकवर्णव
र्त्तित्वाद्धा च उच्चारितप्रध्वंसित्वाच्च वर्णानामित्याशंक्योक्ते भाष्यकारेण बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्त्ता धीरस्तन्वन्नीतिः। शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ
कुर्यात्पौर्वापर्यमिति। शास्त्रे बुद्धिक्रमः। लोके विद्युतः क्रमेण प्रहर्त्ता बुद्धौ संकलयति। वेदे प्रयाजादीनामुत्सन्नप्रध्वंसिनां बुद्ध्यैव संकलनमिति बोद्धृक्र
मः। सर्व एव वा बोद्धृक्रमो न वक्तृसमुत्थ इति। यदाहुः प्रतिपत्तिक्रमो न वक्तृसमुत्थ इति। अथ एषां क्रमाणां बलाबलचिन्तां करोति। क्रमोऽपमत्र ब
लवानिति। यथा वेदे प्रथमं भोजयितव्यस्ततोऽभ्यञ्जनमिति। अथ क्रमप्रतियोगिनं दर्शयितुमाह। अस्मिंस्तु न विवक्षित इति। क्रम इति प्रकृतं।
अविवक्षा क्रमस्य प्रतिपक्षः। तथा वेदेऽनुष्ठानक्रमाविवक्षानिमित्तवशा दृश्यते। लोके प्रतिपत्तृणामपि दृश्यते। शास्त्रेऽपि यथोक्तं वार्त्तिककृता॥
अतिप्रसंगो गुणवृद्धिप्रतिषेधे क्ङितीत्यादौ। अथ प्रयोजकाप्रयोजके निदर्शयति। इदं परांगैः संबद्धमंगानामप्रयोजकं। प्रयोजकमिदं तेषामत्रेदं नो २४

॥८२॥

नरीयकमिति। न चराज्ञाछत्रछायायाः प्रयोजकः हस्त्यादयस्तदाधाराः अप्रयोजका अपि छत्रछायया संबध्यमानाः प्रयोजका उच्यन्ते इति लोक
फलतया प्रयोजका प्रयोजकभावः। फलभेदे पूर्वमुदाहरणमिति लोके वेदशास्त्रयोः पूर्वं॥ अथ शेषिविशेषो दर्शयितुमाह। इदं प्रधानं शेषोय
मिति। विदेयघाव्रीही नवहेतीति ब्रीहयः शेषि अवघातः शेषस्तदर्थत्वात्। लोकशास्त्रयोः पूर्वमुदाहरणं। अस्यैव शेषिशेषभावस्येतिकर्त्तव्यतो
प्रदर्शयितुमाह। विनियोगक्रमत्वमिति। न देवगुणप्रधानभावस्य परिकरबंधसहितस्योपदर्शनेकृत्वा नत्वैकावान्तरभेदमाह। साक्षादस्योपकारि
दमिदमाराद्विशेषकमिति। न च लोके साक्षादुपकारकं यथा स्वान्नस्य लेकारादि। आरात्त्वदेवपुत्रदारादिषु। शास्त्रेपि साक्षादुपकारकं प्रत्यय
स्य प्रकृत्यादि। यत्तु प्रकृत्यादेर्विशेषणं तदारादुपकारकं यथा ऋजित्वादाश्विवर्त्तिनत्वादिधानोर्विशेषणं। कर्त्तृविशेषणं च पश्वादीति। वेदेप्य
वघातादिदर्शपूर्णमासयोः साक्षादंगं प्रयाजादिकं त्वारादुपकारकं॥ इत्येवं सप्रभेदं सपरिकरबंधं शेषशेषिभावमुपदर्श्य इदानीं भेदं प्रदर्शयितु
माह। शक्तिव्यापारभेदोस्मिन्निति। शक्तिव्यापारभेदाश्रयत्वेन बहुविधो भेदो लक्ष्यते। न च लोके वलाहकाद्विद्योतते। वलाहके विद्योतते व
लाहको विद्योतत इत्यत्र वलाहकस्यापादानाधिकरणकर्तृशक्तीनां भेदः॥ शास्त्रे चात्रैव विवक्षावशात् व्यापारभेदश्च इत्येवं शक्तिव्यापार
भेदः। शक्तिभेदमात्रेण तु व्यापारभेदः। यथा। धनुषा विध्यतीति। अत्र हि गर्भीकृतापादानशक्तिः करणशक्तिर्विधानार्थभेदेन व्याप्रियते।

२५ नत्वन्यथानाश्रितापादानशक्तेर्धनुषः कारणत्वं संभवति। अत एवात्र संज्ञयोर्विप्रतिषेधो वर्ण्यते। व्यापारभेदस्त्वमुख्यो न संभवति। शक्तिभेदमन्तरेण
25 व्यापारभेदस्यासंभवात्। अथ फलभेदेन भेदमाह। फलमत्र तु भिषन्त इति। यथैकस्य दानस्यायुरारोग्यैश्वर्यादिभिन्नानि फलानि। अन्ये त्वा
युष्प्रभृतिषु सत्त्वप्रीतिविशेषमेवैकं फलमाहुः। तथा वह्नीनां क्रियमाणमेकं फलं यथा व्यवहारदर्शने प्रजानामेको निर्णयः। यथा वक्ष्यति
भिन्नव्यापाररूपाणां व्यवहारादिदर्शने कर्तॄणां दर्शने भिन्नेप्येकार्थस्य साधकमिति। प्रकारान्तरेणापि भेदं दर्शयितुमाह। संबंधाज्ज्ञात
भेदोयमिति। यथाख्यातेषु धातूपात्तानामाः क्रियायाः प्रत्ययवाच्यकर्तृभेदे सति क्रियाया अपि भेदः प्रतीयते। पचतः पचंतीति। यथोक्तेसाध
नभेदान्निवृत्तफलाभावात् स्फुले भवसेवावबोधप्रवृत्त्या साधनेभ्यः प्रसिद्धोसाविति। इदानीमस्यैव प्रतिपक्षभूतमभेदं दर्शयितुमाह। भेदत्व
स्याविवक्षित इति। अत्र शक्त्यभेदो यथा। समानकर्तृकयोरित्यत्र पक्वौदनं भुंक्त इति कर्तृकर्मणोः क्रियाभेदेन प्राप्तः शक्तिभेदो वक्त्रा न विव
क्षितः। तथा च समस्यत्र समानकर्तृकत्वमुपपन्नं भवति। व्यापाराभेदः प्रागेव दर्शितो धनुषा विध्यतीत्यत्र। फलाभेदोपि पूर्वमुक्त एव। यथा दा
नस्यैका प्रीतिः फलमिति केचिदिति। संबंधाज्ज्ञातभेदत्वस्य प्रतिपक्षोऽप्यत्र न संबंधभेदाज्ज्ञातभेदत्वं। यथाऽऽस्यते देवदत्तेनेत्यत्र भावेल
काउस्त्रः साधनभेदानुपादानात् क्रियाभेदमपि गमयितुं न शक्नोति। देवदत्तेनेत्यस्यान्यतो निरिति चेदेकपदापेक्षयेन तु क्रमस्याभि गुण°
२५

रिस्तदोषः न तदेवं शक्यादिभेदेन बहुविधो यं भेद इति लक्ष्यः । स्वयमेवोन्नेयः । न यान्त्यप्रतिपक्षमतत्र तद्भेदोपि बहुविध एव विज्ञेयः । अनयोश्च भेदा
भेदयोः क्वचिद्ग्रामसबलं क्वचिद्विवक्षामात्रं शरणं त्वा विवक्षापि क्वचिल्लौकिकी । क्वचित्सायोश्री सेनदर्पयन्त्यातुसंस्तत्वामिति । विवेदेपि भेदव्यवहारो दृश्य
ते । यज्ञे नेदं हानिर्जुहोती त्यादौ गदान होम रूपादनुबंधभेदाद पूर्वस्य भेदः । अभेदोपि यथा सप्ता मप्याग्नेयादियागानामेकस्मिन्नेवापूर्वे समा
श्लेषे एकामिष्यन्त इति । एवं षड्द्वादशचतुर्विंशति स्वलक्षणानि प्राकृतानि वैकृतानि च समप्रतिपक्षाणि दर्शितानि । इदानीं षड्द्वादशचतुर्विंशति दू.४
व्यतिरिक्ता अप्यमी बहुप्रकारा न्यायाः पदार्थनिश्चयहेतवः संतीति सो दृष्टवादिनयाटीकाकारः प्रदर्शयितुमाह ॥ ॥ प्रसज्यप्रतिषेधो यं पर्युदासोऽ
यमत्र तु इदं गोत्वमिदं मृत्वं व्याप्येदं गुरुलघुर्दिं भेदेनांगांगिभावो सबहुभेदं विकल्प्यते । इदं नियम्यते स्तात्रयोऽपत्वमुपजायते । अस्य वा
क्यात इह दृष्टा लिंगाद्वेदोनुमीयते । अयं शब्दादयो हूसपदार्थः प्रविभज्यते इति वाक्येषु येषु धर्माः पदार्थोपनिबंधनाः । सर्वत्र न प्रकल्प्यन्ते दं
चेत्स्यादवाचकोऽनेत्र प्रसज्यप्रतिषेधोयमिति । यत्र क्रियापदेन नञः संबंधो वाक्यभेदश्च । शास्त्रे यथा । कर्तरि च कारक इति । वेदे यथा । ब्राह्म स्व ३
णो न हंतव्यः । नानृतं वदेदित्यादि । लोके यथा । असूर्यंपश्या राजदारा इति । पर्युदासोयमत्र त्विति । पर्युदासः खलु प्रसज्यप्रतिषेधविपरीतस्त
त्र हि तु व्याख्यातेन नैव नञः संबंधः एकवाक्यता चाउक्तेच । नामधात्वर्थयोगे नैव नञ्प्रतिषेधक इति । तत्र शास्त्रे यथा । आतोनुपसर्गे क इति ॥

२६ 26 वेदे यथा। अब्राह्मणः सोमविक्रयी तत्र जातिमात्रानुगमेन ब्राह्मणसदृशस्य कस्यचिदेव प्रतिपत्तिः। यथा च नोद्धृतमादित्समी क्षेनेत्सेवमादिस्मा
न्नैमुद्राहद्रणामद्रूरविप्रकर्षादत्र वैदिकमेव। लोके यथा। ब्राह्मणमानयेति। इदं गौणमिति। शास्त्रे यथा। तत्पुरुषः समानाधिकरणाइति।
अत्रावयवानां समानाधिकरणत्वात्तत्पुरुषस्यापि समानाधिकरणत्वं। वेदे यथा। आदित्योयूपः यजमानः प्रस्तर इति। अत्र गुणाद्याकचक्रादेरूपा
दिरूपादित्यादिरित्युच्यते। लोके च सिंहो माणवकः गंगायां घोष इत्यादि इदं मुख्यमिति। अत्र शास्त्रे यथा। धातोः प्रातिपदिकादित्यादावभिधेयस्य मु
ख्यत्वं। वेदे यथा। यजमानो भूर्भुवस्स्वरन्वालभत इत्यत्राध्वर्युर्यजमानो मुख्य एव। लोके यथा अग्नौ माणवक इति। व्यापीदमिति। शास्त्रे यथा। एकस्मा
त्तिदूरात्संबुद्धाविति। अत्र हि लौकिकाः संबुद्धेर्ग्रहणं व्यापित्वात् न तद्ग्रहणे हि शास्त्रीयापि संबुद्धिः परिगृहीता भवति। वक्ष्यति चाविषये कृत्रिम
स्यापि लौकिकः क्वचिद्ग्रहणं। व्याप्नोति ह्रस्वसंबुद्धौ न या च ग्रहणं द्वयोरिति। यावन्तो वाभयानुग्रहस्तत्र सर्वमनुगतमव्यापित्वेनेति। वेदे पि स
न३ र्वे प्रधानयागविषयाः ज्योतिष्टोमेनेत्याद्यधिकारविषयः। लोके पि यथा कयाचिदिति कर्तव्यतया संनिहितत्वं मार्गे सिंधुस्नानं। यदुच्यते। उपोष्य र
जनीमेकां संनिहितस्तां नरोत्तमः। सोऽर्थं तमसि गंगायां चाद्रे चापि विमुच्यत इति। अत्र सकृदेव स्नानाच्चैत्रलोकात्सर्वं तीर्थस्नानमि
तिव्याप्युदाहरणं प्रसंगादुक्तम्। गुरुलघ्विदमिति। तत्र शास्त्रे यथा। पृषोदरादीनि यथोपदिष्टमिति। शिष्टप्रसिद्धसाधुशब्दोपप्रतिपादनेन लघुरूपा
२६

यः। स एव तु प्रातिपदिकार्थ इति मिहितकर्मादिगतैकत्वादौ बाधाद्यर्थ इत्यादिना उक्तः। लोकेऽपि लोहितशालिमानयं ग्राम इत्यादिवचनव्यक्तिषु कर्मधारय
मत्वर्थीययोरेकत्र क्रियमाणयोः गुरुमक्रममुपजायते लघुत्वे तु मक्रमस्य बहुव्रीहित्वे चेति। वेदे गुरुलाघवव्यवहारस्तेत्रप्रसंगात्त्रिवृतान्त्याह
नौ गुरुः क्रमो यथा त्रिः प्रथमामन्वाह त्रिरुत्तमामिति। तेत्रप्रसंगयोः कल्लाघवव्यवहारो यथा निदर्शितं प्रागिति। भेदेनाङ्गाङ्गिभावो यथेति
।स्त्र५ यथा शास्त्रे संयुक्तविधाने प्रतस्यापत्यकर्त्रीत्यादि इत्यादि। वेदे यथा एकस्मै वावयवः सम्बध्यमानो व्यवहितेनापि वाक्यान्तरैः संबंधमुपयाति
यथा स्विष्टकृदेणेत्यादि स्विष्टकृत्त्वादिभिरिति। एवमेकैकस्मै वाङ्गाङ्गिभाव इत्यानेहे बहूनामंगिनां यथा प्रदर्शितमेकमङ्गमिति पुनरस्योपादानं
लोकेऽपि मणिः शाणोल्लीढः शरदि सरिद्दाश्यानपुलिना कलाशेषश्चन्द्रः सुरतमृदिता बालललना मदक्षीणो नागः समरविजयी हेति
प का ४ निहतस्तनिम्नाशोभन्ते गलितविभवाश्चार्थिषु नराः इत्यादि दीर्घलंकारेष्वेकस्या एव क्रियाया बहुभिर्वाक्यैः संबन्ध इति। बहुभेदे विकल्पत इति॥
तत्र शास्त्रे यथा। क्वचिन्नाशविकल्पः क्वचिद्व्याप्तविकल्पः क्वचिदुभयविकल्पः। वेदे यथा॥ यत्किंचित्प्रागग्नीषोमीयात्तत्सर्वमुपांशुकर्त
व्यमित्यत्रोपांशुत्वे माप्ते दीक्षणीयायां यथेष्टमुच्चैः स्वरविधानमित्यादि। लोकेऽपि यथा। किं नारुणायतनेशरियमित्याद्यो महाकविभिरुत्प्रेक्षिताविक
कल्पाः। इदं नियम्यत इति। शास्त्रे यथा। पतिः समास एवेत्याख्यातोरित्यादि। वेदे यथा न स्त्रेहेद्यावाचं विसृजेदिति। अत्र नियत एवका

पा ४

27

२७
27

ले वाग्विसर्जनं नियम्यते । लोकेऽपि यथा । पार्थ एव धनुर्धर इत्यत्र यथानुक्तत्वं पार्थो नियम्यते । अस्मात्प्रयोगत्वमुपजायत इति । यथा शास्त्रे । उः स्थाने ऽणः

प्रसज्यमान एव रपरत्वं प्रतियोगत्वमुपजायत इति । यथा वा पदस्यैकस्मिन्नुदात्ते स्वरिते वा क्रियमाणे वर्ज्यमाने शेषस्य निघाते योगत्वमुपजायते ।

वेदे यथा । ज्योतिष्टोमेन यजेतेत्यत्र त्रैवर्णिकस्यैव प्रयोगत्वं लोके यथा चानो धुरि धुर्यो नियुज्यत इति । योयः कश्चिदर्थी समर्थः शास्त्रेणापर्युदस्तः

स प्रयोगपद इत्युच्यते । अस्य वाक्यान्तरे हस्वालिङ्गाद्देः प्रतीयत इति । शास्त्रे यथा । ओः पुयण्ज्यपरे इति वचनात्स्तो हतेः स्थानिवद्भवतीति । वेदे यथा । अ-

क्ताः शर्करा उपदधातीत्यत्र केनाक्ता इत्याकांक्षायां तेजो वै घृतमिति घृतस्तुतेर्वाक्यान्तरात्लिङ्गात घृतेनाक्ता इति विशेषः प्रतीयते । लोके यथा ॥

रामो सोमुवने ध्विन्यारोदाशरथिः परशुरामो वेति संशये वाक्यान्तरगतादेकवाणाहतसप्तसालीभूतविशालतालविवरोद्गीर्णः स्वरैः समसिश्चिति लिङ्गाद्दा

शरथिप्रतिपत्तिर्भवति । अयं च द्वादशपोडशपदार्थः प्रविभज्यत इति । शास्त्रे यथा । षष्ठशशीवेयास्त इत्यस्माद्धेयासशब्दाद्द्विपोडशस्य विभ्यान्तभावो वैयात्यं द्र

ति विभज्यते । वेदे यथा । वायव्यं श्वेतमालभेतेत्यस्माद्वाक्याद्वायव्यपदार्थादपोहः स वायुर्वै क्षेपिष्ठा देवतेति प्रविभज्यते । लोके परांज्ञपुरुषदृत्यकस

रास्त्रः स्पष्टक्रमेति प्रश्नोत्तरयोराज पदार्थप्रविभागः । इदानीमक्रमे चोद्यमुपसंहर्तुमाह ॥ इति वाक्येषु ये धर्माः पदार्थोपनिबन्धनाः । सर्वे ते नप्रकल्ले

रन्यदं चेत्स्यादवाचकमिति । अनेन वाक्येष्वपगम्यमानेन वाक्येषु पदसमुदायरूपेषु सत्सु पदार्थोपनिबन्धनेषु ये धर्मा वाक्यार्थानुग्राहिणः पदार्थ स्व २७

विशेषसंप्रत्ययप्रतिबद्धात्तेसर्वेऽप्यविद्यमानोद्देशमविभागेनप्रतिष्ठांलभेरन्यदिसत्संपदंवाचकंतस्मादिनिपदवादीमत्सवतिष्ठते॥८८॥ एवंपदवादि
नःखंडवाक्यवादिनोदूषणमाहानेसमापितेद्दानीमेतत्समाधातुमखंडवाक्यवाद्याह॥ ॥ अविभक्तेऽपिवाक्यार्थेशक्तिभेदादपो[illegible]ते।वाक्या कृ२
न्तरविभागेनयथोक्तेनविरुध्यते॥ एतत्सर्वंयथोक्तमस्मत्पक्षेनविरुध्यतेतथाचास्मत्पक्षे अविभक्तेनिर्विभागेवाक्यार्थेएकस्मिन्नपितस्मिन्ना
नकरसादिवत्समास्त्रीयमाणेशक्तिभेदसमाश्रयणेनवापोद्धृतेकृतापोद्धारेसत्यवान्तरवाक्यार्थोपजननात्सर्वमेतन्निरध्यतीतितात्पर्यं।यथा
शाकदर्शनेनिर्विभागमेकमेवसकलत्रैलोक्यविलक्षणमेकत्वंस्वलक्षणमभ्युपगम्यते।तत्रादितरपदार्थव्यावृत्तिसमाश्रयणेनचजाता
दिव्यवहारःकाश्चिन्निर्वाह्यते।तथैवाखंडवाक्यवादिनाशक्तिभेदाद्धाकार्यप्रविभागेकृतेसर्वमुपपन्नमितिनकश्चिद्दोषः।वाक्यांतरविभागे
नाविभक्तेऽपिवाक्यार्थइतिचवाक्यवाक्यार्थयोरेकयोगक्षेमत्वादुक्तं।पदार्थासंभवपूर्वकेचोद्येवाक्यांतरविभागेनेत्युत्तरमसमीचीनमिव
लक्ष्यतइतिचेत्।बाध्यबाधकभावादिन्यायोवाक्येऽपिदृश्यते॥ततोमहावाक्यापेक्षयावांतरवाक्योपप्लवनेनतदपिनविरुध्यतइत्युपदर्शितोतद्दुप
दर्शनेनपरिमितपरिमाणोपिवाक्येपदार्थापोद्धारनिबंधनाअप्येतेन्यायाःसंभवंतीत्युपदर्शितमेवंभवति॥९०॥ एतदेवप्रसिद्धदृष्टांतोपदर्शनेनद्रढयितुमाह॥
॥यथैवैकस्यगंधस्यभेदेनपरिकल्पना।पुष्पादिषुतथावाक्येऽप्यर्थभेदोऽभिधीयते॥ स्रक्चंदनादावेकउपसंनिविष्टएवगंधस्तस्यत्वपोद्धारसमाश्रये

॥८१॥

२८ णाभेदः कल्पितैः पुष्पगंधीयवंदनगंधइत्यादि। तथावाकारवार्थापोद्धारसमाश्रयणेनपदार्थभेदउपपाद्यते। अयंदेवदत्तपदार्थोयंगोपदार्थइत्यादि। दृष्टा
28 न्तांतरमाह॥ ॥गवयेपनरासिंहेवाप्येकज्ञानाहृतेपथा। भागंज्ञासंतरस्यैवसदृशंप्रतिपद्यते॥ एकज्ञानेनाभिन्नेनैवाहृतेविषयीकृतेपरिछिन्नेगवयादौस
तिनदेकदेशंप्रसिद्धंज्ञातंतरस्यैवप्रतिपद्यते। एवमपोद्धारसमाश्रयणेनसर्वन्यायसमर्थनेकृतेतत्समानयोगक्षेमतयाप्रतिनिधिः स्फटिवाकाविरोधश्च
॥समर्थितएव। अग्रेत्वधांतरवाक्यानामर्थवत्त्वंसमर्थयिष्यते। अधुनातमेवापोद्धारमाश्रित्यपिकादिसंदेहेचोद्यमुद्भुतैः प्रस्तावनांकरोति॥ ॥अप्र
सिद्धंतुयद्भागमदृष्टमनुपश्यति। तावत्त्वंविदंनदृः सर्वंचप्रतिपद्यते॥ तच्चगवयादौभागमप्रसिद्धमदृष्टमानेश्चितमनुपश्यतिमूढः परमार्थेन
स्फटंविन्नस्यसर्वत्रनिर्विभागेतस्मिन्कुतश्चित्कारणान्मोहन्ना। सर्वत्रायममंसंविदंनावस्तुनः प्रतिपद्यतइति। प्रकृतेयोजयितुमाह॥ ॥तथापिका
दियोगेनवाकेत्वंतविलक्षणोसदृशस्यैवसंज्ञानमसतोर्थस्यमन्यते। वनास्तिकव्यानीयताभिसितहृनाहृस्वव्यानीयताभितेनस्माद्वाकांतर
दत्सनविलक्षणमेवावनाहानीयताभितिचात्रासन्नेवार्थोवनाहृस्वव्यानीयताभित्सस्यक्रमवशात्सदृशइतिमन्यते। परमार्थतस्फटिकादि
योगात्मकलमेवात्वंतविलक्षणमाह। कपदार्थसंदेहेसकलमेवाज्ञानेवाकामित्यच्यते। दृष्टान्तमाह॥ एकस्यभागेसादृश्यंभागभेदश्चलक्ष्यते॥
निर्भागस्यप्रकाशस्यानिर्भागेनैवचेतसा। यथैकमेवनीलपीतादिज्ञानंप्रकाशत्वभावंनिरंशमेवोपज्ञातंतस्यज्ञानत्वेनसादृश्यंमन्यते। नीलपी २८

त्पी य

नादिना च भेदः । वस्तुतः पुनरभिन्नमेव नीलज्ञानं पीतज्ञानादिति न त्वानुगमः कश्चित् । अयमेवाचित्रज्ञानयोरेव भागे सादृश्यं भागे भेदं प्रतिपद्यते ।
किंचिद्धि चित्रज्ञाने । नीलहरितो द्वेरिवं किंचिद्धि नीलपीतो द्वेवीति नीलादिना न सादृश्यं हरितादिना भेदं प्रतिपद्यत इति दर्शितं केयोजयितुमाह॥
तथैव भागे सादृश्यं भागे भेदो वसीयते । भागाभावे पि वाक्यानामसंतत्तभिन्नधर्मणां प्रतीत्यर्थः श्लोकः । इदानीमखंडवादी पदवादिनं दूषयितुमाह॥
रूपनाशे पदानां स्यात्कल्पं चावधिकल्पना । अग्रहीतावधौ शब्दे कथमर्थो विविच्यते । यदि पदान्येव सत्यानि तदा द्ध्यानुपेसादि संहितायां रूपविना
शात् सदस्यनियतस्याभावे कथमवधिं गृहीत्वा तदर्थो विविच्यते । अतः प्रविभागशून्यं वाक्यमेवैकं सत्यमभ्युपगन्तव्यं । अर्थखंडपक्षे श्वेतो धावतीत्ये
तन्मध्ये ह्यपि प्रकारान्तरेणायमेकं वाक्यं । अत्र हि श्वा इत्येतद्रूपं संहितावशाद्विनष्टमित्येतत्पदार्थप्रविभागः कथं तद्वगतिः । तत्राह । संसर्ग इव रू
पाणां शब्दे तत्र व्यवस्थितः । नानारूपेषु तद्रूपं तेषां परमिष्यते । श्वेत इत्यत्राहो शब्दे अन्तर्वाखंडपक्षे रूपाणां संसर्ग इव व्यवस्थितः । अत एवाखंडरू
मपरं तेषामवस्थितानां पुनर्नानारूपेषु प्रत्यायकमिष्यत इत्यादेशं तदेव व्याचिख्यासुराह॥ तस्मिन्नभेदे भेदानां संसर्ग इव वर्तते । रूपे रूपा
न्तरात्तस्मादनन्यस्य विभज्यते । तस्मिन्नभेदे एकस्मिन्नेव श्वेत इत्येवं रूपे भेदानां श्वा इतः श्वेत श्व इत्येतेषां संसर्ग इव स्थितः । तस्मात्तद्रूपं रूपान्तरादन
न्यदपि तत्त्वन्याय्यसमाश्रयेणोभयार्थप्रत्यायकतया प्रविभज्यत इत्यस्मिन्नपक्षे श्वेत इत्येतदखंडमेव प्रत्यायकं अश्वयाचैव प्रसंगान्न्येतायप्रमस्ता

यकयोर्विषयभेदेन भेदाभेदौ प्रस्नाविस्ताह ।।। शास्त्रे प्रत्यायकस्यापि क्वचिदेकत्वमाश्रितमात्प्रत्याय्येन क्वचिद्द्वैविध्यग्रहणयोः स्वतः ॥१००॥ तत्राभेदं प्रत्याय्य
प्रत्यायकयोः प्रदर्शयति ।। ऊदन्तभेदमाश्रित्य यथासंख्यम कल्पितं ऊकालोऽज्झ्रस्वदीर्घप्लुत इत्यत्रोक्तं ।। ह्रस्वादिषु समसंख्याऽप्रसिद्धिरुद्देशनिर्देशवैष
म्यात् असिद्धं तु समसंख्यत्वात् त्रयाणां हि विकारनिर्देश इति ।। तत्र ऊकाल इत्यत्र मात्रिकद्विमात्रत्रिमात्राणां संज्ञानिर्देशात्प्रत्याय्यप्रत्यायकयोरभेदे
समसंख्यत्वान्निर्देशसाम्ये संख्यातानुदेशसिद्धे ह्रस्वदीर्घप्लुतसंज्ञाः पृथगवतिष्ठंत इति न कश्चिद्दोषः ॥१०१॥ प्रत्याय्यप्रत्यायकयोर्भेदं निदर्शयितुमाह
।। लृलुटोर्ग्रहणे भेदो याज्ञाभ्यां परिकल्पितः ॥१०२॥ स्यतासी लृलुटोरित्यत्र लशब्देन लृङ्लृटौ प्रत्याय्येते । इति निमित्तनिमित्तिनोर्वैषम्यात्संख्यातानुदे
शाभावः प्राप्नोति । यथासंख्यमनुदेशः समानामित्यत्रोक्तं । संख्यासाम्यं शब्दतश्चेत् लादयः परस्मैपदानां । डारौरसः प्रथमस्यैव यवायाव
इत्यानिर्देशः । अर्थतश्चेत् लृलुटोर्न ग्रहणमिति सिंधुनद्य शिलादिषु दोष इति चोद्यमेवं पक्षद्वयमुपस्थितं । तत्रोच्यते । लृलुटोरित्यत्र लरूपम
नुबन्धसामान्यमात्रं प्रत्यायकमभिन्नमेव न पुनः प्रत्याय्यभेदाद्भिन्नमत्राभ्युपगम्यते । ततश्च निमित्तनिमित्तिनोः साम्यात्संख्यातानु
देशः संगच्छत इति न किंचिदनिष्टं ॥१०२॥ अथ प्रत्याय्यप्रत्यायकयोरन्यत्राप्यभेदं दर्शयितुमाह । यस्ते सेतदग्रणो रूपे संज्ञिनामभिधायकः । न हि प्र
तीयमानेन ग्रहणं स्यादिति संभवः ॥१०२॥ इद्धञ्च अस्य तद्यं । तस्य यस्य पदेन तस्य सदृष्टेकाराकारयो रूपमणः प्रत्यायकं तत्संज्ञिनामिव सर्वेषां वर्णानामभे २६

हात्वन्मायकंभवतितिनई काराऽऽकारयोरपि सोपश्लेषयोर्वैननेयहत्न ऋलोपः भवन्निनोयदि चात्र प्रसाध्यप्रसाधकयोरभेदो नाश्रीयते तदा प्रतीयमा
नेन प्रसाध्यमानेनान्येषां ग्रहणस्य प्रसाधनस्यासंभवदिति नाचेष्टं सिध्येत्। तस्मात्तत्रैणोच्चारितमेकमेवोभयोः प्रसाधकं संसृष्टरूपत्वादिति सत्ये
वस्थैवेतो धावतीसस्मात् उभयार्थप्रतीतिः। अवान्तरवाक्योपप्लावनेन तत्रोभयार्थप्रसाधकं भविष्यतीति दृष्टान्तेन प्रदर्शयितुमाह॥ ॥ऊदन्तेन द्विभि
न्नं च भिन्नवाक्यनिबंधनं। भेदेन ग्रहणं चास्य पररूपमिव द्वयोः। ऊकालह्रस्वेन तद्रूपान्तं। तदुक्तं दीर्घप्लुतानां त्रयाणां सामान्येनाभिन्नं रूपं बोद्
व्यं। तत ऐकेन देकं ग्रहणकवाक्यस्थानीयं अवान्तरवाक्यनिबंधनं भवतीसाहा भिन्नवाक्यनिबंधनमिति। ऊकालोऽज्झ्रस्वस्वः। ऊकालो दीर्घसंसः
।ऊकालः प्लुतसंज्ञो वोढव्य इति। अत एव ह्रासं संसृष्टत्वादस्याभेदेनैव ग्रहणं प्रसाधकेऽप्यनेनेदा। ऊदन्तेन द्विरूपं भिन्नवाक्यनिबंधनमेव भवति। यथा
पाररूपं संसृष्टत्वादेकमपि द्वयोः प्रसाधकं दृष्टं तेन तथैव ह्वोद्व्यं। तत एवेतो धावतीसादावर्वान्तरवाक्योपप्लावनेनोभयार्थता भविष्यतीतियोजनी
यमोः शब्दानां भेदपक्ष एव वार्त्तिककारस्याभिरुचितं इति निदर्शयितुमाह॥ ॥प्लुतस्यांगविवृद्धिं च समाहारमचोऽलयोः ऊदस्तत्पुनर्भेदः शब्दे प्रवर्तनमा
श्रितः। प्लुतावैच इदुतौ विस्पष्टोक्तं। अंगविवृद्धिर्नोपपद्यते। नह्यैचो वयवो कारइकारउकारो वेत्येव मंगविवृद्धिं वुदस्यतानावेव शब्दावेकत्र सं
मिलितावितियदुपदर्शितः भागभेदः सपरिहृतः। तथा चोः समाहारं ऊदस्यतामेदरएवेष्यतइति। यदाह समाहारो ह्यचोः श्चेन्नाभावादिति। तस्मात्

३०
30

श्वेतो धावती सा हौ सम हशयोर्भ लनमनुस्मृदर्वा नरवा कोपन्ना वनेन नं तन्त्र न्यायस माश्रयणेन वा समर्थनं तन्त्रन्याय इति । [104] अथ तं त्रमुपसंहर्तुमुपक्रमते ॥ ॥ अ
र्द्धचोदिषु शब्देषु रूपभेदः क्रमाद्यथा । तेचान्तेष्वेक शब्दत्वे भिन्नानां श्रुतिरन्यथा ॥ [105] यथाक्रममवशेन अर्द्धचो र्द्ध अर्द्धर्चा इति एकस्यैव शब्दस्य रूपभेदस्तथा ते च
न्यायात्स्य यो नेक शब्दत्वे भिन्नानां रूपाणामन्यथा श्रुतिः भिन्नाश्रुतिर्बोद्धव्येति तं त्रमुपसंहृतो [105] एतदेव स्फुटी कर्तुमाह ॥ ॥ संहिताविषये वर्णाः स्व
रूपेणाविकारिणः । शब्दान्तरत्वं यान्तीव शक्त्यन्तरपरिग्रहात् ॥ [106] एवं शब्दो नेकशक्तिवर्त्ति तया संहिताविषये प्रतिभासतइत्येकस्यैव श्वेत शब्दस्य संहित
यो च्चारणाच्छक्त्यन्तरपरिग्रहेणो भयार्थप्रत्यायकत्वमन्यते । [107] एकस्यापि निमित्तभेदाद्भेद उपजायत इति दृष्टान्तप्रदर्शनेनाह ॥ ॥ इन्द्रियादिविका
रेण हृष्टं ग्राहेषु वस्तुषु । आत्मन्तागाहते भिन्नं ग्रहणं सक्रमः स्मृतौ । यथा काचाद्युपहतचक्षुषामेकाकारमपि वस्तु नानारूपतया वभासते तथा
संहितावशादेकोपि शब्दो रूपान्तरेणावभासते । एतदेवोपसंहर्तुमाह ॥ ॥ अभिधानक्रियायोगाच्छेदेष्वविकृतेष्वपि । रूपमत्यन्तभेदेन तद्वैक
प्रकाशते । [108] अभिधानक्रियासंहितयोच्चारणमेव तयायोगात्स्वसंबंधादविकृतेष्वपि शब्देष्वेकमेव शब्दरूपं तत्परिग्रहादत्यन्तभेदेन प्रकाशते । अ
स्यैन्द्रेवागमविषये दृष्टान्तेनसंवादयितुमाह ॥ ॥ ऋचो वा गीतिमात्रं वा सामेत्यवान्तरं नतु । गीतिभेदाद्धि गृह्णन्ते नाएव विकृता ऋचः । ऋच एव त
योदीरिताः सामाख्यं यथा प्रतिलभन्ते । विशेषेणोदीरणमात्रं वा साम यथोच्यते गीतिषु सामाख्येति । ऋचो वा सामेत्येतत्सापयितुमाह ॥ ॥ गी ०
३०

तिभेदादिसादिनार्देवंभेदाभेदविवक्षाभिन्नेनप्रत्याय्यप्रत्यायकभावेनचान्यत्वंतंभेदरूपेणवासंहितविपर्ययेवसाहित्यंचोक्रमकारेणानंतरेणानन्यतिपक्षेणवांवांनरवाको
पक्षावन्नरूपेणाश्चैतोधावनीतत्रैकलेपिवाक्यस्यार्थभेदोभविष्यतीतिनास्मत्पक्षेपदानामनभ्युपगमेपिकाचित्क्षतिः ॥१०९॥ अथपुनरपितंत्रन्यायेनैनतत्स
मर्षयितुमाह ॥ उपायाःशुक्लितसंहाराभिन्नानामेकशेषिणाम् । तंत्रेणोच्चारणेतेषांशास्त्रेसाधुत्वनिष्पत्तेः ॥११०॥ उपायानांतंत्रलक्षणाद्भिन्नानामपिशब्दानामे
कस्यांश्रुतौसंहारः संश्लेषोगीर्णत्वंकीदृशानांभिन्नानामित्याह एकशेषिणामिति । एकशेषसाधर्म्यात्तंत्रेणोच्चारितानामप्येकशेषिणाम् उच्चारितेयथो
क्तंवार्त्तिककृताहलंतसमेकशेषनिर्देशाद्धिमितितेनैकशेषिणांतंत्रन्यायवत्तामितियावत् । उपायादित्वादेः पूर्वस्यश्लोकस्यस्फुटीकरणायोक्तंतंत्रेणोच्चारणाद्
सादित्तिस्मादेवंविधेविषयेभिन्नानामपिशब्दानांकिंचित्साहृश्यमुपादायतंत्रेणोच्चारणंकार्यमित्याह ॥ पीलम्बरूक्षतिचैकंरूपंभेदवतामपितंत्रेणो
च्चारणंकार्यमन्यथातेनसाधवः ॥१११॥ यद्यपिचसरूपाणांवाक्यानांशास्त्रेणसाक्षात्तंत्रेणप्रतिपादनंनकृतं । नाप्येकशेषस्यप्रतिपादनं । तथापिसमानन्यायत्वा
त्सर्वमपिशब्दानुशासनोपयोगीतिप्रतिपादितमनुक्रमेवैतत्सूत्रतद्दृतिप्रतिपादयितुमाह ॥ सरूपाणांचवाक्यानांशास्त्रेणप्रतिपादितं । तंत्रेणोच्चारणा
देकंरूपंसाधुप्रयुज्यते ॥११२॥ एतदेवदृष्टान्तदर्शनपूर्वकमुपसंहर्तुमाह ॥ एकस्यानेकरूपत्वंनालिकादिपरिग्रहात् । यथातथैवतन्त्रानस्यादृष्टानामेकरू
पता ॥११३॥ यथैकोपिध्वनिर्नालिकादिपरिग्रहोपधानवशान्नानाविधषड्जर्षभादिरूपभेदवानुपजायते । तथातंत्रसमाश्रयणेनप्यादृतः श्वेतइत्येवमात्म

३१
3/

कानां भिन्नानामपि शब्दानामेकरूपतास्त्विनर इत्येवंरूपेणेति न कश्चित्तत्र दोषः[११३]। इदानीं पदक्रमवांतरवाक्यानामर्थवत्त्वेन स्यादिति न्यायविधानमाह॥ ॥
यथा पदस्वरूपाणां वाक्यानां संभवः पृथक्कांतस्था वाक्यांतराभावे स्यादेषां पृथगर्थता[११४]। यथाः स्वं उपक्षेवाक्यानां पदस्वरूपाणामवांतरवाक्यानामपोद्धा
रबुद्ध्यासंभवमुपकल्प्यार्थस्तेषां महावाक्योपयोगी व्यवस्थाप्यते। यदि तथा न प्रकल्प्येत न तदा महावाक्यार्थसंप्रत्ययः स्यात्। तथा वाक्यांतराभावएषां
पृथगर्थता स्यात्। यावतापोद्धारसमाश्रयणेन वाक्यांतराण्युपकल्प्य पृथगर्थत्वमसत्यमप्येषामभ्युपगम्यत इति नास्त्यवांतरवाक्यानुपपत्तिचोद्यम्[११५]। इदा
नीं प्रयोजनं वाक्यार्थ इति पक्षं दूषयितुमाह॥ ॥ अभिधेयः पदस्यार्थो वाक्यस्यार्थः प्रयोजनं। यस्य तस्य न संबंधो वाक्यानामुपपद्यते[११५]। वाक्यस्यार्थो वा
क्यप्रयोजनमुच्यते। नत्वभिधेयः कस्मायमर्थः स्यादित्याह। अभिधेयः पदस्यार्थ इति पदानामर्थोऽभिधेय उच्यते। एतन्निराकरोति यस्य तस्येत्यादि। ए
वं वादिनः परस्परं वाक्यानां संबंधो न स्यात्। किंलायःशलाकाकल्पानां वाक्यानां किंकृतः संबंधो भवति। अभिधेयद्वारकः परस्परं संबंधः स्यात्। अभि
धेयं च वाक्यानां नास्तीत्यसंबंधानि वाक्यानि प्राप्नुवंतीति यत्किंचिदेतत्[११]। अथान्विताभिधानसमाश्रयणेनैतत्समर्थयितुमाह॥ ॥ तत्र क्रियापदान्येव व्य
पेक्षंते परस्परं। क्रियापदानुषक्तस्तु संबंधोऽतः प्रतीयते[११६]। क्रियापदमाक्षिप्तसमस्तसाधनजातं निराकाङ्क्षं संपद्यते। क्रियापदानुषक्तः परस्परसंबन्धो नि
राकाङ्क्षस्तस्मादुपपन्न इति न काचित्क्षतिः[११६]। ननु चान्विताभिधानं नयुक्तमिव प्रतिभाति। तथाहि। यदि प्रथममेव सकलविशेषयुक्तो वाक्यार्थोऽवगतः स्यात्। तन०
३१

तदुक्तं कालभाविनां गवादीनामभिधानेन न किंचित्प्रयोजनमुत्पश्यामः। अवगतार्थानां हि पदानां पुनर्वचनेनैव यथेमा पयु इत्याशंकां समर्थयितुमाह॥ ॥ आवृ
त्तिरनुवादो वा पदार्थव्यक्तिकल्पनोपमते केतु समासोर्थः सहभूतेषु वर्त्तते॥ अवगतार्थानामप्यावृत्तिर्नियमाय भविष्यति। उक्तस्य वार्थस्य स्फुटीकरणायानुवाद
स्तेषामसाविति नास्यानर्थकं। एवमपि पूर्वस्य सर्वस्यातिरोहितत्वात्सहत्वासंभवादन्वयस्यासंभवादर्थानवगम एव। एकस्मादेव च पदात्सकलविशेषावि
तस्य वाक्यार्थस्य प्रतीतेरुक्तेषां चानवगतार्थानां नियमानुवादपरिकल्पनायोगादसमंजसमेवाभिहिताभिधानपक्षः। यदा पुनः सहभूतेष्वेवासौ मते केसमा
सोर्थ इत्युच्यते। यथोक्तं। व्यक्तोपव्यंजनासिद्धिरर्थस्य प्रतिपत्तृषु इति। तदा नास्त्येव सहभूतानामुपादानेनैव फल्यमिति न कश्चिद्दोषः॥ तदेवं संघातादी
न्युद्दिष्टानि वाक्यलक्षणानि माहेशिकविचारसहितानि व्याख्यातानि। आख्यातं वाक्यमिति वाक्यव्याख्याप्रसंगेन च वाक्यार्थाश्रयेपि संसर्गसंसृष्टिनिराका
क्षपदार्थप्रयोजनलक्षणाश्चत्वार उपदर्शिताः। प्रतिभां क्रियां च दर्शयिष्यति। तत्रैकस्यैव वाक्यार्थस्य कथं विकल्पप्रपंच इत्याशंकां निरूपयितुमाह॥ अ
विकल्पेपि वाक्यार्थे विकल्पा भावनाश्रयाः॥१०॥ वाक्यार्थो विकल्प एव निर्विभाग एवाभ्युपगंतुं युक्तः। तस्मिंस्तु तथाभूतेपि येमी विकल्पास्ते पुरुषाणामनेक
शास्त्रभावनासमाश्रया बोद्धव्याः। न वस्त्वनुपातिन इति। तद्वाक्यार्थ एक एव युक्तः॥११॥ एतदेव प्रतिपादयितुमाह॥ ॥ अत्राधिकरणे वादाः पूर्वेषां बहुधाग
ताः॥ अस्मिन्नधिकरणे विचारस्थाने पूर्वेषामाचार्याणां प्रवादा बहुधागताः। शास्त्रसंस्कारवासितचेतसां तेषामिति कस्य पर्यनुयोगः क्रियते। प्रमार्थित

३२

32

ष्कवाक्यार्थ एक एव सर्वोऽपि शब्दः प्रतिभाया एव हेतुरिति तत्स्वरूपमिदानीं प्रख्यापयितुमाह ॥ अभ्यासात्प्रतिभाहेतुः शब्दः सर्वोऽपरैः स्मृतः । बालानां च ति
रश्चां च यथार्थप्रतिपादने ॥११८॥ अपरैराचार्यैः सर्वोऽयं कश्चिच्छब्दः स प्रतिभाहेतुः जडानामपि प्रतिभाहेतुरित्याह ॥ बालानामित्यादि । आस्तां विदितसमयस्य किं न
भविष्यति सोऽपि प्रतिभाहेतुः । येऽप्यविदितसंकेता अमी बाला जडप्राया वा तिर्यञ्चः तेषामप्यनादिवासनावशात् तदर्थः प्रतीयमानो दृश्यते शब्दः । तथा च जडा
नामपि प्राणिनां नियतपदः शब्दः संबोधनायोदीर्यते येन प्रतिनियतजातस्तु तांस्तांश्च नियमेनैव काचित्प्रतिभा प्रबोध्यत इति तन्मूल एव सर्वः कश्चित्ते
षां व्यवहारः । अनेनैतदुक्तं भवति यदियं प्रतिभा सर्वप्राणिसंवेद्या शब्दनिमित्ता सकलव्यवहारमूलभूता न पृथग्वर्णनीयानन्दपद्धवेत्ताम्नैव विप्रलभ्यते न
प्रतिभाभ्युपगमोऽवश्यमाश्रयणीयः ॥ अभ्यासात्प्रतिभाहेतुरित्युक्तं कोऽयमभ्यासः किमिदानीन्तनः उत जन्मान्तराभावी । तस्य च किं स्वरूपमित्याशङ्क्याह ॥ ॥ अनागम
श्च सोऽभ्यासः समयः कैश्चिदिष्यते ॥ स चाभ्यासोऽनागम इदानीन्तनो न भवति । न हि बालस्य तदेवोपदिष्टं केनचिदिति जन्मान्तराभ्यास एवाभ्यासः समय इष्यते । सं के
तस्वरूपो भाविष्यत इति ॥ स्वरूपमेवास्य स्फुटयितुमाह ॥ ॥ अनन्तरमिदं कार्यमस्मादित्युपदर्शकः ॥१२०॥ स चानन्तरमिदं कार्यमित्युपदर्शनस्वभावः । यथा कशाभिघा
तमात्रसमनन्तरमेव वाजिनोऽतिपातित्वं कुशाभिघातेन च गजा एवमन्येऽपि यथासंप्राणिनोऽनादिवासनाभ्यासवशेन प्रतिभातः समुचितव्यवहारं कुर्व
न्तो लोके यात्रां निर्वाहयन्तीति स्थितं । एवमखण्डमेव वाक्यं प्रतिभा च वाक्यार्थ इति समाश्रयणीयं पदपदार्थापोद्धारमात्रित्स प्रतिनिष्पादि कल्पनं प्रासंगिका

३२

दिमायन्निर्वाहस्य भविष्यतीति व्यवस्थापितं। १२० अथ पदार्थप्रविभागस्येत्समाश्रितत्वदुपन्यस्तं पदस्यार्थ इति प्रविभागमसंगत्य शब्दार्थविवेचनं मतभेदेन कर्तुमाह॥ ॥
आकृत्यर्थः सर्वशब्दानामिति प्रत्याख्यलक्षणं। अपूर्वदेवतास्वर्गैः सममाहुर्गवादिषु॥ १२१ सर्वशब्दानामपरामृष्टाकारविशेषमर्थमात्रं वाच्यमिति केचिदाहुः। एत
त्सर्वशब्दानां प्रत्याख्यलक्षणं प्रत्याख्यस्य वाच्यस्य लक्षणं बोद्धव्यं। केन तुल्यमेतत्स्यादित्याह। अपूर्वदेवतेत्यादि। अपूर्वदेवतादिपदेषु हि नाकारप्रथनं। य
थागवादिपदेषु आकारप्रथनं तेनान्तरीयकतया बोद्धव्यं। अन्यथा अपूर्वशब्दाद्देवताशब्दात्स्वर्गशब्दाच्च गवादिशब्दवदाकारादिप्रथनं स्यात्। यतश्च
तेभ्यो नास्त्याकारादिप्रथनं अतोऽर्थमात्रमेव तैः प्रत्याय्यत इत्युक्तं। अथ गवादिशब्देभ्य आकारादिप्रथने दृष्टं तत्कथं तदशक्यं यद्विशिष्टपदार्थप्रत्यायोयु
क्तेऽस्याशंकामाह॥ ॥ प्रयोगदर्शनाभ्यासादाकारावग्रहस्तु यः। न स शब्दस्य विषयः स हि यत्नान्तराश्रयः॥ १२२ सास्नादिमन्तं वस्तु यदा गोशब्दप्रयोगे पश्यति तद्दर्श
नाभ्यासाच्च तत्राकारपरिग्रहो यः स शब्दस्य प्रत्ययो न भवति। कस्मादित्याह। स हीत्यादि। तस्मान्न प्रयोगाभ्यासेन यत्नान्तरेण शब्दावगम्यमानः। केन समर्थने
न तस्य शब्दव्यापारो भवतीति शब्दस्यार्थमात्रमेवापरामृष्टाकारविशेषं वाच्यमुक्तमित्येकः पक्षः॥ इदानीं कश्चिच्छब्दवाच्यः कश्चिन्नेत्याकारो
नुनिष्पादीति पक्षान्तरमाह॥ ॥ केचिद्भेदाः प्रकाशन्ते शब्दैस्तदभिधायिभिः। अनुनिष्पादिनः कांश्चिच्छब्दार्थ इति मन्यते॥ केचिद्भेदा जात्यादयः शब्द ॥१२३॥ २
वाच्याः॥ केचित्तत्राप्रयोजकाः अनुनिष्पादिन एव। तथा तांश्च शब्दार्थ इत्यपरे मन्यन्ते। एतदेव प्रसाध्यमाह॥ ॥ जातिप्रत्यायके शब्दे पाव्यक्तिरनुषंगि

३३ 33.

णी। ननु तद्व्यक्तिगतानन्तभेदान्जातिशब्दोवलंबनो जातिशब्दाज्जातिमात्रं प्रत्याययति। व्यक्तिस्तु न तत्रानुषंगिणी निरधिकरणाया जातेरसंभवादिति कृत्वा न व्यक्ति-
गतानाकारविशेषान्जातिपदार्थपक्षे जातिशब्दो नावलंबते। एतदेव व्यक्तीकर्तुमाह॥ ॥ घटादीनां न चाकारान्प्रत्याययति वाचकः॥ वस्तुमात्रनिवेशित्वात्तद्
गतिर्नान्तरीयकी॥ घटादीनां प्रसिद्धानामाकारान्वाचकः शब्दो घटादिर्न प्रत्याययति। पृथुबुध्नोदराकारमात्रनिवेशित्वात्॥ न हि सकलविशेषसहितं प्रत्यर्थं श-
ब्दः प्रत्याययितुमलम्। मितिनत्राकारविशेषावगतिर्नान्तरीयकी वा तु निष्पादिन्येव बोद्धव्यौ नान्तरीयकत्वमेव प्रदर्शयितुमाह॥ ॥ क्रियाविनाप्रयोगेण
न दृष्टा शब्दचोदिता॥ प्रयोगस्तु तु निष्पादी शब्दार्थ इति मन्यते॥ यत्रेतेति शब्दचोदिता क्रिया कर्तृकर्मसाधनसामग्रीं विना न दृश्यते। ततनसाध्यसा-
साधनयोगो यद्यात्तत्रानुनिष्पादी तद्यथा शब्दार्थो विगंतव्य इत्युपसंहृतो॥ अथ सर्व एवाकारा गुणप्रधानभावेन पदस्यार्थ इति तृतीयपक्षं दर्शयितुमाह॥ ॥ नियता
॥१२७॥ ४ स्तु प्रयोगाय ये नियतं यत्र साधनं। तेषां शब्दाभिधेयत्वमपरैरनुगम्यते॥ येन केन चिद्विना शब्दस्याभिधेयं न निर्वहति तत्सर्वं साध्यसाधनात्मकं शब्दाभिधेयं वक्तु-
मुक्तं। किंचित्प्रत्याय्यते अन्यत्तु नान्तरीयकतयावगम्यत इत्यपि न तेषां मतं। किं तु सर्वाकारमेवाभिधेयं गुणप्रधानभावेन न तस्मात्प्रतीतमिति तृतीयपक्षः। शोभनः १२८॥
समुदाय एव तु स्यात्कस्य तथा शब्दस्यार्थ इति चतुर्थपक्षं दर्शयितुमाह॥ ॥ समुदायोभिधेयः स्यादविकल्पसमुच्चयः॥ न तु यथाकारसमुदायं समुच्चितमेव प्रत्या-
ययति न हि बहुवचनमेव तत्र स्यात्। अथ यद्विकल्पितं प्रत्याययति तदा वचनविकल्पः स्यादित्याशंक्याह॥ ॥ अविकल्पसमुच्चय इति। अविद्यमानो विकल्प

३३

समुच्चयो यस्मात्सौ तथाभूतस्तस्मान्न नीयत इति संभाव्यते। एतच्चोपमानसमुद्देशे पर्यविचारणावसरे सविस्तरं प्रदर्शयिष्यते॥१०॥ अथ जातिगुणक्रियात्मकस्यार्थस्या
सत्वभूतः संसर्ग एव शब्दार्थ इति पंचमं पक्षं दर्शयितुमाह॥ असत्यो वापि संसर्गः शब्दार्थः कैश्चिदिष्यते॥ घटादिभिः शब्दैर्घटादीनां जात्यादिसंसर्ग उच्यते॥ स चात्र
तद्व्यतिरेकेणानुपलम्भादसत्यभूत एवोच्यते। तस्मात्तत्संसृष्टः पदार्थ एवासत्यभूत इति॥ अथ सत्यमेवासत्योपाधिविचित्रितं शब्दवाच्यमिति षष्ठं पक्षमाह॥ अस
त्योपाधि यत्सत्यं तद्वा शब्दनिबन्धनम्॥ शब्दस्य वा स्वरूपमेवाभिधेयमिति सप्तमं पक्षं दर्शयितुमाह॥ शब्दो वाप्यभिजल्पत्वमागतो याति वाच्यताम्॥ अभिजल्पत्व
मध्यासरूपत्वमागतः शब्द एव स्वरूपलक्षणः शब्दस्य वाच्यः॥ अभिजल्पस्वरूपमाह॥ ॥सोऽयमित्यभिसंबन्धाद्रूपमेकीकृतं यदा॥ शब्दस्यार्थेन तं शब्दमभि
जल्पं प्रचक्षते॥ सोऽयमित्यभिसंबन्धोऽध्यास उच्यते। तेन पदार्थस्वरूपमाच्छादितमेकीकृतमिव प्रत्याय्यते तदाभिजल्पः शब्द उच्यते। अध्यासवशाच्छब्दार्थयोरेका
त्मत्वेप्यर्थशास्त्रेव प्राधान्यसुप्रयोगवशात्॥ क्वचित्तु विषयभेदेन द्वयोरपि दृश्यत इति प्रसंगादभिधातुमाह॥ ॥तयोरपृथगर्थत्वे रूपं त्वव्यभिचारि यत्॥ किंचिदेव क्व
चिद्रूपं प्राधान्येनावतिष्ठते॥ तयोः शब्दार्थयोरध्यासवशाद्रूढेर्नियमादेवाव्यभिचारि एव पृथगर्थत्वे एकरूपत्वे सति किंचिदेव रूपं प्रयोगवशात् क्वचिदेव लो
के शास्त्रे वा प्राधान्येनोद्रिक्ततयावतिष्ठते॥ तत्र लोकेऽर्थस्यैव प्राधान्यमित्यपि दर्शयितुमाह॥ लोकेऽर्थरूपतां शब्दः प्रतिपन्नः प्रवर्तते॥ अर्थरूपतां प्रतिपन्नो
ऽर्थेन सहैकत्वमिव प्राप्तः शब्दः प्रवर्तते। अयं गौरित्यादिनत्रार्थ एव बाह्यतया प्रधानमवसीयते॥ शास्त्रे तु शब्दस्योभयरूपतापि विभागेन परिदृश्यत इत्या

(34)

३४ ३५ हा॥ शास्त्रेतूभयरूपत्वं प्रविभक्तं विवक्षया॥[132] शास्त्रे हि स्वरूपप्रधानो निर्देशः क्वचित् क्वचिच्चार्थप्रधानोऽपीत्युभयरूपता शब्दस्य दर्श्यते॥ इदानीमर्थे पुनः शक्तिः-
एव यमात्मि किं तु शब्दाधीनेति यथा तेन शब्दैर्विधीयन्ते न तथैवावगम्यन्त इति स्वमाहात्म्योपस्थापित एव शब्दार्थ इत्यपरं पक्षं दर्शयितुमाह॥ ॥ अशक्तेः सर्वशक्तेर्वा
शब्दैरेव प्रकल्पिता। एकस्यार्थस्य नियता क्रियादिपरिकल्पना॥[133] अथवा सर्वशक्तिरर्थो व्यवस्थितः। तस्य प्रतिनियतशक्त्यभिधानं शब्देनेति नवमं पक्षं दर्शयितुम
त्रैवोक्तं सर्वशक्तेर्वेति। शक्त्यार्थः कदाचित् क्रियारूपतयाभिधीयते कदाचिल्लिङ्गरूपतयेति नियता क्रियादिरूपता शब्दार्थतया प्रतिपाद्यते॥ अथवा बुद्ध्युपा
रूढ एव शब्दस्यार्थो न बाह्य इति दशमं पक्षमुपदर्शयितुमाह॥ ॥ यो वार्थो बुद्धिविषयो बाह्यवस्तुनिबन्धनः। स बाह्यवस्त्विति ज्ञातः शब्दार्थः कैश्चिदिष्यते॥[134] शब्दस्य
बुद्ध्युपारूढस्यैवैकस्मिकस्य यो बुद्ध्युपारूढो बाह्यवस्तुनिबन्धनः बाह्यवस्तुविकल्पजननद्वारेण निबन्धनं यस्य स तथाभूतः। स चैवैकल्पिकोऽर्थोऽभ्रमवशात् दृश्यवि
कल्पैकाकारेण बहीरूपोऽपि बहीरूपतयाध्यस्तः। अध्यस्तमेव वस्तुत्वं गच्छत्यभिशब्दादिति शब्दनिमित्तमभिमतः शब्दार्थ इष्यते॥[135] इदानीं गवादीनां शब्दानामाकारविशेष
वानर्थोऽपूर्वप्रभृतीनां संविन्मात्रमपरामृष्टाकारविशेषमर्थ इत्येकादशं पक्षमाह॥ आकारवन्तः संवेद्या व्यक्तस्मृतिनिबन्धनाः॥ ये नेमन्यभासन्ते संविन्मात्रेण तेनो
न्यथा॥[135] केचिच्छब्दैः संवेद्याः सत्तायां आकारविशेषवन्तो व्यक्तस्मृतिनिबन्धनाः मन्यभासन्ते। केचित्त्विराकाराः संविद्रूपाः सत्ताप्यन्ते। तेषां तथैवार्थो व्यवस्था
प्यते॥[136] इदानीं प्रतिनियतवासनावशेनैव प्रतिनियताकारोऽर्थस्तत्त्वतस्तु कश्चिदपि नियतो नाभिधीयत इति द्वादशं पक्षमाह॥ ॥ यथेन्द्रियं सन्निपतद्वैचित्र्येणोपला- ३४

दर्शिकां। तथैवशब्दादर्थस्यप्रतिपत्तिरनेकधा॥ अविपरीतमप्यर्थमिदंदिग्दोषवशान्नानारूपमवभासयतियथा। तथैवनियतवासनावासितचेतसांशब्दार्थप्रती
तिरिति नास्तिकश्चिन्नियतएकः शब्दस्यार्थः। एतदेवव्याख्यातुमाह॥ वक्तान्यथैवप्रक्रान्तोभिन्नेषुप्रतिपत्तृषु। स्वप्रत्ययानुकारेणशब्दार्थः प्रविभज्यते। तथाहि।
सांख्येनसौगतमध्यमतयः प्रतिपत्त्रनुकारेण। अन्यथैवशब्दार्थःप्रतिपाद्यते। वक्तातुवैशेषिकादिनास्वमतस्यानुसारेणवक्तुंप्रक्रान्तः। तथाचवैशेषिकेणव
प्रवितत्प्रतिपादयितुंघटशब्दः प्रयुक्तः। सांख्यैर्गुणसमाहारमात्रमभिमन्यते। जैनसौगतैः परमाणुसंचयमात्रमिति। तथैवतस्मात्तेषामर्थप्रतिपत्तिः। एत
देवव्यक्तयितुमाह॥ एकस्मिन्नपिदृश्येऽर्थेदर्शनंभिद्यतेपृथक्। कालान्तरेणवैकोऽपितंपश्यत्यन्यथापुनः॥ वस्तुतएकस्मिन्नेकरूपेदृश्येऽर्थेशास्त्रवासनाभेदा
द्दर्शनंज्ञानमस्मिन्नभिद्यते। एकोऽपिचपुरुषः सुगतदर्शनसंस्कृतमतिरन्यथाध्यवस्यत्यर्थं। कालान्तरेणवैशेषिकशास्त्रश्रवणादन्यथेति। अतः किमि
त्याह॥ एकस्यापिचशब्दस्यनिमित्तैर्व्यवस्थितैः। एकेनबहुभिश्चार्थोबहुधापरिकल्प्यते॥ एकस्यघटशब्दस्यनिमित्तैः शास्त्रसंस्कारैर्व्यवस्थितैरेकेन
पुरुषेणनियतशास्त्रवासनावशात्क्रमेणबहुधार्थः प्रकल्प्यते। बहुभिश्चनानाशास्त्रसंस्कृतबुद्धिभिर्युगपत्स्वमत्यनुकारेणबहुधापिपरिक
ल्प्यतइतिकिमत्रकुर्मः। अतः किमित्याह॥ तस्माद्दृष्टतत्त्वानांसापराधंबहुच्छलं। दर्शनंवचनंचापिनित्यमेवानवस्थितं॥ यतएवंतस्माद्दृष्टतत्त्वानां
पुरुषाणांदर्शनमव्यवस्थितं। अदृष्टतत्त्वतयाचसापराधंअतएवबहुच्छलंबहुविधबाधकाघ्रातंतथासतिवचनमपितेषांतथैवेतितत्त्वकथनंसुदूरमव

३५ स्थितेः॥१४०॥ ननु संस्तेवपरावरत्वामुनयः तदनुसारेण सर्वं व्यवस्थापयिष्याम इतितदर्थमाह॥ ऋषीणां दर्शनं यच्च तत्त्वे किंचिदवस्थितं। न तेन व्यवहारोस्ति न तच्छब्दनि
35 बंधनं॥१४१॥ परमर्षीणां भगवतां दर्शनं तात्त्विकं भवति किंतु परमार्थेन व्यवहारासंभवः व्यवहारसाधनानां शब्दानां निबंधनेन भवतीति न तेन व्यवस्था॥
व्यवहारवेलायां वा तेषु दृष्टं तत्त्वस्य दृश्याद् इति पुनरव्यवस्थैव॥ यदुच्यते। रूपाण्यपदेशाभ्यां लौकिके वर्त्मनि स्थितौ। ज्ञाने प्रत्यभिलापे च सदृशौ
बालपंडितौ इति। ननु पुरुषबुद्ध्यो विचित्रा भवंतु प्रत्यक्षेण त्वलव्ययं यथावदर्थो दृष्टः तथैव व्यवहरिष्याम इत्याशंकाप्रत्यक्षस्याव्यवस्थितिमाह॥ ॥
तलवद्दृश्यते व्योम खद्योतो हव्यवाडिव। नैवास्ति तलं व्योम्नि न खद्योते हुताशनः॥१४२॥ अतिनिर्मलं गगनं तलमिव विलुलत् दृशाम पुंक्ति दृश्यते। न तत्र
किं कुर्मः। यत्तनरूपप्रख्यानि प्रतीयन्ते न दृष्टमित्येवं तथैवोपगम्यते इत्युपसंहरन्नाह॥ ॥तस्मात्प्रत्यक्षमप्यार्षं विद्वानीक्षेत युक्तितः। न दर्शनस्य प्रामाण्या
त् दृश्यमर्थं प्रकल्पयेत्॥१४३॥ तस्माद्व्यवहारवेलायामसमाख्येयतत्त्वानामर्थानां यथा लौकिकैरन्वाख्यानं क्रियते तथैव तदनुसारेण शब्दार्थमाश्रित्य व्य
वहारं निर्वाहयेत् शिष्टप्रेषणमाचरणीयमिति। यस्य यथैव स्वदर्शनानुसारेण प्रतिभाति तथैव तत्त्वस्य शब्दार्थ इत्येवाश्रयणीयमित्यलं निर्बंधेन बहु
विकल्पप्रदर्शनेनेत्याह॥ ॥असमाख्येयतत्त्वानामर्थानां लौकिके यथा। व्यवहारे समाख्यानं तत्प्राज्ञो न विकल्पयेत्॥१४४॥ एवं मतभेदेन प्रदर्शितस्य द्वा
दशधा पदार्थस्य पदकांडे जात्यादिप्रपंचैः प्रविभज्य स्वरूपं निर्णेष्यति। एतदत्रैव याकरणस्याखंडस्य व स्फोटलक्षणो वाक्यार्थः प्रतिभा संबंधः पदार्थ [redacted]
३५

स्वसंसंस्पर्श एवेति निर्णयः॥ १४४ अथ प्रतिभास्वरूपमेव पूर्वोपक्रान्तमनुबध्नन्नाह॥ ॥ विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते। या वाक्यार्थ इति प्रोक्ताः माहुः पदार्थरूप
पादितामेतां देवदत्तादिपदेभ्यो विच्छिन्नेभ्यः शब्दार्थानां विच्छेदेन व्यग्रहणे प्रत्ययवेलायामेका प्रतिभा पदार्थप्रतिव्यतिरिक्तैव जायते। तां च वाक्यार्थं वैयाकरणा
आहुः। कस्तस्या उपाय इत्याह॥ पदार्थरूपपादितामिति। पदार्थैः संसृष्टैरेवोपाधिभूतैः रूपपादितामभिव्यक्तामिति। कीदृशीं नामित्याह॥ ॥ इदं तदिति सा
न्येषामनाख्येया कथंचन। प्रत्यात्मवृत्तिसिद्धा सा कर्त्रापि न निरूप्यते॥ सा चोपजायमाना आख्यातुमन्यस्मिन्न शक्यते। केवलं स्वसंवेदनसिद्धैवासौ। प्रति
पत्त्रापि स्वसंवेदनसमये नियतेन रूपेण निरूपयितुमशक्यैव सा॥ किंस्वभावा सेत्याह॥ ॥ उपश्लेषमिवार्थानां सा करोत्यविचारिता। सार्वरूप्यमिवापन्ना
विषयत्वेन वर्त्तते॥ अर्थसृष्टानां पदार्थानामसावुपश्लेषं मेलनं करोति। सर्वरूपं च वाक्ये पदार्थानां वासौ विषयत्वेन वर्त्तते। तन्निष्ठासौ सा फलं भज
तइति॥ तां च न किंचिदस्याणिमात्रमतिवर्तते अतिक्रम्य तिष्ठतीत्याह॥ ॥ साक्षाच्छब्देन जनितां भावनानुगमेन वा॥ इतिकर्तव्यतायां तां न कश्चि
दतिवर्त्तते॥ सा साक्षाच्छब्देन कदाचिद्व्यवहारकाले जन्यते। जन्मान्तरभावनावशेन वा गजवाजिप्रभृतीनां [illegible] तन्मूल एवेतिकर्तव्यतारूपः सर्व
स्य व्यवहारः। एतदेव स्फुटयति॥ प्रमाणत्वेन तां लोकः सर्वः समनुपश्यति। समारम्भाः प्रतीयन्ते तिरश्चामपि तद्वशात्॥ सर्वः कश्चित्तामेव भगवतीं स्वप्रति
भां प्रमाणत्वेन पश्यति। तथा चोक्तं। सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः इति॥ तिरश्चां च जातमात्राणां तन्मूल एव व्यवहार इति तदुप

३६ द्धेवेन नात्मावेचनीयः॥ [१४९] सिद्धेवं चेयं सर्वस्य प्रतिभेत्युपपादयितुमाह॥ ॥ यथा द्रव्यविशेषाणां परिपाकैरयत्नजाः। मदादिशक्तयो दृष्टाः प्रतिभास्तद्वतां त
37 था॥ [१५०] यथा द्रव्यविशेषाणां परिपाकव्यतिरिक्तयत्नान्तरनिरपेक्षा मदादिशक्तयो दृश्यन्ते। तथैवेयं प्रतिनियतसंस्कारजन्या प्रतिभा तद्वतां स्फुटमुपलभ्यत एवं जन्मा
न्तराभ्यासहेतुकेयमिति॥ [१५०] सनिदर्शनमुपपादयितुमाह॥ ॥ स्वरवृत्तिं विकुरुते मधौ पुंस्कोकिलस्य कः। जन्त्वादयः कुलायादिकरणे केन शिक्षिताः॥ [१५१] पंचम
स्वरविरावी मधुमासे पुंस्कोकिलः तस्य यत्नजमेतन्निबद्धं। लूतानां तन्तुनां कुलायरचना च प्रतिभामाहात्म्यादेव दृश्यते। एतदेव स्फुटयितुमाह॥ आहार
प्रीत्यभिद्वेषप्लवनादिक्रियासु कः। जात्यन्वयप्रसिद्धासु प्रयोक्ता मृगपक्षिणाम्॥ [१५२] प्रतिप्राण्याहारादिक्रियानियताः नादिप्रतिभावशादेवेति प्रसि
द्धं प्रतिभायाश्च प्राब्दः एवमलमित्याह॥ ॥ भावनानुगतादेतदागमादेव जायते। आसत्तिविप्रकर्षाभ्यामागमस्तु विशिष्यते॥ [१५३] स चागमः कदा
चिदासन्नोऽस्मिन्नेव जन्मन्यवगतः कदाचिज्जन्मान्तरेऽस्यासत्तिविप्रकर्षाभ्यां शब्द एव प्रतिभाहेतुः [१५३] तस्याश्च निमित्तभेदेन षाड्विध्यं दर्शयितुमाह॥
स्वभावचरणाभ्यासयोगादृष्टोपपादिताम्। विशिष्टोपहितां चेति प्रतिभां षड्विधां विदुः॥ [१५४] स्वभावेन यथा कपिः। चारणादिष्वुदाहरणान्यूह्यानि। एव
मवस्थितेऽपि वाक्येऽभ्युपगतेऽपदपदार्थमन्तरेण व्यवहारो न निर्वहतीति पदार्थः सामान्यं नमत भेदप्रदर्शनपूर्वकं निर्णीतः॥ [१५४] इदानीं मुख्यानां तदीय
कविचारोपक्रममाह॥ यथा संयोगिनि द्रव्ये लक्षिते यः प्रयुज्यते। गोशब्देन त्वसौ तेषां विशेषाणां प्रकाशकः॥ [१५५] इह शब्दस्य सामान्यवाजप्यायनमते सम०
३६

। प्रविभाग २

नार्थः। व्यक्तिर्वा स्यादिमतेनार्थः। तत्रेह सामान्यमात्रं वा व्यक्तिमात्रं वा तस्य प्रयोजकमर्थत्वेनावबुध्यते। विशेषात्मकनान्तरीयकतया तत्तोवगम्यते। त
तः शब्दस्यादृष्टव्यभिचारं सामान्यमात्रमेवार्थः। यथा संयोगिनो द्रव्यविशेषाः सूक्ष्मा मणादय उपलक्षणमात्रभावेन गवादीनामर्थानां स्थि
ताः नगवादिशब्दवाच्या भवन्ति। न चान्तरंगा अप्याकारवर्णसंस्थानादय इति। न तेषामसौ प्रकाशक उच्यते। एतदेव स्फुटीकर्तुमाह॥ आ
कारवर्णावयवैः संसृष्टेषु गवादिषु। शब्दः प्रवर्त्तमानोपि न तानङ्गीकरोत्यसौ॥ आकारादयो व्यभिचारित्वाच्छब्दवाच्या न भवन्तीत्यर्थः। १५६
।नन्वाकारवाचकानां स्थूलह्रस्वकर्बुरशबलादीनां शब्दानां किमाकारादिवाचकत्वं नाङ्गीकार्यमित्येवं सा शंक्याह॥ संस्थानवर्णावय
वैर्विशिष्टे यः प्रयुज्यते। शब्दो न तस्यावयवे प्रवृत्तिरुपलभ्यते॥ यः शब्द आकारादय उच्यन्त एवेति न सर्वत्रावयवं तदप्रतीतिप्रसङ्गः। यद्धि प्रयोजकं
शब्दस्य तदेव तस्य वाच्यम्। अन्यन्नान्तरीयकमिति भ्रमः॥ अत आकारादिवाचकानां नावयवमात्रे एकदेशमात्रे प्रवृत्तिरंगीकार्या॥ अतः
शब्देरर्थस्य कश्चिद्विशेष उच्यते। क्वचित्सामान्यमात्रं। एवं च न शब्दस्यैवं रूपं प्रत्यक्षमप्यर्थसाक्षात्कारे पनायकमेवमेवार्थस्वरूपपरिच्छेद
कं दृष्टमित्याह॥ दुर्लभं कस्यचिल्लोके सर्वावयवदर्शनं। केचिदेवावयवैर्दृष्टैरर्थः कृत्स्नोनुमीयते॥ युगपत्सर्वावयवदर्शनस्यासंभवात्क
तिपयावयवदर्शनेन सकलार्थपरिच्छेदस्तत्रानुमानिक एवेति प्रत्यक्षमपि नैव सकलमर्थस्वरूपं परिच्छिनत्ति। तेषैव शब्दादेकदेशावसा

३७ येननित्यसहचारिधर्मानिरणवगमोज्ञायतइत्याह॥॥यथाजातस्तसलादीनांगंधेनसहचारिणो।नित्यसंबंधिनांद्रव्यगुणानामवधारणं॥जातिगंधउत्प
लगंधइतिशब्दाद्विशिष्टस्यगंधमात्रस्यावगतिः।तत्सहचारिरूपस्पर्शाद्यवधारणंतत्रनांतरीयकेनमुख्यमितिबोद्धव्यं॥तत्रचशब्दःपरामृष्ट
विशेषेवस्तुमात्रएवप्रवर्त्ततइत्याह॥॥संख्याप्रमाणसंस्थाननिरपेक्षःप्रवर्त्तते।बिंदौचसमुदायेचवाचकःसलिलादिषु॥एकापिजलकणि
काऽपोबहलमपिसरित्स्रोतस्तथैवोच्यते।एकापिशिलाशुक्लाहिमवानपिशुक्लइतिशब्दःप्रयोजकमात्रमेवजात्यादिकंस्वार्थीकृत्यप्र
वर्त्ततेस्वाकारादिविशेषावभासस्तुनांतरीयकइतिस्थितं।ननुसमुदायेषुहिवृत्ताःशब्दाअवयवेष्वपिवर्त्तंतेयथातैलंभुक्तंघृतंभुक्तंशुक्लो
नीलःकपिलइत्युक्तंतदेतत्कथं।उक्तंचानजातिगुणशब्देषुमूर्त्तिभेदोविवक्षितः।तेजातिगुणसंबंधभेदमात्रनिबंधनाः।तथानेक्षिताजा
तिशब्दानांसमुदायानुपातिता।जातिमाचक्षतेतेहिव्यक्तीर्वाजातिसंगताः।इति।इहचसंख्याप्रमाणसंस्थाननिरपेक्षःप्रवर्त्तते।बिंदौचस
मुदायेचवाचकःसलिलादिषुइति।तदेतदाशंक्याह॥॥संस्कारादिपरिच्छिन्नेतैलादौयोव्यवस्थितः।आहैकदेशंतेनैवतस्यावयववर्त्तिता॥१६१॥
संस्कारेणयथातादिपरिच्छिन्नेतैलादौतैलघृतादिःशब्दोव्यवस्थितःसावेकदेशंसमुदायाध्यारोपेणाह॥एतदुक्तंभवति।नतेजातिशब्दाः
अपितुतत्सदृशाएवतेनियतपरिमाणाभिधायिनस्तदध्यारोपेणतदेकदेशवाचिनउच्यंतइति।अतस्तेषामवयववर्त्तिताभाष्येउक्तेतिनक ३७

श्चिद्दोषः उक्तं च ॥ संस्कारादुपघाताद्वा वृत्तोक्तपरिमाणकोऽनेलादौ जातिशब्दोऽत्र समस्तादेव गम्यत इति । एतदर्थपरमार्थतः इदं बोद्धव्यमित्याह ॥
येनार्थेनाभिसंबद्धमभिधानं प्रयुज्यते तदर्थापगमे तस्य प्रयोगो विनिवर्तते ॥ येनार्थेन जात्यादिना प्रयोजकेन वक्तुरिच्छया धर्मान्तर्भावेनेनं प्रयु उ२
ज्यमानोऽपि शब्दो न तेषां सर्वेषां नियमेन प्रत्यायनं करोतीत्याह ॥ ॥ योऽल्लसंभविनो धर्मानन्तर्णीय प्रयुज्यते । शब्दस्तेषां न सान्निध्यान्नियमेनाव्य
पेक्षते ॥ एतदेवान्वयव्यतिरेकाभ्यां स्फुटीकुर्वन्नाह ॥ ॥ यथा रोमशफादीनां व्यभिचारेऽपि दृश्यते । गोशब्दान्न तथा जातेर्विप्रयोगे प्रवर्तते ॥ उपसं
हर्तुमिदानीमाह ॥ ॥ तस्मात्संभविनोऽर्थस्य शब्दात्संप्रत्यये सति । अदृष्टविप्रयोगोऽर्थः संबंधित्वेन वर्तते ॥ नैयत्येनादृष्टविप्रयोगो जात्यादि
रेव शब्दस्य संबंधित्वेन वाच्यत्वेन गम्यत इति बोद्धव्यं ॥ एवं नामपदस्यार्थविचारं कृत्वेदानीं तस्यैव भागार्थविचारं प्रस्तौति । तत्र प्रत्ययभागस्या
र्थविचारं तावदाह ॥ ॥ वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तयः ॥ तेन प्रत्ययभागस्य संख्याकर्मादयो वाच्यत्वेन द्योत्यत्वेन वार्था इति स्थितं ॥०॥
इदानीं प्रकृतिभागस्यार्थमभिधातुं प्रकृतिप्रत्ययसमुदाय एव संख्यादिविशिष्टस्यार्थस्याभिधायक इत्याह ॥ ॥ स्याद्वा संख्यावतोऽर्थस्य समुदा
योऽभिधायकः । अथवा संख्याद्युपलक्षितमेवार्थं प्रकृतिप्रत्ययसमुदायोऽभिधत्त इत्यभिधातुमाह ॥ ॥ विना संख्याभिधानाद्वा संख्याभेदसम
न्वितानार्थान्स्वरूपभेदेन कांश्चिदाहुर्गवादयः ॥ स्वरूपभेदेन द्वित्वादिभेदेन सपर्थः ॥ न तु यदा शब्दा नित्यसंबंधाविवेकेन ज्ञातशक्तयः

38

३८
38

स्वार्थस्य प्रतीतेर्न दोषः कथमेतदवगतमयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इत्याशंकापोद्धारस्यान्वयव्यतिरेकौ निमित्तमिति प्रतिपादयितुमाह ॥॥ येशब्दानि
न्यसंबंधाविवेकेस्यात शक्यः ॥ अन्वयव्यतिरेकाभ्यां तेषामर्थो विभज्यते । विवेके सति शब्दार्थविभागे कृते सति च प्रातिपदिके प्रत्यये चासंस
कत्वादिविरहितेरूपत्वमात्रमवगम्यत इत्येवमन्वयव्यतिरेकाभ्यां प्रकृतिप्रत्ययार्थविभागो व्यवस्थाप्यते ॥ न त्वापिशकालाशकालाभ्या
मन्वयव्यतिरेकाव्याप्तिस्तत्प्रतिपादनं कर्तव्यमित्याह ॥ ॥ यत्र चाव्यभिचारोस्ति तयोः शक्यं प्रकल्पनं । नियमस्तत्र यत्रान्वयव्यतिरेकानु
पलम्भेनेतत्रैव नियमः । न त्वशक्ये विषय इत्याह ॥ ॥ न त्वेवं नियमानुरूप्यार्वादिषु भवनामत्ती सा हावसतित्तु डाहावर्ष्यदर्शनाद्ह क्षाणां
पचतीत्यादौ नस्य साहाय्यमात्रे स्यापि तेन न पृथगर्थतेति । उक्तं च ॥ भावे कर्मणि कर्त्तारि सर्वधातुकार्थ इति चेदेकाद्विबहुषु नियमानुप
पत्तिरनदर्थत्वात् । विकरणार्थ इति चेन्न कृताभिहितेषु विकरणाभाव इति । यत्र तु पृथगेव नयोः प्रकृतिप्रत्यययोरर्थवत्त्वं दृष्टं तेन तत्र
पृथगर्थाभिधानमेवांगीकार्यं ॥ न तदुपलक्षणार्थत्वं कल्पनीयमित्याह ॥ ॥ संभवे वाभिधानस्य लक्षणां तु न कल्प्यते । आपेक्षिको
हि संसर्गो नियतः शब्दशक्तयः ॥ प्रकृतिप्रत्यययोः पृथगर्थाभिधानसंभवे प्रकृत्यर्थ एव पदवाच्यः प्रत्ययार्थस्तूपलक्ष्यमाणः प्रत्य
यार्थ एव पदवाच्यः प्रकृत्यर्थस्तूपलक्ष्यमाण इति न युक्ता कल्पना ननु यदि प्रकृतिप्रत्यययोः पृथक् पृथगर्थमभिधातुं शक्तिरस्ति राम

३८

तत्किमित्तिपरस्सरापेक्षितयात्वार्थमिधानमित्याह॥ आपेक्षिकादि स्याद्दियस्मात्संसर्गप्रकृतिमस्यमार्थयोः शब्दशक्त्योरन्वयव्यतिरेकापेक्षितानि
यतार्थवच्चानि स्विकार्एव प्रतीयंत इति। यत्र त्वपेक्षायामपि न पृथगर्थतो पलभ्यते तत्रापोद्धारेणाश्रयणीयदित्याह॥ ॥ नक्तंप्रतद्यथापानामन्वयो
र्थस्पष्टरूपतो। अतो पत्ति एवाचित्संघातस्य ववागम्यतो ने हि एकाप्यगमे कचिदर्थाकाचिदर्थो नावेदनोपजायेतो नदेवं शक्याशक्यावन्वयव्यतिरेका
वाश्रित्यापोद्धारेणान्वाख्यानेपदभागयोः कार्यमित्युक्तं। ततश्च किं सनिमित्तं अथ निर्निमित्तमेवेत्याशंक्य सनिमित्तमेव पदभागयोः पदस्य चा
न्वाख्यानं कार्यमितीदानीमुपपादयितुमाह॥॥ अन्वाख्याननिमित्तं शब्दव्युत्पत्तिकर्मसु। बहूनां संभवे यूनां निमित्तं किंचिदुच्यते॥ यत्र त्वे
लबहूनि निमित्तानि संभवेति तत्र किंचिदेवानेयतेनाश्रित्यान्वाख्यानं क्रियत इत्युच्यते। एतदेव दर्शयितुमाह॥॥ वैरवाशिष्ठगिरिशास्तथै
कागारिकादयः। केचित्कथंचिदाख्याता निमित्तावधिसंकरैः। वीरस्यदं वैरं वीरणया वा। तथा वसिष्ठस्यदं वासिष्ठं नक्तं तेषो क्तं वा वासिष्ठं। गिरौ
शेत इति गिरिरो उष्णं दसीति रम्यसेय ऽथवा गिरिं श्यतीति आनेनुपसर्गकः इति केगिरिशइत्येवं निमित्तावधिसंकरेणान्वाख्याने कृतौ नेनु
नियतमेव निमित्तमत्र किंचिदुच्यतामित्याशंक्यो पायानामनियतत्वादनियतमितिप्रतिपादयितुमाह॥॥ यथा पथः समाख्याने वृक्ष
वल्मीकपर्वताः। अविरुद्धं गवादीनां भिन्नेष्वसहचारिमिः॥ यथा वृक्षादिभिर्भिन्नैरुपायभूतैरेकस्यचित्पथः समाख्यानमविरुद्धं तथा

३९ गवादीनां शब्दानां भिन्नैरेव सहचारिभिरन्वाख्यानं इति बोद्धव्यं ॥ [१७४] अर्थस्य चावस्थाभेदा बहवः संति ये तु च योऽवस्थाभेदः परिदृष्टस्तेनैव सोऽन्तस्समाख्या
३९ नं करोतीत्याह ॥ अन्यथा च समाख्यानमवस्थाभेददर्शिभिः ॥ क्रियते किंशुकादीनामेकदेशवधारणात् ॥ [१७५] किंशुको नेति किंशुकशब्दं प्रयुंजते इति भिन्नमे
व निमित्तं ॥ एतदेव व्यक्तीकर्तुमाह ॥ ॥ केश्चिन्निर्वचने भिन्नं गिरतेर्गर्जतेर्गमेः ॥ गवतेर्गदतेर्वापि गौरित्यत्रानुदर्शितं ॥ [१७६] गोलक्षणस्यार्थस्य नानाविधा
अवस्था दृष्टाः तदनुगमेनैवार्थमाङ्गरा चार्याः ॥ [१७६] एवं शब्दस्य प्रकृतिवाच्यमेव निमित्तं ॥ न तत्त्वबहुविधनिमित्तप्रदर्शनं ॥ इदानीं स्वरूपमेव शब्दानां प्र
वृत्तिनिमित्तमन्वाख्यानायोपादीयत इति पक्षं प्रदर्शयितुमाह ॥ ॥ गौरित्येव स्वरूपाद्वा गोशब्दो गोषु वर्तते ॥ व्युत्पाद्यते न वा सर्वं ॥ अथ कस्मा
द्गौरित्युच्यते ॥ गौरित्येव हि गोर्गवि वर्ततइत्यौक्रियकाः ॥ अतस्स्वस्वरूपमात्रप्रयुक्ताः सर्वशब्दा इत्यव्युत्पत्तिपक्ष एवेत्याह ॥ व्युत्पाद्यते न वा सर्व
मिति ॥ केश्चित्स्वरूपं वाच्यं च निमित्तमुच्यते [illegible]दित्याह ॥ ॥ केश्चिद्व्यामयपेक्ष्यते ॥ एवं सनिमित्तमन्वाख्यानं निमित्तं च वाच्यं बहुधा केश्चिल्ल
क्षितं किंचिदुक्तं ॥ स्वरूपं वा निमित्तं उभयमेव वेति दर्शितं ॥ इदानीं किंभिन्नमेव रूपं शब्दस्य आहोस्विदभिन्नमिति विचार्यते ॥ यदि भिन्न
मेव तदा गमनेन गरलं गजः इत्यादिषु गादीनां भिन्नत्वाद्भेदे नैवोपादानप्रसंगोऽतिप्रसंगोऽनन्त्यादशक्यत्वमन्वाख्यानस्येत्याह ॥ ॥ सामान्ये
नोपदेशश्च शास्त्रे लघ्वर्थमाश्रितः ॥ जात्यंतरवदस्यापि विशेषाः प्रतिपादकाः ॥ शब्दभेददर्शिने भिन्नानां सामान्यसमाश्रयेण लाघवार्थं
३९

दुपदेशः शास्त्रे क्रियते। विशेषाभेतेऽस्यैव जातं तं नरं चभ्यातिपादकाउचंते॥ एतदेवाह॥॥ अर्थान्तरे च यद्वृत्तं तत्प्रकृत्यन्तरं विदुः। तुल्यरूपेण तद्रूढावन्यस्मिन्ननुषज्यते॥ तदन्यस्मिल्क तुल्यरूपेन रूढावनुषज्यते। रूढौ च तुल्यरूपत्वेणान्यस्मिन्नानुषज्यते नेन तत्र तत्तद्भिन्नमेवासाहरूपात्तत्रैकत्वं मन्यते परमार्थतस्तु भिन्नाः शब्दा गवादयः। स्वतन्त्रा प्रत्यजिभिन्ना एवेत्याह॥॥ भिन्नावजिघियती धातू निघ्नतो विषयान्तरे। कैश्चित्कथंचित् दृष्टौ च त्रैहि प्रतिपादनौ॥ अन्योयजिरन्यइज्जिरितिनियतौ बोद्धव्यौ। इजिः किल्येवयजिल्कतादि नरस्मिन्निति स्याचार्यैः पुनः क्वचिद्भेदाश्रयेणानिर्दिष्टौ क्वचिदभेदेनेति प्रतिपादयितुमाह॥ केश्चिद्दिन्ताहि॥ कश्चिद्घञ्जेः किति संप्रसारणं शास्ति। इष्टः इष्टमिति। तज्जातीनस्पत नैष्ठाति पृष्ठापृष्टुं पृष्टवानिति। कश्चिदिजिमेवोपदिशति। तस्य तज्जातीयादेशं विदधाति। इति प्रतिपादनेवैचित्र्यौ॥ अवस्थाभेदाश्रयेण प्रतिपादनं दृश्यत इत्याह॥॥ एवं च बालवायादिजित्वरीवदुपाचरेत्। भेदाभेदाभ्युपगमेन विरोधोस्ति कश्चन॥ इह विदूरात्प्रभवति वैडूर्यं हि वैडूर्यशब्दं व्युत्पादयन्ति। न च विदूरादसौ प्रभवति। बालवायाद्धि सत्रो विदूरे केवलं संस्क्रियते। तत्रोक्तो बालवायो विदूरं च प्रकृत्यन्तरमेव वा॥ नवैयाकरणा चेद्रूपं जित्वरीवदुपाचरेदिति। बालवायो हि तद्विषये विदूरमापद्यते। तस्य बालवायात्प्रभवति वैडूर्यमणिरिति सिद्धं। अतो बालवाय विदूरयोरभेदाभ्युपगतः। अथवान्यो हि तद्विषये विदूरशब्द उच्यते यथा वणिग्भिर्वाराणसी जित्वरीति। आदिशब्दाद्द्विस्त्रवणरवणशब्दाविति भेदावगन्तव्यः। अतो भेदाभ्युपगमे भेदाश्रयणे वा न कश्चिद्दो

४० षः। भेदपक्षाश्रयणेऽवसामान्यमाश्रित्य लाघवेनोपदेशः क्रियते। अभेदपक्षे त्वभिन्नरूपसमाश्रयणेनैवेति न किंचिदवद्यं। ततोऽपदिशद्भेदपक्षः। तदा धा
50 तूपसर्गयोः पृथक्त्वकल्पनमित्याह॥ ॥ अडादीनां व्यवस्थार्थं पृथक्त्वेन विकल्पनं। धातूपसर्गयोः शास्त्रे धातुर्वेव तु नाद्दशः। अडूद्विर्वचनव्यवस्थार्थं
केवलं धातवः पृथगुपदिष्टाः। वस्तुतः पुनर्विशिष्टक्रियावचना एव ते इति सोपसर्गाणामेव धातुत्वं। एतदेव प्रतिपादयितुमाह॥ ॥ तथाहि संग्रामयतेः सो
पसर्गाद्विधिः स्मृतः। क्रियाविशेषाः संघाते प्रक्रम्यन्ते तथाविधाः। असंग्रामयत सैन्यं संग्राममयिषत। सोपसर्गस्यैवाट्द्विर्वचनदर्शनात्सोपसर्गस्य
वास्य धातुत्वं। अत उपक्रम एवाख्यातेविशिष्टैव धातुवाच्या क्रियानिर्वर्त्यितुमुपक्रम्यन्ते इत्याख्यातानां स्वरूपप्रदर्शनार्थमाह। क्रियाविशेषा
इत्यादि संघाते धातूपसर्गसमुदाये इत्यर्थः। तथाविधा अभिन्ना भिन्ना वा। अतः किं भवतीत्याह॥ ॥ कार्याणामन्तरंगत्वमेवं धातूपसर्गयोः। ए
वं च धातूपसर्गाश्रयाणि यानि कार्याण्यन्तरंगाणि तु चान्ते इति पूर्वं तान्येव प्रवर्तन्ते। यथा सुडादयः। तथाभूतेव च सा क्रिया साधनसंबंधं गच्छती
त्याह॥ ॥ साधनैर्याति संबंधं तथाभूतैव सा क्रिया। तथाभूतैव उपसर्गविशिष्टैव कारकसंबंधमुपगच्छति। एवं चानुभूयत इति कर्मणि लकारः सि
ध्यति। तथा षत्वतुकोरसिद्ध इत्यत्र भगिनीयं अड्व्यासव्यवायेपीत्यनात्मनेपदमेवेति स्थितं। उक्तं च॥ कारकाणां प्रवृत्तिर्विशिष्टा क्रियायां अन्य
था कृत्वा मां सोऽहमेव प्रवर्तते अन्यथा च प्रसक्तो दुन इति। इत्तो उपसर्गसंबंधा याश्च तस्या वैशिष्ट्यमिति क्रमाश्रयणेन पूर्वमेवोपसर्गेण संबंधः। इदा ४०

नोपसर्वधातुः साधनेन युज्यत इति क्रमसमाश्रयणेनाख्यातस्वरूपं प्रतिपादयितुमाह॥ ॥प्रयोगार्हेषु सिद्धः सन्भेत्तव्योऽर्थो विशिष्यते॥ प्राक्तु साधनसं
बंधात्क्रिया नैवोपजायते॥ लब्धात्मनस्तस्याविशेष्यत्वोपपत्तेः प्रयोगार्हेषु धातुषु सिद्धः सन्नर्थो भेत्तव्यो विशेष्यो भवत्युपसर्गादिभिः न तु पूर्वकालत्वा
ख्याते विशेषणयोगः। यदि प्राक्साधनसंबंधात्क्रियाविशेषणं इष्यते तदानुत्पन्नायास्तस्याः स्वरूपाभावेन कथं विशेषसंबंधः स्यादित्याह॥ प्राक्चेत्यादि॥
उक्तं च॥ साधनैः क्रियां निर्वर्त्तयति तामुपसर्गो विशिनष्टीति पूर्वं साधनसंबंधः ततउपसर्गेण तद्विशेषणमुपपन्नं॥ अस्मिंश्च पक्षेऽभ्यासव्यवायेऽपि सारंभणीयं
भवतु कोऽप्रसिद्ध इति तु किं कर्त्तव्यं एकादेशासिद्धत्वेन वक्तव्यं प्रत्यय इत्यंतरंगत्वात्साधनाभिधायकाद्धातुकाश्रयो गुणः प्रवर्त्तत इति सिद्धौ अथ पूर्वं धातु
रुपसर्गेण युज्यत इति पक्षं समाधातुमाह॥ ॥धातोः साधनयोगस्य भाविनः प्रक्रमाद्यथा॥ धातुत्वं कर्मभावश्च तथान्यदपि दृश्यतां॥ क्रियावचनो धा
तुरित्युक्तं। साधनसंबंधाच्च प्राक्क्रियानिर्वृत्तेरसंभवाद्यथा भाविसाधनसंबंधसमाश्रयणेनोपक्रम एव धातुत्वं धातुसंज्ञोच्यते। यथा च धातोः
कर्मण इत्युच्यते कर्मणो धातुरिति। इषिकर्मत्वस्य भावित्वादुपक्रम एवेषिकर्मत्वमुक्तं। तथान्यदपि दृश्यतां भाविसंबंधादुपक्रम एव विशिष्टक्रियाकत्व
नत्वं दृश्यतां को दोषः। एवं च भिन्नपक्षाश्रयणेन तथाविधविशेषनिवर्त्तनेन शोभनतरमुच्यते। क्रियाविशेषाः संघाते प्रक्रम्यंते तथाविधा इति ॥१८६॥
उपक्रम एव चासौ क्रियाविशिष्टेवाभ्युपगंतुमुक्त इति दृष्टांतप्रदर्शनपूर्वकमाह॥ ॥बीजकालेषु संबद्धा यथा लाक्षारसादयः॥ वर्णादिपरिणा

४१ 41

मेन फलानामुपकुर्वते॥ [१८७] बीजवापकाल एव यथालाक्षारसादयो बीजसंबंधादुत्तरकालं वल्लरीरसादिपरिणामेन फलोपकारं कुर्वते। तथा दार्ष्टान्तिके
योजयितुमाह॥ बुद्धिस्थादभिसंबंधात्तथा धातूपसर्गयोः॥ अभ्यन्तरीकृतो भेदः पदकाले प्रकाशते॥ [१८८] धातूपसर्गयोः संबंधबुद्ध्या समुल्लिखितो यो
ऽन्तर्गीतिः केवलं तस्मात्संबंधात्तयोर्धातूपसर्गयोः संबंधे पदकाले पदनिष्पत्तौ सत्यामसौ भेदः प्रकाशते न तु लवनं इति हन्तोपसर्गसंबंधाया एव सा
धनयोग उपपन्नः। एवमपोद्धारमतावेवाकपदस्य पदभागयोः प्रकृतिप्रत्यययोः शङ्काशङ्कान्वयव्यतिरेकसमाश्रयणेन सनिमित्तमन्वाख्या
नं कर्तुमनेकधार्थः। क्वचिन्निमित्तं स्वरूपं वेत्याख्यातौ तत्र च पदमेकमनेकं चेति नामपदं लेशतो निर्णीतम्। आख्यातमपि क्रियाविशेषाः संघाते
प्रक्रमं तत्तथाविधा इत्यादिना भेदाभेदविचारपूर्वकमपि निदर्शितमायां इदानीं नामाख्यातोपसर्गनिपाताश्चेति चत्वारि पदजातानीति नि
रुक्तकाराः। तत्र नामाख्यातस्वरूपं प्रदर्शितम्। उपसर्गाणामप्रदर्शनीयमिति तत्स्वरूपं प्रदर्शयितुमाह॥ क्वचित्संभविनो भेदाः केवलैरनिदर्शिताः॥
उपसर्गेण संबंधे व्यज्यन्ते प्रपरादिना॥ [१८९] क्वचित्सत्त्वादौ प्रकर्षादीनां संभवात् केवलैस्तैस्तेषाममनीतेरुपसर्गसंबंधात्तदवगम इति तेषूपसर्गाणां
विशेषद्योतकत्वमुच्यते। अत एव चोक्तं तमेव विशिनष्ट्युपसर्ग इति। तर्हि द्योतकत्वमेव किं तेषामाहोस्विद्वाच्यत्वमपीत्याह॥ सवाचको विशेषा
णां संभवाद्द्योतकोऽपि वा॥ शक्त्याधानाय धातोर्वा सहकारी प्रयुज्यते॥ [१९०] केवलं न द्योतका यावद्वाचकाश्चापि दृश्यन्ते। यथा प्रतिष्ठत इत्यादौ धातो रा०
४१

गतिनिवृत्तिवाचकत्वं प्रेण तु गतिवाचकत्वं व्यवस्थाप्यते। तथा चोक्तं। धात्वर्थं बाधते कश्चिदिति। संभवा द्योतकोऽपि वैसेन दादावेव कारिकायां व्या
ख्यातः। अथ तत्तीयमपि पक्षं दर्शयितुमुक्तं शक्ता धानायेत्यादि। संभूय धातूपसर्गौ वर्थमाहतुरिति शङ्कित्वा त्वमुपसर्गः कुतनद्दत्यर्थाभिधाने सहका
रिणः उपसर्गाः। अत्रापुक्तं कश्चित्तमनुवर्तते इति। प्रतिष्ठते इत्यादौ प्रसिद्धा धातोर्गतिनिवृत्तिवाचकत्वे उपसर्गस्य गतिवाचकत्वं स्थापितं। इदानी
मनुमानेन द्योतकत्वमेव सर्वत्रास्य व्यवस्थापयितुमाह॥ स्थ्यादिभिः केवलैर्यत्त्वगमनादि न गम्यते। तत्रानुमानाद्विविधात्तद्धर्मा प्रादिरुच्यते। १९
तिष्ठतिर्गतिनिवृत्तिं प्रसिद्धामिदधाति। अतः केवलेनैतेन गमनं न प्रतिपाद्यत इत्यनेकार्था धातव इति कृत्वानुमानाद्गतिवाचकत्वमपि तस्य
व्यवस्थाप्यते। उपसर्गस्तु न द्योतक एव। गतिनिवृत्तौ तु प्रसिद्धत्वात्तिष्ठतेः प्रशब्दस्य गतिवाचकत्वमुच्यते। वस्तुस्थित्या त्वनुमानेन प्रादेर्द्योतक
त्वमेव सामान्यतो दृष्टेन विशेषतो दृष्टेन चेत्याह। आनयेत्यादि। धातुरनेकार्थः उपसर्गश्च द्योतक इत्यनुमानेन व्यवस्थाप्यते। द्विविधमनुमानं भ
वति। विशेषतो दृष्टं सामान्यतो दृष्टं चेति। तत्राविशेषेणोपसर्गाणां द्योतकत्वं। तथा च प्रशब्दो धर्मी॥ आदिकर्मद्योतक इति साध्यो धर्मः प्रशब्द
त्वात्। पूर्वोदितप्रत्यादि दृष्टप्रशब्दवदिति विशेषतो दृष्टेनानुमानेन तद्धर्मप्रशब्दस्य समानधर्माः सर्वेऽपि प्रादिरुपसर्गाः [illegible] द्योतकत्वधर्मयुक्ता
उच्यत इति। धातुश्च सामान्यतो दृष्टेनानुमानेनानेकार्थः। यथा। तिष्ठतिर्द्धर्मी॥ अनेकार्थ इति साध्यो धर्मः॥ धातुत्वात्। उभयवादिसंमतयजत्या

४२ घ्नेकार्थधातुवर्तिनि। एवं सामान्यतो दृष्टानुमानात्तद्धर्मिणो धातुरप्यनेकार्थ उच्यत इति योजना। इदानीं संभवपार्थाभिधायकत्वमपि दर्शयितुमा
४२ ह॥ ॥ अप्रयोगेऽधिपर्योस्त्वयावद्दृष्टं क्रियान्तरांतस्याभिधायको धातुः सहताभ्यामनर्थक ॥ अध्यागच्छति पर्यागच्छतीत्यत्राधिपरी अनर्थकावागच्छ
तीत्यस्मादेवोपरिभावविशिष्टस्य वा सर्वतोभावविशिष्टस्य वाप्यागमनस्य प्रकरणादिनावगतत्वात्। लौकिकशब्दव्यवहारे लाघवे प्रसना
दादिति स्पष्टार्थमेवाधिपर्योः प्रयोगः॥ समुदाय एव विशिष्टार्थाभिधायक इत्यधिपर्योः केवलयोर्धातोश्चाऽत्रानर्थकत्वमनर्थान्तरवाचित्वमित
र्थः। अतो धातूपसर्गौ संभूयैवार्थविशेषं ब्रूत इति धातोरर्थाभिधाने सहकारिणा उपसर्गाः। उपसर्गाणां हृद्धितोऽर्थवत्त्व एव तावधिपरी अनर्थकावि
ति केवलानर्थकतया। न हि तयोरुपसर्गयोः केवलयोस्तत्रार्थोऽस्ति। अत एवोक्तं कश्चित्तमनुवर्त्तत इति। प्रसंगात्स्वार्थिकमनयानोस्वरूपमाह॥ ॥ तेष्वे
वस्वार्थिकाः केचित्संघातान्तरहेत्वयः। अनर्थकेन संसृष्टाः प्रकृत्यर्थानुवादिनः। यावकइत्यादौ कनाद्यः संभूयैवार्थबोधकाः बोद्धव्याः। यावशब्दा
त्केवलात्स्वार्थे गवकन्प्रकृति यावशब्दो व्यवसित इति संघातान्तरहेतुत्वमस्तीति बोद्धव्याः। अत एवाह। अनर्थकेन संसृष्टा इति। यावशब्दः कन्प्रकृति
रनर्थक एव। समुदायस्य परस्परं शक्त्या हि न विशेषस्तत्रार्थवान्तनासंभूय स्वार्थमाहेत्याह। प्रकृत्यर्थानुवादिन इति। ननु प्रकृतिभागस्येदानीमेवा
नर्थकत्वमुक्तं। अतः कथं प्रकृत्यर्थानुवादिन इत्युच्यते। साहश्यमात्रादित्यभिप्रायः। कन्प्रकृतिकेवलयावशब्देन सदृशमभिमन्यत इति। ४२

तदभिप्रायेण प्रकृत्यर्थानुवादिन इत्युक्तं। वस्तुतस्तु संघातानांतरहत्तय इत्येव बोद्धव्यं। १६३ अथ निपातानामनेकार्थत्वेन स्वरूपं प्रदर्शयितुमाह॥ ॥ निपाता द्यो-
तकाः केचित्पृथगर्थाभिधायिनः। आगमा इव केऽपि स्युः संभूयार्थस्य वाचकाः॥ १६४ तेषामुपसर्गवद् द्योतकत्वं क्वचित्प्रयोगे ऽवक्षश्च लक्षश्च सादेश्चादेर्नो।
केवलानां च केषांचित्पृथगर्थाभिधायित्वे वाचकत्वमेव सिद्धमित्याह। केचिदित्यादि। केचिन्निपाता आगमवत्संभूय वाचकाः। तद्यथा येषां पृथगर्थ-
प्रकल्पनं इति पाठः। तेषां मते निपातानां द्वैविध्यं। केचिदर्थवंतः केचिदनर्थका इति। तत्र केचिन्निपाताः पृथगर्थप्रकल्पनेऽसत्यर्थाभिधायिनः।
तेनो द्योतका इत्यर्थवतां स्वरूपकथनं। ये त्वनर्थकास्तेषां स्वरूपमाह। आगमा इत्यादि। १६४ तथा च लौकिके प्रयोगेऽनियम इत्याह॥ ॥ उपरिष्टात्पुरस्ता-
द्वा द्योतकत्वेन भिद्यते। तेषु प्रयुज्यमानेषु भिन्नार्थेष्वपि सर्वथा॥ १६५ पूर्वं पश्चाद्वा प्रयुक्ताः सन्तः अर्थद्योतनं कुर्वंतीति। तेषु विकल्पसमुच्चयाद्यर्थेषु द्योतक-
त्वमेव प्रयुज्यमानेषु स्थितौ। अथ वाचका एव कस्मान्नोच्यंते। किं द्योतकत्वेनेत्यर्थद्योतकत्वं द्रढीकर्तुमाह॥ ॥ चादयो न प्रयुज्यंते पदत्वे सति
केवलाः। प्रत्ययो वाचकत्वेऽपि केवलो न प्रयुज्यते॥ १६६ एते हि चादयः केवला न प्रयुज्यंते। ततो वाचका न भवंतीति बोद्धव्यं। चादयो धर्मी॥ वाचका
न भवंतीति साध्यो धर्मः। केवलानामप्रयोगात्। यदि हि वाचकाः स्युस्तदा गवादिवत्केवलानामपि तेषां प्रयोगः स्यात्। इत्यनुमानं। नन्व-
त्र प्रत्यनुमानमस्ति। चादयो धर्मी द्योतका न भवंतीति साध्यो धर्मः केवलानामप्रयोगात्। प्रत्ययवत्। तत्राह। पदत्वे सतीति। एतदुक्तं भवति।

४३ 43 नन्निर्विशेषणायं हेतुरपि तु पदत्वे सति केवलानामप्रयोगात् । योनकार एतद् इति पदत्वे सतीत्यनेन प्रत्ययव्यावृत्तिः । एतदेव दर्शयितुमाह ॥ प्रत्ययो वा
चकत्वेपीत्यादि । प्रत्ययस्य कस्यचिद्वाचकत्वेपि पदत्वाभावात् केवलस्याप्रयोगः ॥ अथ शब्दशक्तिस्वाभाव्याच्चादिपदस्यासत्त्वभूतोर्थः द्योत्यगर्भः
नद्वाचकत्वाद्वाचकत्वं व्यवस्थाप्यते । न तदनुपपन्नं । शक्त्यनुग्रहाद्यथा तदर्थवाचकानां समुच्चयादीनां प्रयोगे षष्ठी प्रयुज्यते । वृक्षस्य समुच्चयः
प्लक्षस्य समुच्चय इति न तु निपातप्रयोगेपि षष्ठी प्रयुज्यते । वृक्षश्च प्लक्षश्चेति । स्यादेवं यदि समुच्चयाभिधायकाः स्युः न चैवं । किं तर्हि समु
च्चितानामभिधायिन एतद्रूपस्युच्यते तदभिधाने च व्यतिरेको नास्तीत्याह ॥ ॥ समुच्चितताभिधानेपि व्यतिरेको न विद्यते ॥ यद्येवं समुच्चितस्य सत्त्वभू
तस्याभिधानेऽसत्त्व इति प्रतिषेधान्निपातसंज्ञाया अभावेन तद्धर्मविकाया अव्ययसंज्ञाया अभावाच्चादेरपि विभक्तेः श्रवणं प्राप्नोतीत्याह ॥ ॥
असत्त्वभूतो भावश्च ॥ एतदुक्तं भवति इह शब्देरर्थाभिधाने स्वाभाविकमिति स्थितं ॥ अत्र निपाताः शब्दशक्तिस्वभावादेवासत्त्वभूतार्थाभि
धायिनः प्रतीयंत इति सनिदर्शनमाह ॥ ॥ क्रियान्येनाभिधीयते ॥ अत्रयपेत्तनुषंगः । यथा पाक एवोभयत्र नामपदस्याख्यातस्य च वाच्यः
शब्दशक्तिस्वाभाव्यात्तु पचतीत्याख्यातेनासत्त्वभूतो सावभिधीयते । पाक इत्यत्र नामपदेन परिनिष्ठितसत्त्वभावसिद्ध इति । तद्वन्निपातेः समुच्चि
तादेरसत्त्वभूतस्याभिधानमिति न विभक्तेरुत्पत्तिः ॥ उक्तं चानेदं वाचनिकं लिंगसंख्यादि स्वाभाविकमेवातः यथा समानमधीयानानां केचिद ४३

२९७

र्थैर्युज्यंते। अपरे नेति। एवं वाचकत्वात्समुच्चिताभिधानेप्याख्यातपदवद्समत्वमनार्थाभिधायित्वाद्विभक्तेरभावः। अस्त्वेवमपि समुच्चिताभिधायि
त्वाद्यथाख्यातेत्राणां तदभिधायकानां विशेषणेन योगलक्षणानि पातानामपि स्यात्तु अच गुणवचनानामाश्रयतो लिंगवचनानि भवंतीत्यसत्त्व
वाचकत्वाद्विभक्त्यभावात् शोभनचवृक्षः इति प्राप्नोति। तथा चान्यत्रोक्तं। प्रतिप्रयोगं जातं गे संबंधमुपगच्छति। विशेषणानां नेतो धर्मी ज्ञातिः स्यान्न न्३
ति पद्यते। ततश्चपंचालाजनपदो बहुधनो रमणीय इति भवति। अथ लिंगेन स्पविशेषणानां जातेः ततः पंचालारमणीया बहुधनाजनप
दा इति भवति। एतदाशंकासमर्थयितुमाह॥ ॥समुच्चिताभिधानेपि विशिष्टार्थाभिधायिनां गुणैः पदानां संबंधः परत्वात्सत्वाद्यः। गुणो विशे
षणैः पदानां विशिष्टार्थाभिधायिनां गुणै[illegible] संबंध उपपद्यते। निपातानां तु शक्तिस्वाभाव्यात् सत्त्ववाचित्वेपि नियतपरत्वे त्वाद्विशेषण
योगो नास्ति। तेन कश्चिद्दोषः। एतदुक्तं भवति तदपि शक्तिस्वाभाव्यमेव यत्तेषां नित्यपरत्वे त्वलिंगनामेति ते समुच्चिताभिधानेपि न केवलः प्रयो अ४
+१९८+३ गो नापि विशेषणसंबंध इति स्थितं। एवं च नामाख्यातोपसर्गनिपातलक्षणं पदचतुष्टयं व्याख्यातं। अथ कर्मप्रवचनीयाः पंचमं पदमस्युप
गतमिति तद्विचारयितुमाह॥ ॥जनयित्वा क्रियां काचित्संबंधं विनिवर्त्तते। श्रूयमाणे क्रियाशब्दे संबंधो जायते क्वचित्॥ संबंधावच्छेदहेत
वः कर्मप्रवचनीया इष्यंते यथा वृक्षं प्रति संबंधस्य भेदकाः इति। संबंधश्च सर्वः क्रियाकारकपूर्वको भवति। तत्र क्वचित्संबंधं जनयित्वा क्रिया वि

४४ निवर्त्तते। यथा राजपुरुष इति। अत्र हि राज्ञः पुरुषोऽयं स्वाम्यस्मात् राजा पुरुषं बिभर्त्ति। अतो भरणलक्षणा क्रियाऽऽश्रयाश्रयिभावलक्षणं संबंधं
जनयित्वा निवृत्ता। क्वचित् क्रियापदस्य समाणां संबंधमुपजनयति। यथा मातुः स्मरति। अत्र हि मातुरिति कर्मपदं। अतो मातृसंबंध
स्मरणमिति निमित्तनिमित्तिभावलक्षणं संबंधं स्मरतिक्रियाप्यसमाप्तो वजनयति। एतदेवान्तर्तोक्तं। संबंधः कारकेभ्योऽन्यः क्रियाकारकपू
र्वकः। श्रुतायामश्रुतायां वा क्रियायामसौ अभिधीयते इति। संबंधसामान्ये षष्ठी विभक्तिरुक्ता षष्ठी शेष इति। यद्येवं मातुः स्मरणं सर्पिषो स्तान
मित्यादौ सिद्धैवानेन षष्ठीति किमर्थमधीगर्थदयेशां कर्मणीत्यादिप्रकरणारंभ इति प्रसंगाद्विचारयितुमाह॥ ॥ तत्र षष्ठी प्रतिपदसमा
सस्य निवृत्तये। विहिता दर्शनार्थं तु कारकं प्रस्तुदाहृतौ। मातुः स्मरणमित्यादौ कर्मणि शेषत्वेन विवक्षिते सिद्धैव षष्ठी। ति पुनः प्रतिपद्य
नाधीगर्थदयेशादिना या षष्ठी विहिता सा नियमाय भवति। कर्मादौ शेषत्वे न विवक्षिते षष्ठ्येव भवति यदन्यत् प्राप्नोति तन्निषिध्यते।
किं चान्यत् प्राप्नोति। लुगादि। तच्च नितरां नोच्छेदनेन विना न लुगादि निवृत्तिः। कर्तृशक्तेति समासनिवृत्तिरेव क्रियते। ततः तत्स्थष
ष्ठ्येव भवति। यदन्यतः षष्ठ्यां प्राप्नोति समास लुगादि प्राप्नोति तन्निवार्यते इत्यतः प्रतिपदं पुनः षष्ठी समासस्य निवृत्तये विहितेति बो
द्धव्यं। अत एव प्रतिपदविधाना च षष्ठी न समस्यत इति नारभणीयमेवायद्येवं कर्मणीति किं मातुर्गुणैः स्मरणमिति कर्मप्रस्तुदा ४४

हृतो मघया गुणानां स्मर्तैवत्वस्यासंभवः तस्याशेषत्वस्यापि यदि शेषत्वेनास्य विवक्षिताः स्युस्तदा तेषां षष्ठी स्यान्नान्तृतीया न भवेत् । नन्वत्र
ह्यङ्गवैकल्पमेनस्येनेन तदाशंकाहा दर्शनार्थत्वेन्मादिमातुर्गुणानां स्मारणमित्युक्ते संदिह्यन्ते गुणाः कर्म करणं वेति । तत्रोक्तं गुणैः
स्मरणमिति गुणैरिति करणं यदाशेषत्वेन विवक्ष्यते तदा प्राप्तिपदविधानात् षष्ठी मा भूदित्येवमर्थं कर्मणीत्युक्तमिति ह्यङ्गवैकल्पाभा
वः । पुनः षष्ठीविधानं समासादिनिवृत्त्यर्थमेवेति स्थितम् । उक्तं च ॥ साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः । प्रोक्ताप्रतिपदं षष्ठी समासस्य
निवृत्तये इति ॥ साधनैर्व्यपदिष्टे शेषसंबंधस्तदर्थः । एवं कर्मणोऽपि शेषत्वेन विवक्षिते षष्ठी कारकान्तरे त्वेकैवेति वृत्तिकारः । तेषाम
ते गुणैः स्मरणं न तु गुणानां स्मरणमिति कदाचिदपि षष्ठी । टीकाकारमतेन तु करणस्य शेषत्वविवक्षायां गुणानां स्मरणं गुणैः स्मरण
मित्यपि भवतीति मतभेदः । एवं क्रियया संबंधो जन्यत इति स्थितं ततः किमित्याह ॥ ॥ स चोपजातः संबंधो विनिवृत्ते क्रियापदे । कर्मप्रव
चनीयेन तत्र तत्र नियम्यते ॥ स च क्रियया उपजनितः संबंधः तस्मिंश्चोपजाते यदा क्रियापदं क्वचिन्न प्रयुज्यते तदा क्रियाजनितो यस्मादिति
संदेहे कर्मप्रवचनीयेन तत्र तत्र तस्याः क्रियाया नियम्यत इति संबंधविशेषः कर्मप्रवचनीयैः प्रत्याय्यते । अत एव कर्मप्रोक्तवन्तः क्रिया

४५ कृतं विशेषसंबंधं द्योतयंतीति कर्मप्रवचनीया उच्यंते। अथ येऽप्रयुज्यमाणायाः क्रियायाः आक्षेपकाः कर्मप्रवचनीयाः कस्मात्ते नाश्रीयंत इत्याह।।
45 येन क्रियापदाक्षेपः स कारकविभक्तिभिः। युज्यते विपर्ययात्तस्य लिखा वा वनुपसर्गता। इह येन शब्देन क्रियापदस्याक्षेपः क्रियते स कारकविभ
क्त्या युज्यत इति दृश्यतां यथा प्रादेशं विपरिलिखतीति। अत्र विशब्दो मानक्रियाया आक्षेपकः। प्रादेशं विमाय परिलिखतीत्यर्थो ऽवगते
त तेनो विमानक्रियया तत्र प्रादेशलक्षणं कर्माक्षिप्तमिति तस्य कारकविभक्त्यैव द्वितीयया योगः। यदा च क्रियांतराक्षेपको विशब्दस्तदा
स्य लिखतसंबंधात्तं प्रत्यनुपसर्गत्वमेवानंतरमस्य गतिर्गतावितिनिघाताभावः। न तु कर्मप्रवचनीयैर्यदि क्रियापदमाक्षिप्यनं तदा तद्यो
गे कारकविभक्तिरेव स्यात् तेन तस्य कर्मप्रवचनीययुक्ते द्वितीयेति नारंभणीयमेव स्यात्। किंतु संबंधसामान्ये षष्ठी स्यादेवेति तद्बाधनाय द्वि
तीयारंभेनानदारंभः शोभते। क्रियापदाक्षेपकत्वमन्यत्रापि दृष्टमिति तद्देव दर्शयितुं कुर्वन्नाह।। तिष्ठतेरुपयोगश्च दृष्टोऽप्रत्यस्तजयत्रितीत्यत्र
प्रत्य जयत्रित्यत्र प्रतिशब्दः स्थितिक्रियाया आक्षेपकः परिदृष्टः देवाश्च सुरानः प्रतितिष्ठतः प्रतिष्ठामलभमानानजयत्रिति तिष्ठतेरु
पयोगः आक्षेपः परिदृष्टः। न ह्यधातुना संबंधेऽपि मुन्वंतीत्यत्राभिशब्दस्य केवलस्य चाभिमुख्येऽद्वृत्तिः परिदृष्टेति प्रसंगादाह।।। मुन्वंतीत्या ४५

स्यसंहितामनुप्रावर्षदित्यत्रापि॥ तत्रहेतुहेतुमद्भावलक्षणव्यतिरेकव्यवच्छेदेऽनुनाह्रते हेतुनतीयैवपरत्वा ६

भिमुखेभिः केवलोपिप्रयुज्यते। तदेवं कर्मप्रवचनीयानां संबंधनियामकत्वमन्वर्थसंज्ञाश्रयेणैव स्थापितो। अप्रत्यस्वत्यादीनां तद्रूपत्वासंभवे ॥२०४॥२
कथं कर्मप्रवचनीयसंज्ञा स्यादित्याह॥ ॥कर्मप्रवचनीयत्वं क्रियायोगे विधीयते। षत्वादिविनिवृत्त्यर्थं स्वत्यादीनां विधर्मिणां॥ अत्र स्वत्या
दीनां कर्मप्रवचनीयत्वं विधीयते तेसंज्ञान्तरव्युदासायेवेत्यनर्थकं संज्ञाधिकारात्कृत्स्नुपसर्गसंज्ञाभावेनहाअयं षत्वादिकमुपसर्गादित्या
दिना न भवति॥ अन्यदपि प्रसंगादाह॥ ॥हेतुहेतुमतोर्योग परिच्छेदेऽनुनाह्रते। आरंभाद्बाध्यते प्राप्तास्तृतीयाहेतुलक्षणां॥ लक्षणेत्थंभू
तेत्यादिना सिद्धो नोः कर्मप्रवचनीयसंज्ञा। लक्षणं हि ज्ञापकं यथा तथा हेतुरप्युच्यते। ततश्च यथा ज्ञापकभावे वृक्षमनुविद्योत
ते विद्युदित्यत्रानोः कर्मप्रवचनीयसंज्ञा तथा शाकल्यस्यामीति। तथा च तृतीयाया अवकाशः धनेन कुलमित्यादि लक्षणेत्थंभू
तेत्यस्यावकाशोऽनुज्ञीपज्ञापकभावलक्षणस्य संबंधस्यावच्छेदकः। यथा वृक्षमनुविद्योतते विद्युदिति। इहोभयं प्राप्नोति। शाकल्य
स्यसंहितामनुप्रावर्षदिति। अत्र हेतुमद्भावसंभवात् तृतीया प्राप्नोति परत्वात्। अनुर्लक्षणे इति पुनर्विधानात्तन्न भवति। २०५ एवं कर्मप्र
वचनीयानां प्रासंगिकं विचारं कृत्वा वाचकत्वादिप्रकारत्रितयनिराकरणेन संबंधविशेषकत्वमेव व्यवस्थापयन्नाह॥ ॥क्रियाया
द्योतको नायं संबंधस्य न वाचकः। नापि क्रियापदाक्षेपी संबंधस्य तु भेदकः॥ २०६॥१ प्रपचनीत्यादावुपसर्गवन्नायं क्रियाद्योतकः षष्ठ्याप

हेतु ३

४६ वाद्भूतया चद्योतीयमेवोक्तः संबंध इति नतस्य कर्म्मप्रवचनीयो वाचकः। नापि प्रादेशं विप्रलिखतीत्यादौ विशब्दवत् क्रियापदस्याक्षेपकः
46 ॥ किंतर्हि विशिष्टक्रियाजनितोयं संबंध इति संबंधस्य भेदको विशेषकः कर्मप्रवचनीयः। इत्येवमपोद्धारप्रसंगेन पंचधा पदविभागः प्रद
र्शितः। एवं दर्शितपदप्रविभागमर्थेन त्वसमपंचपदार्थभेदमुपपादयिष्यतीति। यथा द्विधा केश्चिन्त्यदेभिन्ने चतुर्द्धा पंचधापि चा अपोद्धृ
त्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्पदार्थानामपोद्धारे ज्ञातिवीद्रव्यमेववेत्यादि। एवमखंडवाक्यवादिनोपोद्धारसमाश्रयेण प्रासंगि
कादिकार्यसमर्थने विहिते तत्प्रसंगात्पदपदार्थपदभागपदभागार्थविचारः कृतः। निरुक्तकारवचनानुसारेण च नामाख्यातोपसर्ग
निपातलक्षणप्रदर्शने कृतो कर्मप्रवचनीयाः पंचमं पदजातमिति केचित्प्रतिज्ञाननत इत्यत्रदपि प्रदर्शितः। एवं च दूषिते सुपरपक्षे
स्वपक्षे च दूषणनिराकरणपूर्वकं स्थापिते पुनरप्यखंडपक्षमेव समर्थयितुकामो वार्त्तिकविरोधमाशंक्याह॥ ॥ अनर्थकानां सं
घातः सार्थकोनर्थकस्तथा। वर्णानां पदमर्थेन युक्तेनावयवाः पदे। किंचापदानामर्थयुक्तानां संघातो भिद्यते पुनः। अर्थान्तरावरो
धेन संबंधविगमेन च॥ अर्थान्तरस्य संसर्गलक्षणस्यावरोधेन परिग्रहणेन कश्चिदेव देवदत्त गामभ्याजेत्यादिकः पदसंघातोर्थ
वान्न कश्चित्तु दशदाडिमादिः परस्परसंबंधविगमेनानर्थक इति संबंधाद्यपेतः। तदेवदर्शयितुमाह॥ सार्थकानर्थकोभेदसंबंधं ॥४०॥
४६

२०९
नाधिगच्छति। अधिगच्छतीत्यन्ये कुटीरादिनिदर्शनात्॥ भेदे क्रियमाणे समितियो वर्णसमुदायो सार्थकोऽनर्थको यथा कुटीरशब्दे कुटी
शब्दे रशब्दश्च तेषां संबंधमनर्थकत्वान्नाधिगच्छतीति केचित्। अन्ये नार्थो नार्थवत्त्वात्परं संबंधमधिगच्छतीत्याहुः। संघातार्थव
त्त्वादवयवार्थवत्त्वमपि दर्शयितुमाह॥ ॥ अर्थवन्तो विशिष्टार्थाः संघातउपजायते। नोपजायत इत्यन्ये समासस्वार्थिकादिषु। २१०
राजपुरुष इत्यादावर्थवन्तः संघातोऽर्थवानुपजायते। स्वार्थिकादिषु त्ववयवार्थप्रकृतिकमर्थान्तरं नाविर्भूतमिति नास्त्यवयवा
र्थव्यतिरिक्तसंघातार्थसंभवः। द्विविधरूपतयावस्थितास्त इत्याह। केचित्तु पुनः सिद्धार्थाभेदे निर्ज्ञातशक्तयः। अन्वयव्यतिरेका
भ्यां केचित्कल्पितशक्तयः॥ पुनः सिद्धार्था येषां ते तथाविधाः। यथा शमीवृक्षो दाडिमीवृक्ष इत्यादयः। कस्मादेवमित्याह। भेद इसा
दिभेदे वाक्ये सति रूपस्याऽविनष्टत्वात्पृथगेव निर्ज्ञातशक्तयः। केचित्तु पुनरश्वादयोऽन्वयव्यतिरेकाभ्यां कल्पितशक्तय इति। अ
श्वहि प्रगते जानुनी यस्य संगते जानुनी यस्येति प्रसंभ्यां जानुनोर्ज्ञुरिति लक्षणानुगमे नार्थः कल्प्यः। ननु पृथगेवावाको हृष्टस्य जा
नुशब्दस्य नष्टत्वान्नातस्मात्संघातार्थवत्त्वादिति भागाः सिद्धमनेकान्तिकं च बोद्धव्यं यदप्युक्तं अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्यय +२११+२
निपातानामेकवर्णानामर्थदर्शनादिति। तत्राह॥ शास्त्रार्थ एव वर्णानामर्थवत्त्वे प्रदर्शितः। धात्वादीनां विशुद्धानां लौकिकोऽर्थो न

४७ विद्यते। [२१२] इत्तद्दिना नामपर्थश्च केवला नाम लौकिकः। यात्विमके लदंतस्पतथैवार्थो न विद्यते। [२१३] अभिव्यक्ततरो योऽर्थः प्रत्ययांतेषु लक्ष्यते। अर्थवन्ना
47 प्रकरणाद्दाश्रितः सतथाविधः [२१४] वर्णानामर्थवत्त्वाभ्युपगमे पदवाक्ययोरभिधायकता भज्यते साह॥ आन्यभेदेन चेत्कश्चिद्धर्मेऽभ्युपद्वा
कायोः। अन्योन्यापेक्षयाशक्ता वर्णाः स्याद्दभिधायकः [२१५] सबोधं॥ इदानीमतत्भेदं प्रदर्शयितुमाह॥ वर्णेन केन [redacted] चि न्यूनः संघातो योऽभि
धायकः। न चेच्छब्दांतरमसावन्यूनत्वेन गम्यते। [२१६] यदि केनचिद्वर्णेन न्यूनः संघातः इष्यते रश्मिसाहाव्यमभिधायकत्वहाइयीगतिः शब्दांतरत्व
मेकशब्दत्वं वा यदि न शब्दांतरत्वमिष्यते रश्मिसस्पतहान्यूनवर्णोपि प्रसवर्णोनिष्कर्तारइति शब्द एव गम्यते। तस्मात्त्वार्थप्रतीतिरिति बोद्धव्या। [२१६]॥
एतदेव प्रतिपादयितुमाह। सतस्मिन्वाचके शब्दे निमित्तान्त्स्मृतिमादधता साक्षाद्दिव्यवहितं शब्देनार्थमुपोहते। [२१७] यदि केनचिद्वर्णेन न्यूनः
सन्न्यूनवर्णः पूर्वप्रसर्णो शब्दे वाचकत्वेन निमित्तात्स्मृत्यभ्यासात्स्मृतिमुपनयन साक्षाद्दिव्यवहितम [redacted] प्यर्थशब्देन स्मृत्युपस्थापितेनोपोह
ते समर्थप्रतीतिः। अथ शब्दांतरत्वं न दाय यथापूर्वं सर्ववर्णो वाचकत्वं यथा तस्तेबंधात न्यूनवर्णोपी नि नकश्चिद्विशेषः [२१७] तस्मात्सदावयवानां
न दर्शप्रतिपादनमनुपपन्नमेवेति प्रतिपादयितुमाह। [२१८] पदवाच्योयथानार्थः कश्चिद्ध्रेरवरादिषु सत्स्वपि प्रसयेन तं ते समुदायेन गम्यते [२१८]॥
समान्विन इवार्थात्मापदार्थैर्यः प्रतीयते। पदार्थदर्शनं तत्र तथैवानुपकारकं। [२१९] गौरश्वः इत्यसर्पइस्मादोयथा नेव पदानां वाच्यः कश्चिदर्थो [२२०]
४७

ऽस्ति सत्यपि वा तच्छ्रवणकाले तदर्थप्रसङ्गे योगोऽपवरः । तस्मिन् समुदायेऽर्थे ते सर्वथा नैवायमर्थो गम्यते । ज्ञातं तत्र मेवहि पदार्थसंस्पर्शमात्रविरहितं समुदा
यान्तरावगतेस्तथैव देवदत्तगणमम्याजेत्यादिभिः पदार्थैर्यः प्रतिभालक्षणोऽर्थः समन्वित इव परमार्थतस्तु निर्विभागः पानकरसादिवत्प्रतीयते ॥
तत्र पदार्थदर्शनमवयवार्थप्रतिभासोऽनुपकारक एवमेतत्प्यः । यदि चैतन्नाभ्युपगम्यते तदा समुदायावयवयोर्भिन्नार्थत्वे सति द्वित्वो समकाले ऽ
विरुद्धधर्मसंसर्गः प्राप्नोतीति पदवादिमतं दूषयितुमाह ॥ ॥ समुदायावयवयोर्भिन्नार्थत्वे च वृत्तिषु युगपद्भेदसंसर्गौ विरुद्धावनुषज्येयातां । वृ
त्तिषु समासादिकासु तुल्यकाले समुदायेन पांसूदकवदविभागापन्नस्यार्थस्य प्रतिपादनात्संसर्गः समासार्थः पदेभ्यश्च भिन्नस्यार्थस्य प्रतीतेर्भे
दः संसर्गौ विरुद्धौ युगपत्प्रसुतः । न चैतद्युक्तं प्रतीतभावादिति । पदपदार्थानां च सत्त्वे धवादीनां वाक्ये साधनाभिधायित्वं प्राप्नोतीति न चैतत्
दृष्टं साधनाभिधायकत्वेन सत्त्वं त्वाप्णोतेषां प्रयोगादर्शनादित्याह ॥ कश्च साधनमात्रार्थान् धवादीन्नाकल्पयेत् । अप्रयुक्तपदश्चार्थो बहुव्री
हौ कथं भवेत् । अधिस्त्र्यादौ समुदायस्याधिकरणवृत्तित्वं परिदृष्टं न कदाचिदप्यवयवस्येति । यदि च पदानि सत्यार्थानि विद्यन्ते तदा बहुव्रीहावर्था
नावकल्पेतेत्याह । अप्रयुक्तेत्यादि । चित्रगुरित्यादावयवानां सत्यार्थत्वे चित्रशब्दस्य गुणः कश्चिदभिधेयो गोशब्दस्य गोजातयः काश्चिदिस प्र
युक्तं वाचकं पदं यस्यासावप्रयुक्तपदो देवदत्तार्थः कस्याभिधेयः स्यात् । यदि चावयवानामर्थवत्त्वं स्यात्तदा प्रज्ञुः संज्ञुरित्यत्रापि ज्ञुशब्दस्यार्थः पृथ

४८ 48 गुपलम्भेनानन्वोपलम्भत इति मतिं प्रतिपादयितुमाह॥ ॥ प्रत्युसंस्कारावयवैर्न चास्त्यर्थावधारणं॥ उपसंहर्तुमाह॥ तस्मात्संघात एवैको विशिष्टार्थनिबंधनो २२२
तस्मात्समासेषु विरुद्धार्थोपस्थापनाद् धवादीनां साधनमात्रार्थवृत्तित्वासंभवाद् द्वन्द्ववृत्तेरर्थस्यासंगतेः प्रत्युसंस्क्रि सादावयवार्थानुपलम्भादित्यु
पपत्तिचतुष्टयेन समस्तार्थानां पदानामनुपपत्तेः संघात एवैको ऽखंडः प्रविभागशून्यः स्फोटात्मा विशिष्टस्य प्रतिभात्मकस्यार्थस्य निबंधनम
भ्युपगंतुं युक्त इति सिद्धो संघातसाधर्म्याच्च स्फोट एवात्र संघातशब्देनोक्तः। संघातो ह्यवयवैराच्छुरित इति संघातसाधर्म्यं २२२। इदानीमखंडवाद्या
न्तीयपक्षे परकीयचोद्यसम्भवमाशंक्य क्रमेण समर्थयितुमुपक्रमते। तथा च यदि पदार्थो नैव विद्यते तदा देवदत्त पचतीत्विस्मृमित्राभोज्यंतामि
त्यत्र द्वंद्वे ह्येनेक एवाखंडः समुदायो वाक्यार्थाभिधायी तेन तत्रावपदार्थभेदस्यानभ्युपगमादेकत्वे च सति बहुवचनं नोपपद्यते इत्याशंक्य समर्थयि
तुमाह॥ ॥ गर्गा इत्येक एवायं बह्वर्थेषु वर्तते। द्वंद्वसंज्ञोऽपि संघातो बहूनामभिधायकः॥ २२३। यथा गर्गस्यापत्यानि बहूनि गर्गा इत्यत्रैकशेषकृते
गर्गशब्द एक एव निरस्तावयवविभागो बह्वर्थवृत्तित्वाद्बहुवचनांतस्तथैव द्वंद्वसंज्ञः संघातो निरस्तावयवभेदोऽपि शब्दः शक्तिमाहात्म्याद्बहुत्व
मभिधत्त इति। सत्यपि बहुवचनेनाभिहितार्थत्वे वाक्यार्थातिरेकेण पदार्थासंभवान्न्यूनेकैकवाक्यपरिसमाप्तियोगात्समुदायस्य च युगपत्सेचनक्रि
यासंभवाद्वाक्यार्थस्यानुपपत्तिरित्याशंक्य समर्थनार्थमाह॥ ॥ यथैकदेशेमुष्यादिः प्रत्येकमवतिष्ठते। क्रियेवं द्वंद्ववाच्येऽर्थे प्रत्येकं प्रविभज्यते २२४ ४८

पदार्थसद्भावः॥ २२३॥ अथ धवखदिरपलाशाः सिच्यंतामित्यत्र वाक्यार्थव्यतिरेकेण २

स्फुरितो भवति स्फोट आपि ध्वनिभि ग ४

ब्राह्मणाभोज्यंतामित्यत्रयथाविनापिवाक्यार्थव्यतिरेकेणपदार्थसद्भावंपदार्थानांभुजिक्रियाप्रत्येकमवतिष्ठते।तथाद्वंद्ववाक्येसमुदायलक्षणोऽर्थःप्रत्ये
केनविभज्यतइतिनकश्चिद्दोषः।एतदुक्तंभवति।ब्राह्मणाभोज्यंतामित्यत्रयथासत्यामपिसमुदायप्रतिपत्तावपोद्धारबुद्ध्याप्रकल्प्यावयवान्प्रत्येकंभु
जिक्रियासमाप्यते।तथैवद्वंद्वात्समुदायेप्रतिपन्नेबुद्धिपरिकल्पितमविभागसमाश्रयणेनप्रत्येकंवाक्यपरिसमाप्तिर्बोद्धव्या।पुनरप्याशंकापरिहर्तु
माह॥यत्तुद्वंद्वपदार्थस्यतत्त्वेनव्यपेक्षणात्।सापिव्यावृत्तरूपेऽर्थेसर्वनामसरूपता॥द्वंद्वान्तर्वर्तिनःपदार्थस्यवाक्यार्थव्यतिरेकेणासंभवात्सर्वनाम्नाप
रामर्शोनोपपद्यते।प्रधानपदन्तरद्वयोरित्यत्रहितेनपदार्थत्त्वेनपरामृष्टत्वात्तस्मादेवावधिभूतात्प्रत्ययःप्रयुज्यते।वाक्यार्थव्यतिरेकेणासन्निवप
दार्थःकथमसतःसर्वनाम्नाक्षेपणमितिपराभिप्रायमनूद्यसमाधत्ते।सापीत्यादिना।अत्रकिंचित्सर्वनामविधेयेनतत्कृतएवतत्रद्वंद्वपदार्थपराम
र्शःस्यात्केवलंव्यावृत्तरूपेविशिष्टएवाद्यवाक्यार्थेप्रतिभासमानेऽन्वयात्सर्वनामसारूप्यमात्रमाभातिनतुवास्तवोऽत्रतत्पदार्थप्रत्ययःकश्चित्प्रतिप
न्नः।यद्वक्ष्यति।यदंतरालेज्ञानंतुपदार्थेषूपजायते।प्रतिपत्तेरुपायोसौप्रक्रमानवधारणादिति॥नन्वसतिपदार्थेधवखदिरपलाशाश्छिद्यन्तामित्य
त्राक्रमिकतिविभागोवाक्यार्थेरुपलभ्यस्यप्रत्येकधवशब्दादवगतोऽर्थस्तत्रैवानुष्ठानमितियुगपदेवछिदिक्रियाप्राप्नोतिनचैवमनुष्ठानंतुपर्यायतइत्याह॥
यथाचखदिरछेदेभागेषुक्रमदर्शनं।यत्रापिभवतःपदार्थवाक्यार्थयोर्भेदःखदिरश्छिद्यतामित्यादौत

४९
५१

त्रापि प्रगुणपदे वानुष्ठातुं नयानित्यावनात्वदिरस्य प्रथमं लग्नाग्रं छिंदंतित तोप्यस्थिभागेन दर्नतरे सारभागमिति क्रमवर्त्तिन्येव छिदिक्रियापर्यवसानेति
थैव द्वंद्वे ये पदार्था यो द्वाराबुद्धिपरिकल्पितस्तस्य क्रमेणादर्शनं व्यवस्थितिरनुष्ठानमिति यावत्॥ अथास्मिन्नर्थे ते धवखदिरपलाशाश्छिद्यंतामि
ति धवखदिरपलाशच्छेदने निरूपिते वाक्यार्थे तत्रैकदेशमात्रेपि छिन्ने यदादिष्टं न तत्कृतमिति ब्रुवंतितदेतद्दर्शने वाक्यार्थे कथमुपपन्नमिदि
त्याशंक्याह॥ ॥संघैकदेशप्रक्रांतान्याः संघानुपातिनः। क्रियाविशेषान्प्रमन्यंते सहद्वंद्वावयवे क्रमः॥ यथा ब्राह्मणा भोज्यंतामित्यत्र संघाना
नुपातिन्यपि भुजिक्रिया नैकैकदेशप्रक्रांता प्रवर्त्तिता अनेनामुकं ब्राह्मणैरिति व्यवतेन यथा द्वंद्ववाच्यसमुदायांतर्गतावयवप्रवर्त्तितापि शब्दार्थ
परित्यागकारणान्नानभ्यति पद्यत इति विज्ञेयौ यदि च परपदार्था संभवस्तदा पूर्वपदार्थप्रधानो व्ययीभाव उत्तरपदार्थप्रधानस्तत्पुरुष इत्यादिकं
समासेष्वर्थाभिधानमनुपपन्नमित्याशंक्य परिहर्तुमाह॥ प्रतिपादयता वृत्तिमबुधान्वाक्यपूर्विकां। हन्योपदार्थभेदेन प्राधान्यमुपदर्शितं वाक्य
पूर्विकां वृत्तिं समासलक्षणामबुधान्प्रतिपादयता तेद्वदेन समासेषु पदार्थप्राधान्यमाचार्यैरुपदर्शितं वाक्यपूर्विकामिति यदा वाक्यमेवद्व
शा२ त्तीभवति कार्यं वेदन्वाख्यानपक्षे तदैवमुक्तमित्यर्थः॥ एतदुक्तं भवति॥ अबुधबोधनाय तथा शास्त्रे प्रक्रियामात्रप्रदर्शनं कृतं न पुनस्तत्त्वतः
इता वतापरपदार्थसत्ताभ्युपगता॥ अब्राह्मणो हीनञ्समासेपि पदार्थप्राधान्यं बहुधा भाष्ये विकल्पितं। तदप्यबुधबोधनाय शास्त्रप्रक्रिया ४९

यत्
इत्या

मात्रप्रदर्शनमेवबोद्धव्यमित्याह॥ अभेदादभिधेयस्य नञ्समासेविकल्पिनम्॥ प्राधान्यंबहुभाष्येदोषात्क्रमप्रक्रियागतेः॥ परमार्थस्त्वेकमेवतत्त्वा-
भिधेयरूपंसकलजनप्रसिद्धंस्थितमितितत्रकश्चित्सर्वोनपदार्थव्यवहारउपपद्यतइतिबोद्धव्यः। प्रतिपादयिष्यतिच। शास्त्रेतुप्रभेदेनलौ-
किकोऽर्थोनभिधीयते। नञ्समासेपुनस्तत्रत्रयःपक्षाविचारिताइति॥ अथपदार्थासंभवेत्रिषुजहत्स्वार्थविकल्पोनोपपद्यतेकिल। पदार्थासंभ-
वेकुत्रेत्युच्यतइत्याशंक्यसमर्थयितुमाह॥ जहत्स्वार्थविकल्पेचसर्वार्थत्यागमिच्छता॥ बहुव्रीहिपदार्थस्यत्यागःसर्वस्यदर्शितः॥ यतएवमतएव
तत्प्रदर्शनायाचार्येणवृत्तिषुजहत्स्वार्थपक्षेसर्वार्थत्यागमिच्छताबहुव्रीहौसमासेसर्वस्यपदार्थस्यत्यागउपदर्शितः। नत्रहिपदार्थव्यतिरेकेणान्यए-
वसमुदायार्थोविशिष्टएवप्रतिभातीत्यतःसर्वथानवास्तवःकश्चित्पदार्थव्यवहारोऽङ्गीकार्यइति। तदेवंद्वंद्वेबहुवचनंप्रत्येकंवाक्यपरिसमाप्तिःस-
र्वनामप्रत्यवमर्शःक्रमेणानुष्ठानमेकदेशानुष्ठानेसमुदायार्थानुष्ठानाभिमानश्चेतिपंचचोद्यान्यपोद्धारसमाश्रयणेनाखण्डवादिनापरिहृता-
नि। बहुव्रीहौचजहत्स्वार्थपक्षेसर्वार्थत्यागोपदर्शनादखण्डमेववाक्यमभिप्रेतमितिलक्ष्यते। इदानींसर्वोऽयंपदपदार्थव्यवहारःकाल्पनिको
ऽसत्यभूतएवनानाविधशास्त्रप्रक्रियामात्रशरणोऽवगन्तव्यइत्युपपादयितुमाह॥ शास्त्रेकश्चित्प्रकृत्यर्थःप्रत्ययेनाभिधीयते॥ प्रकृतौविनिवृत्तायां
प्रत्ययार्थश्चधातुभिः॥ तथाचपदस्यप्रकृतिभागाश्रितमभिधेयंप्रकृत्यसद्भावेपिप्रत्ययएवाभिदधाति। यथाइयानित्यादौतथाप्रत्ययार्थश्चविनि-
वृत्तेपिप्रत्ययेप्रकृत्यैवाभिधीयतेयथाऽहन्निति॥ पुनरप्यव्यवस्थांप्रदर्शयितुमाह॥ यथार्थमाहतुर्भिन्नौप्रत्ययाविकएवतौ॥ क्वचिदाहपचेतीतिधातुलाभ्यां

५० 50

विनाकचित्॥ २३२ नत्वपचंतीत्यादौ भिन्नो प्रत्यययोरास्थितो यमर्थकर्तृलक्षणमाहतुल्यमेवैकोप्याह त्रिरु होतीत्यादौ॥ कचिद्धातुरेव तमर्थं ताभ्यां विनैवाह।
अहन्त्वमिद्द इत्यादाविति किमेतत्तदर्थानां वालवस्त्रेममाणधुराभवगाहत इति यत्किंचिदेतत् शास्त्रप्रक्रियाणामप्यवास्तवत्वमुपपादयि
तुमाह॥ ॥ अन्वाख्यानस्मृतौ ये च प्रत्ययार्थानिबंधनं। निर्दिष्टास्ते प्रकल्पार्थाः स्मृत्यन्तर उदाहृताः २३३ कस्यांचिच्छब्दानुशासनस्मृतौ ये प्रत्ययवि
धाने प्रत्ययार्थानिबन्धनं निर्दिष्टास्त एव स्मृत्यंतरे प्रकल्पार्थानिबंधनमुदाहृताः इति नास्त्येव नैयत्यं पदपदार्थानां। प्रसिद्धत्वाच्च शास्त्राभ्यासाधिवा
सितमानसाः शास्त्रव्यवहारेषु पदविभागमपि प्रयुंजत एवं यथा उद्धूमतीत्येवं प्रयोक्तव्ये उद्धूमीति लाघवार्थं प्रयुंजते। तथाकरोषि करोमीति प्रयो
क्तव्ये करोतीति तदेकदेशमात्रं प्रयुंजत एवेत्यभिधातुमाह॥ ॥ प्रसिद्धत्वाद्विमिकीत्येवं शास्त्रेभिधीयते॥ ननु वस्तुभूताः शास्त्रप्रक्रियाः किमिति ना
श्रिता इत्याह॥ ॥ व्यवहारायमन्यन्ते शास्त्रार्थप्रक्रियायतः २३४ शास्त्रार्थप्रक्रियाः केवलमबुधानां व्युत्पादनाय अत्रैतेन शास्त्राणि तत्त्ववकृपाराये
ति॥ अथ वा विद्यैव सत्याप्रक्रियाभेदेनोपवर्ण्यत इत्याह॥ शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते। यद्येवं किमविद्योपदर्शकशास्त्रप्रक्रियासमाश्र
येण प्रेक्षापूर्वकारिणामित्याह॥ अनागमविकल्पा तु स्वयं विद्योपवर्तते २३५ अविद्योपमर्दनस्तु तरकालमागमविकल्परहिता शास्त्रप्रक्रियाप्रपंच
शून्या एतदुक्तं भवत्यविद्यैव विद्योपाय इति। ननु कथमविद्याविद्यास्वरूपविलक्षणा विद्याया उपायः स्यादित्याह॥ ॥ अनिबद्धनिमित्तेषु नि
रूपाख्यं फलं यथा॥ तथाविद्याप्यनाख्येया शास्त्रोपायेव लक्ष्यते॥ २३६ न हि कारणेषु कार्यं केनचिद्व्यपदेशेन रूपेण संबद्धं वक्तुं पार्यते। यत्र यथा कार्यं ५०

लक्षणं फलं निमित्तं च कारणेषूपाख्याविरहितं कारणसमन्वयविरहितमप्यद्भुतेन रूपेणोपजायते । तथैवाविद्याविलये स्वयं विद्योपावृत्तिमानाशास्त्रा
दुपजायते तेनाख्यातुं शक्यते । केवलमदूरविप्रकर्षेण शास्त्राभ्यासाद्यदसावनुशील्यते । ततो विद्यायाः शास्त्रमुपाय इव लक्ष्यते । वस्तुस्थित्या
तु स्वविवेकादसौ प्रकाशत इति बोद्धव्यं २२६ । शास्त्रमुपक्रियाभेदे विद्येवोपवर्णित इत्युक्तौ ततश्च शास्त्राभ्यासानतिक्रमेणैव लोकस्य वाक्यश
ब्दार्थप्रतिपत्तिं समीहत इत्याह ॥ यथाभ्यासे हि वागर्थप्रतिपत्तिं समीहते । स चानादिरभ्यासो मिथ्याभूत एव स्वाभाविक इव प्रतिभातीत्या
ह ॥ स्वभाव इव चानादिर्मिथ्याभ्यासो व्यवस्थितः २२७ । मिथ्यात्वमेव प्रतिपादयितुमाह ॥ उत्प्रेक्षते सावयवं परमाणुमपण्डितः । तथावयविनम
क्रमन्त्येऽवयवे पुनः २२८ । तारतम्ययोगादपकर्षप्राप्तिं परिमाणस्यानुमाय परमाणुः स्थापितस्तस्याप्यन्यः सावयवत्वमुत्प्रेक्षत इति नास्त्येव पुरु
षबुद्धीनां वास्तवत्वं । अवयविनमप्यवयवान्तरयोगिनमुत्प्रेक्षते २२९ । तथा परिमितपरिमाणं घटादिकं दृष्ट्वा लोचन इति लोकोऽयं विश्वं प्रपंचरूपं
परिच्छिन्नतयावस्थितं तोऽध्यवसीयत इत्याह ॥ घटादिदर्शनाल्लोकः परिच्छिन्नोऽवसीयते । समारंभाच्च भावानामादिमद्ब्रह्म शाश्वतं २३० । उपायाः
शिक्ष्यमाणानां बालानामपलापनाः । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते २३१ । समारंभादुत्पादाच्च भावानामिदं शाश्वतमपि ब्रह्मादिम
दिति लोकैर्व्यपदिश्यते । तस्मादुपायाः शास्त्राणि जिज्ञासूनामबुधानामपलापनाः प्रतारणा एव बोद्धव्याः । यस्मात्तत्रासत्यरूपे शास्त्रम

५१ 51 क्रियामात्रे पर्यवसितत्वात् अविद्यामुक्तस्य मतसंविद्यासहरूपं ब्रह्म समीहते यास्यामीति यावत् २५० इदानीं पुनरपि पदपदार्थनिराकरणं प्रतिपादयितुमाह ॥ अन्यथा
प्रतिपद्यार्थपदग्रहणपूर्वकं पुनर्वाक्ये नेममेवार्थमन्यथा प्रतिपद्येत । यदि सत्यं भूताः पदार्थाः स्युस्तदा पदपदार्थप्रतिपत्त्यवसरे सर्वमन्यथा प्रति
पद्य वाक्यार्थावसरे तत्परित्यागेनान्यथैव प्रतिपत्तिर्दृश्यमाना नोपपद्येत । एतच्चाग्रे लक्षितिनिर्देत्यादिना व्यक्तीकरिष्यति २५१ यदि च सत्यभूताः पद
पदार्था अभ्युपगम्यन्ते तदा प्रतिषेधो नोपपद्येत । तथा च पदग्रहणपूर्वकमादौ पदार्थप्रतिपत्तिः पश्चाद्वाक्यार्थप्रतिपत्त्यवसरे तदर्थपरित्यागे
नान्य एवार्थ उपजायत इति प्रतिपादयितुमाह ॥ उपात्ता बहवोऽप्यर्था येषु तेषां निषेधना क्रियते तेन निवर्तितेन तस्मात्तत्र नाश्रयेत् २५२ इहाग्रथववदिरपलाशोद्दनीया ख्पे ५
नेन तत्र पदार्थप्रतिभासमयेऽन्य एव धवादिच्छेदनलक्षणोऽर्थ उपादीयते पश्चान्निषेधेन तन्निवर्तनं क्रियते । न चैतद्युक्तम् । उपात्तस्य त्यागे शब्दार्थसंबंधस्या
नित्यत्वमापतेदिति तेषां तत्र नाश्रयणमेव युक्तमित्याह ॥ तस्मात्तत्र नाश्रयेदिति । २५२ अतो वाक्यवाक्यार्थयोरेव सत्यत्वमत्र युक्तमभ्युपगन्तुमित्याह ॥ ॥
वृक्षो नास्तीति वाक्ये च विशिष्टाभावलक्षणम् । नार्थे न तु दृष्टः संबंधो निवृत्तेरवतिष्ठते २५३ एतदुक्तमेवार्थं वदं विशिष्टभावलक्षणमिति वृक्षाभावावगतिरूप
स्य वाक्यार्थस्य लक्षणं प्रत्यायकमिष्यते । यदि पुनः पदार्थाश्च व्यतिरिक्तोऽभ्युपगम्यते तदा वृक्षलक्षणो वाक्ये व्यवस्थितेन नञ्संबंधस्तस्य नोपपद्येत । तस्य
हि स्वकारणात्तद्भूत्मलाभस्य नञा निवृत्तिः कर्तुं न शक्यते । अथ यासत एव नञा संबंधस्तदाऽसत्त्वादेव निवृत्तो माविति नञो वैयर्थ्यापद्युच्यते । सत्ता च न निषे स्तू-
२१

धोऽस्तीत्यसौ नञ्‌स्तु च न विद्यते। जगत्तनेनन्यायेन नञर्थः प्रलयेऽगत इति। तस्मात् दृष्टस्य स्वतन्त्र एव निवृत्तेः तेन सह निवृत्तिवाचकस्य संबंधो न विद्यते। २४३ अथोच्यते। विच्छेदे
न पदार्थविषयास्ति बुद्धिरवष्टंभात् सा नञा निवार्यत इत्याह॥ ॥ विच्छेदप्रतिपत्तौ च यया घटो नावधार्यते। एवं च बुद्ध्यावपि नञः संबंधो नोपपद्यत इत्याह॥ अशब्दवा
च्यासौ बुद्धिर्निवर्त्तेत स्थिता कथं। २४४ नञा शब्दवाच्योऽर्थः प्रतिषिध्यते। न च बुद्धिः शब्दवाच्या। शब्देन हि बाह्योऽर्थोऽभिधीयते बुद्धिस्त्वर्थालंबना न शब्दाभिधे
यत्वमर्हतीत्यतः कथं नञा सा प्रतिषिध्यते। २४४ अथ बुद्धिर्न निवर्त्ततेऽपि तु तस्या नञा मिथ्यात्वमावेद्यत इत्याह॥ अथ यया ज्ञानमुत्पन्नं तन्मिथ्येति नञा कृतोऽप
तद्रूपं निराकर्तुमाह॥ नञो व्यापारभेदेऽस्मिन्नभावावगतिः कथं। २४५ नञ एवमात्मके व्यापारविशेषे बुद्धिनिषेधात्मकेऽङ्गीक्रियमाणेऽसति वृक्षस्याभावावग
तिर्न स्यात्। किल पर्युदासेऽसदृशप्रतिपत्तिविधायिनि नञ्व्याच्य एतदुपपद्यते। प्रसज्यप्रतिषेधे तु नैतदुपपद्यते वृक्षाभावो हि तत्र वाक्यार्थ इति। २४५ अथ यनि
वर्त्तमान एवासाधारोऽभिधेयः कल्प्यते तत्राप्याह॥ ॥ निराधारप्रवृत्तौ च प्राक्प्रवृत्तेर्निवर्त्तितो भवेत्। आधारमनपेक्ष्यैव नञः प्रवर्त्तत इति यद्युच्येत तदा
नञः प्रागेव प्रवृत्तेः प्रयोगः स्यात्। प्रतिषेद्धुमिष्टे सर्वत्र नेत्येवाभिदध्युरिति। अथ विषयनियमार्थमाधारप्रयोगो न वृक्ष इति वृक्षस्य निषेधो न घ
टादेरिति प्रतिपादयितुमाह॥ अथाधारः स एवास्य। अत्रापि दूषणमभिधातुमाह। नियमार्थोऽप्यनिर्भवेत्। २४६ नञ एवं तदर्थनिषेधे जाते पुनरसौ नञ्श्रुति
र्नियमाय वा स्यात्। निपातद्योतकाः केचिदित्यभिप्रायेणाह। नियमद्योतनार्था वा। अथ पर्यनुक्रम्य विस्पष्टार्थं पुनर्वचनमनुवादः स्यादित्याह॥ ॥ अन
२४६

52

५२ वाक्येष्वप्यभेदेन। सर्वत्रैवमानर्थक्यमेव पदार्थानां स्यादित्याह॥॥ कश्चिदेवार्थवांस्तत्र शब्दः शेषास्त्वनर्थकाः। नब्राह्मण इत्यादौ नञ एवार्थवत्त्वमितरे
52 षामानर्थक्यं स्यात्। चेन्नैतदुपपन्नं। तस्माद्दृष्टक्षेपो नास्तीति तस्मादखंडादखंड एव विशिष्टाभावरूपो वाक्यार्थः। न पुनस्तत्त्वतः पृथग्भेदः पदार्थः सत्यभूतः क
श्चिदुपपन्नः। अत्र यान्यप्यापतिपदार्थमित्येन द्याख्यानुमाह॥ ॥विरुद्धं चाभिसंबंधमुद्दहार्यादिभिः कृतो वाक्ये समाप्नेवाकार्थमन्यथा प्रतिपद्यते उ
दहार्यादिभिः पदैर्विरुद्धपदार्थप्रतिभासावसरे ऽभिसंबंधमवगच्छति। यथा उद्दहारिभगिनिया त्वं शिरसा तद्ब्रूहि वहसि सा त्वं साचीनं कुंभमभिधावे
न मह्यां क्षीरिता चौरत्वं काले वाक्याद्वाक्यार्थप्रतिपत्त्यवसरे ऽन्यथैवार्थप्रतिपत्तिरिति न पदार्थः कश्चिदुपपन्नः। एतदेवान्यथा प्रतिपादयितुमाह॥॥
स्तौति निंदाप्रधानेषु वाक्येष्वर्थो न तादृशः। पदानां प्रविभागेन यादृशः परिकल्प्यते॥ स्तौतिप्रधाने वाक्ये किंचिद्भवति यत्र पदार्थेनि निंदा। इंदोर्लक्ष्म स
र विज्ञपिनः कंठमूले मुरारिर्दिग्नागानां मदमलमषी भांजि गंडस्थलानि। अद्यापुर्वीविलयतिलकश्यामलिम्नानुलिप्तान्युद्भासंते वद धवलितं किंय
शोभिस्त्वदीयैः। अत्र पदार्थप्रतिभासवेलायां निंदावगम्यते। यस्माद्धेरा जन्नेलोकमेवोद्धृतां कंधरायां वहसि। तथाहि न सर्वव्यापित्वदीयं यशः। यदि हि
न स्यात्सांत्रदा किमित्यद्यापि प्रसिद्धा एव शशलक्ष्मादयः पदार्थाः श्यामलतया भासंते। यशसो ह्यवदाततमा नदीयस्य व्यापितायां न ह्याप्तास्ते श्वेततां भवे
युरेवेति पदार्थोत्र निंदा। स्तौति स्तवाक्यार्थः। तथा च राजन्सर्वमेव जगद्यशसा त्वदीयेन धवलितं केवलं स्वभावस्य दुस्त्यजत्वाद्यदि परं चत्वार्ये १२

वचस्तु निखिलजगति ख्यातमगुणायुक्तान्यन्यत्त्वमेव त्वदीयेन यशसा व्याप्तमिति । सर्वत्र त्रिलोकामपि प्रथितमनापत्त्वमिति वाक्यार्थः ॥ निंदामथानेनक्त
ति: पदार्थीमयथा । हे हे लोजिनबोधिसत्त्व वचसां किं विस्मौ लोपधे नास्ति त्वत्स्तदृशः परः परिहितार्थाने गृहीतव्रतः । तथ्यत्वांथजनोपकारघटना हेतुर्मु
त्प्रेलब्धा । यशोभावो हृद्य हनेकोषिकृपया साहायकं यन्मोः । अत्र बोधिसत्त्वचरितस्यापि त्वदीयेनानेन नतोयनिधेः शरार्थसंपादन साक्षुरोप
नपगजयुग इति पदे भ्यः स्फीतिरवगम्यते । वाक्यार्थस्फीतिरातिशयग्राही पात्रत्वमुद्दृश्ये रविक्षनद इति । ततश्च पदपदार्थानां वा स्तवत्वे कथमेतत्संग
च्छत इति । अथात्र पदवादिमतमाशंकितुमाह ॥ ॥ अथासंसृष्ट एवार्थः पदेषु समवस्थितः । वाक्यार्थस्याभ्युपायो यो सावेकस्य प्रतिपादने । पदेषु
र्थो संसृष्ट एव वाक्यार्थस्यैकस्य संसर्गलक्षणस्य प्रतिपादने भ्युपायः स्थितः । पदार्थपूर्वको हि वाक्यार्थावसायो व्यवस्थित इति । एतन्निराकर्तु
माह ॥ ॥ पूर्वं पदेष्वसंसृष्टो यः क्रमादुपचीयते । छिन्नग्रथितकल्पत्वान्न विशिष्टतरो हि सः ॥ ॥ आदौ पदेष्वसंसृष्ट एव स्थितः क्रमाच्च संसृज्योपची
यते यो वाक्यार्थः स विशिष्टतरः सुतरां विशिष्ट एव । कस्मात् छिन्नग्रथितकल्पत्वादिति । पूर्वं छिन्नः पश्चाद्ग्रथितो यस्तत्तुल्यो सावित्यसंसृष्टपदार्थ
पूर्वको वाक्यार्थावसायो न युज्यत इति । न हेवं प्रकृतिप्रत्यययोः परस्परमेकापायेनाप्यर्थावगतेः । उभयतोर्थस्य संप्रत्यये सत्येकस्मादेव प्रत्ययात्क
चिदर्थप्रतिपत्तेः प्रकृतिप्रत्ययार्थयोश्च साकल्येनाशास्त्रेष्वभिधानात् वाक्यार्थस्य च पदार्थप्रतिपत्तिविलक्षणत्वात्तन्नअर्थानुपपत्तेः सर्व

५३ 53

त्रोपात्तस्यागमस्यैकैकस्योपपत्तिषट्केनाहत्तिषुविकल्पार्थोपपादनादिना च पूर्वोक्तेनोपपत्तिचतुष्टयेन समस्तभूतानां पदार्थानामनुपपत्तेः अखंडपक्षे
च प्रतिनिध्यादिचोद्यपंचकस्य तेषां द्वंद्वाभ्युपेयत्वाच्चोद्यसप्तकस्य परिहारान्निरवद्यमखंडमेव स्फोटात्मकं वाक्यं प्रतिभैव च वाक्यार्थ इति स्थितौ इदा
नीमपोद्धारसमाश्रयेणापि पदार्थस्याभ्युपगततत्त्वानुरूपेण विचारमप्यासूत्रयितुमाह॥ ॥एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः। निमित्त
भेदादेकस्य सार्वार्थ्यं तस्य भिद्यते॥ अत्रैकशब्ददर्शनमनेकशब्ददर्शनं चेति द्वौ पक्षौ। तत्रापि पदपदार्थयोः सत्त्वपदवादिमतेन। असत्त्वं च
वैयाकरणमतेनेति चत्वारः पक्षाः। प्रतिक्षिप्तमपि पक्षं व्यवहारार्थमङ्गीकरोत्येव टीकाकारः। यतः सर्वपार्षदमिदं हि व्याकरणं शास्त्रम्। त
त्र चार्थस्थितः इत्यत्र पुनः पदपदार्थावङ्गीकरोति। तत्रैकशब्ददर्शने शब्दोपचारः प्रसिद्ध्यप्रसिद्धिनिमित्तकः। तत्रैव चार्थोपचारो द्विधा।
स्वरूपार्थत्वेन बाह्यार्थत्वेन चेति त्रयः पक्षाः। एवमनन्त्रानदेवमतेनेत्थं त्रिभिः पक्षैः स्वत्वारोपिपक्षाभेदिता द्वादश संपद्यन्ते इति बोद्धव्यम्। तत्रै
कशब्ददर्शनसमाश्रयणेन तावन्मुख्यविचारमेकमाहुरित्यादिना करोति। सर्वेष्वप्यर्थेष्वेक एव गोशब्दो वाचकः। यद्येवं युगपदेव स
र्वार्थप्रकाशनं कस्मान्न करोतीत्याह। निमित्तभेदादित्यादि। निमित्तभेदो विवक्षमाणस्तस्मात्सार्वार्थ्यं भिद्यत इति। तत एव किमित्यत आह। योग
पद्यमतिक्रमपर्यायेणैवावतिष्ठते। निमित्तवशात् युगपत्सर्वार्थप्रकाशनं न करोतीत्यर्थः॥१०॥ निमित्तभेदमाह॥ अर्थप्रकरणाभ्यां वा योगाच्छ

व्यंतेरणवा।२५३ प्रयोगपथप्रतिक्रमपर्याये व्यवतिष्ठत इत्यस्योदाहरणमाह॥ यथा सास्नादिमान् पिण्डो गोशब्देनाभिधीयते। तथा स एव गोशब्दो वाहीकेपि व्य
वस्थितः।२५४ यद्येवं गौणमुख्यविभागः कुत इत्याह॥ सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मणः। प्रसिद्धिभेदाद्गौणत्वं मुख्यत्वं चोपवर्ण्यते।२५५ सर्वशक्तिमत्त्वे
चानेकधर्मण इत्यनेन व्याख्यातं। प्रसिद्धिभेदात्प्रसिद्धिविशेषाद्गोजातीये सातिशया गोशब्दस्य प्रसिद्धिः। वाहीके त्वीषदिति। तस्मात्प्रसिद्ध्यप्र
सिद्धिकृतो गौणमुख्यभावः।२५५ तथैकदर्शन एव प्रक्रियां दर्शयति॥ ॥एको मन्त्रस्तथाध्यात्ममधिदैवमधिक्रतु। असंकीर्णाः सर्वार्था भिन्नशक्तिर्व्यव
स्थितः।२५६ तथा चैक एव मन्त्र आत्मन्यपि जपावसरे देवेष्वपि क्रतौ यजनसमयेपि विनियुज्यते। भिन्नशक्तित्वादस्य कार्येण प्रतिनियतार्थतया
व्यवस्थितिर्लभ्यत इत्यर्थः।२५६ एवं शब्दोपचारः प्रसिद्ध्यप्रसिद्धिनिमित्तकः प्रदर्शितः। एतस्मिंश्च शब्दोपचारे शब्दार्थसंबंधस्यानित्यत्वं स्यादि
त्याशंकार्थोपचारमाश्रित्याह॥ ॥गोत्वानुषंगो वाहीके निमित्तात्कैश्चिदिष्यते। अर्थमात्रं विपर्यस्तं शब्दः स्वार्थे व्यवस्थितः।२५७ अर्थः शब्द
स्य द्विविधः स्वरूपं बाह्यश्च। तत्र निमित्तात् जाड्यादेर्गोत्वं वाहीकेष्वनुषज्यते। शब्दस्तु गोत्वमेवाभिधत्त इति बाह्यार्थोपचारः। इयांस्तु वि
शेषः। गौरित्यत्र मुख्यमेव गोत्वं गौर्वाहीक इत्यत्र तदुपचरितं। न देवता वाच्यमिति।२५७ अथ स्वरूपोपचारमाह॥ ॥तथा स्वरूपं शब्दानां सर्वार्थेष्व
नुषज्यते। अर्थमात्रं विपर्यस्तं स्वरूपे तु स्थितिः स्थिरा।२५८ शब्दानां स्वरूपमेव सर्वत्र वाच्यं तत्तु गोजातीये कदाचिदनुषज्यते। कदाचि

५४ 54
द्वाहीकस्तनित्त्वं नास्ति शब्दार्थसंबंधस्याप्रसिद्ध्यप्रसिद्धिकृतस्तु गौणमुख्यविभागो बोद्धव्यः ॥ २५८ ॥ अथानेकशब्ददर्शनमाश्रित्याह ॥ ॥ एकत्वेतु सरूपत्वाच्छ
ब्दयोर्गौणमुख्ययोः । प्राहुस्तंन भेदेपि भेदमार्गानुदर्शिनः ॥ भेदमार्गानुसारिणः शब्दभेदवादिनः गौणमुख्यार्थाभिधायिनोर्गोशब्दयोर्भेदमेवाहुः । नै
सर्गिकभेदाच्छब्दभेदमन्यन्ते । यतः शब्दार्थयोरिहाध्यासलक्षणः संबंधो व्यवस्थितः । एकत्र चेदर्थस्तत्तस्मिन्नन्ते नैवाभेदमापन्नः कथमन्येन सहाध्यास
मुपेयादित्यर्थः । तदेवं शब्दभेद एवोपपन्नः । एतच्च भेदाभेदस्वभावे दर्शनद्वयं शब्दानां भाष्यकारेण वार्त्तिकव्याख्यानावसरे दर्शितं । तत्र हलृ केत्वा
नुवृत्तिनिर्देशे सवर्णाग्रहणमनचित्वात् । अत्रोत्तरं । एकत्वादकारस्य सिद्धमिति । यद्येवं अनुबंधसंकरस्तु एकाजनेकाज्ग्रहणेषु चानुपपत्तिरित्याद्यौ
नि चोद्यानि प्राप्नुवंतीति तत्रैवेतानि परिहृतानि विषयेण तु नानालिंगकरणात्सिद्धं एकाजनेकाज्ग्रहणेषु चावृत्तिसंख्यानादित्येवमेकशब्ददर्शने
स्थापितं । अथानेकशब्ददर्शनमाश्रित्य तत्रैवोक्तं । आन्यभाव्यं तु कालशब्दव्यवायात् । तायुगपद्देशपृथक्त्वदर्शनादित्येवं भेदाभेदौ शब्देषु व्यव
स्थापितौ । तद्व्याख्यानायैव चटीकाकारस्तत्र तत्र पक्षद्वयदर्शनं करोतीति बोद्धव्यं ॥ २५९ ॥ अथैतदेव शब्दभेददर्शनं प्रसंगाद्वैदिकेष्वपि शब्देषु योजयितु
माह ॥ ॥ सामिधेन्यंतरं चैवमावृत्तावनुषज्यते । त्रयोदशैकादश वा सामिधेनार्थाश्च । सामिधेन्यः तत्त्रिः प्रथमामन्वाह त्रिरुत्तमामन्वाह । एवं चा
वृत्त्या सप्तदश पंचदश वा सामिधेन्यो भवंतीति स्थितं । तत्राह तं सामिधेन्यंतरमेवविभिन्नस्वरूपमनुषक्तं बोद्धव्यं । न त्वेकैवासौ पुनरावृत्तेति शब्द ५४

भेदवादिनः ॥०॥ एवं च मंत्राणामपि भेदमाङ्गीतिमदर्शयितुमाह ॥ ॥ मंत्राश्च विनियोगेन लभंते भेदमूहवंतः ॥ विनियोगेनाभ्युपयोगादिनोपलक्षिता
अपि मंत्रा भिन्ना एव बोद्धव्याः । यथा अहे दैवीरापः शुद्धा इत्यस्मादूहन एव ऊहनार्थवादो मूह्येता देव आज्यं शुद्धमित्यादि । एवमूहमंत्राणामन्य
त्वं । तथैव विनियुक्तानां मंत्राणामन्यत्वमेवं । अन्येषां चैतेषां किं वेदत्वं स्यान्न वेत्याशंकायां वेदत्वमेव तेषां बोद्धव्यमित्याह । तान्याम्नायान्तरा
एयेव पठ्यन्ते कश्चिदेव तु ॥ ॥ मंत्राणां सर्वेषां वेदत्वमेव वा वेदे तु कश्चिदेव मंत्रः पठ्यते ॥०॥ न चैतावता तेषामेव वेदत्वं । अन्यथा वेदे नर्थका एव स
र्वे पठिता इत्याह ॥ ॥ अनर्थकानां पाठो वा शेषत्वेन प्रतीयते । उपलक्षणभूता अनधिकारा एव वेदे मंत्राः पठिताः । तैस्तु विनियोगावसरे प्र
तीयमानानामन्येषामेव वेदत्वं बोद्धव्यं । तदेवमर्थभेदाच्छब्दस्य भेदे मंत्राणां भेदे एवापठितानां चोपलक्षणार्थतेति प्रदर्शितं । अथ स्वरूपार्थ
मेव पाठः सर्वेषां वैदिकानां केषांचित्तु च्यत इत्याह ॥ शब्दस्वरूपमर्थस्तु पाठे न्येरूपवर्ण्यते । तत्तच्च सर्वेषां स्वरूपवतां भेद एवेत्याह ॥ अन्ये तत्र भेदः
सर्वेषां । ननु पठ्यमानानामेव स्वरूपार्थत्वात् स्वरूपवत्ताप्रयुज्यते । इतरेषां तु यागाद्वौ विनियुक्तानां कथं स्वरूपत्वमेव स्यादित्याह ॥ तत्त्वं बंधात्तु
तद्वतां ॥ तेचापि मंत्रनिनिमित्तस्य स्वरूपस्यैव विद्यमानत्वात् तद्वत्त्वमेव बोद्धव्यं । तस्मान्मंत्रेषु संस्कारादिविनियोगभेदात् तथोपलक्षितानां
वा भिन्नानामेव प्रतीतिः । स्वरूपार्थत्वाद्वा भिन्नानामेषां भेद एव मंतव्य इत्युपसंहर्तुमाह ॥ अन्यासंस्कारसावित्रीकर्म्मापि न्याय्यप्रयुज्यते । अन्या

५५ 55

जपप्रबंधेषु सात्वे केचप्रतीयते॥ सारूप्यात्त्वेकत्वव्यवहारस्तत्र बोद्धव्यः॥ तदेवमनेकशब्ददर्शनेऽर्थभेदाच्छब्दभेदे गौणोऽर्थोऽन्यः मुख्योऽर्थश्चान्य एवं किंतु
सारूप्यादभेदे मुख्यार्थस्य प्रसिद्धत्वात्तद्वाचक उपचर्यत एवेति शब्दोपचार एव न तत्र कल्पयितुं शक्यः॥ न त्वेकशब्ददर्शन इव शब्दसंबंधस्यानित्यत्वा
दुपचारोऽर्थस्याश्रीयते॥ अत एवाभिप्रायवता टीकाकृता न तत्र शब्दोपचारार्थोपचारौ व्याख्यातौ॥ संबंधानुगतत्वाभिमतस्त्वत्र स्वरूपेण प्रवृत्तिनि ॥२६३॥ तत ३
मित्तेन संबंधः प्रतिपादितः॥ तदेवं च सर्वेषां शब्दानां प्रवृत्तिनिमित्तं बोद्धव्यमिति विस्पष्टयितुमाह॥ अर्थस्वरूपे शब्दानां स्वरूपाद्वृत्तिरिष्यते॥ अ
र्थस्वरूपेऽर्थवत्त्वनीतियावता न च सर्वेषां स्वरूपादेव निमित्तात्प्रवृत्तिर्बोद्धव्या॥ न केवलं पदानां सर्वेत्र स्वरूपमेव प्रवृत्तिनिमित्तं यावद्वाक्यरूपस्या
पि शब्दस्य वाक्यार्थे वर्त्तमानस्य प्रवृत्तिरन्यानपेक्षया स्वरूपेणैव बोद्धव्येति प्रसंगेन प्रतिपादयितुमाह॥ वाक्यरूपस्य वाक्यार्थे वृत्तिरन्यानपेक्ष
या॥ इदानीमेकशब्ददर्शने गौणमुख्यविभाग इत्युपसंहरन्नाह॥ अनेकार्थत्वमेकस्य यैः शब्दस्यानुगम्यते॥ सिद्ध्यसिद्धिकृता तेषां गौणमुख्य
प्रकल्पना॥ सिद्ध्यसिद्धिभ्यां प्रसिद्ध्यप्रसिद्धिभ्यां तत्र गौणमुख्यविभागो बोद्धव्यः॥ अनेकशब्ददर्शनेपि साहचर्यादभेदे तु नरापि प्रसिद्ध्यप्रसिद्धि
भ्यामेव गौणमुख्यविभाग इत्युक्तमेव॥ अपोभयत्रापि गौणमुख्यविभागे निमित्तांतरमुपदर्शयितुमाह॥ अर्थप्रकरणापेक्षो यो वा शब्दान्तरैः
सहायुक्तः प्रत्याय्यतत्पर्यंते गौणमथो विदुः॥ अर्थप्रकरणशब्दान्तरसंनिधानानि गौणमुख्यभावमुभयत्रापि प्रयोजयंतीत्युच्यते॥ एतदेव संग्रह ५५

+२६७+२

कारोक्तश्लोकप्रदर्शनेन संवादयितुमाह॥ ॥ शुद्धस्योच्चारणे स्वार्थः प्रसिद्धो यस्य गम्यते। स मुख्य इति विज्ञेयो रूपमात्रनिबंधनः॥२६७॥ एतन्मुख्यार्थशब्दल

क्षणं गौणार्थशब्दस्वरूपमप्याह॥ यत्त्वन्यस्य प्रयोगेण यत्नादिव नियुज्यते। तमप्रसिद्धमन्यंते गौणार्थाभिनिवेशिनम्॥२६८॥ यत्नादिवेति अर्थप्रक

रणादेरीसर्थं॥ अथ प्रकारान्तरेण गौणमुख्यविभागमाह॥ ॥ स्वार्थप्रवर्त्तमानस्य यस्यार्थोऽवलम्ब्यते। निमित्तं न च मुख्ये स्यान्निमित्ती गौण इ

ष्यते॥२६९॥ यो बाहीके प्रवर्त्तमानः स्वार्थसास्नादिमति वर्त्तमानस्य गोशब्दस्य संबन्धिनमर्थं निमित्तत्वेनावलम्बते न त्वविषये मुख्योऽर्थो निमित्तं

स्यात्। गौणस्तु निमित्ती तच्चानेनैतदुक्तं भवति। यत्राऽस्वलद्गतिः शब्दस्तत्र मुख्योऽर्थः। स्वलद्गतिस्तु गौणार्थ इति बोद्धव्यं। नन्वेवमनार्थो

पचार उक्तः स चैकशब्ददर्शने स्थितः। तत्र यस्यार्थो बलवत् इति शब्दभेद उक्तः स्यात्। अभेदेन तु। अत्रापि शक्तिभेदाश्रयेणाकल्पितस्य

भेदस्योपपन्नत्वेऽयुक्तमेतदिति न कश्चिद्दोषः॥२६९॥ अथार्थप्रकरणादेः शुद्धस्य गौणमुख्यविभागहेतुत्वमिति प्रसंगमाह॥ ॥ पुराणादिविभिन्नेष्वर्थेषु यो

वर्त्तते विरोधिनि। अर्थप्रकरणापेक्षं तयोरप्यवधारणं॥ पुराणश्छन्दोभाविधनहरांतिकलक्षणेषु यथायोगं परस्परविरुद्धेष्वर्थेषु वर्त्तते।

न चैतयोरर्थप्रकरणादिनार्थनिर्णयः। ततश्चात्रापि गौणमुख्यभावः स्यात्। न चैतदिष्टं। अनयोरुभय[redacted]त्रापि मुख्यार्थत्वमिष्यत इत्यतोऽर्थप्र

करणादीनां केवलानां गौणमुख्यभावो न प्रयोजयतीति बोद्धव्यं॥२७०॥ इदानीमवेदपक्षमाश्रित्य गौणमुख्यतामाह॥ ॥ वाक्यस्यार्थान्तरार्थानामपो

५६ 56

द्वारेमकल्पितेः शब्दांतरेणसंबंधः कस्येकस्योपपद्यते। पूर्वमेकशब्ददर्शनेऽनेकशब्ददर्शनेवापदपदार्थयोः सत्त्वमभ्युपगम्योक्तं। अत्रत्वसत्योपदपदा
र्थयोर्बुद्ध्यावतस्थाऽखंडमेववाक्यंवाक्यार्थस्तमप्रत्याय्यकमितिपदपदार्थसद्भावेकीदृशोगौणमुख्यभावः। किलगौर्वाहीकइत्यत्रपदपदार्थाभ्युपगमेविहि
द्वसामानाधिकरण्यान्यथानुपपत्त्यागोपदस्योपचरितार्थत्वमुच्यते। यदातुगौर्वाहीकइत्यनेनाखंडेनैवगोगतधर्मविच्छिन्नोवाहीकलक्षणो
र्थोऽखंडएवप्रतिपाद्यते। नदापदपदार्थानामसत्त्वात्कस्येकस्याविद्यमानस्येवतथाभूतेनैवेतरेणसंबंधइतिकुतस्त्योगौणमुख्यविभागः।
सद्येवमेतस्मिन्पक्षेकथंगौणमुख्यविभागःस्यादित्युच्यते। अपोद्धारसमाश्रयणेनपदपदार्थविभागमुपकल्प्यप्रसिद्ध्यप्रसिद्धिनिमित्तकोगौण
मुख्यविभागोऽभ्युपगंतव्यइत्यभिप्रायः। ननुस्वतंत्रेपदेपदांतरमंतरेणाप्रयुज्यमानएवानस्तत्रवर्त्तिवः पदपदार्थप्रविभागइत्याह॥ ॥यत्राप्येकप
देदृष्टंचारितार्थ्यंक्रियैक्वचित्। नह्याकांतमेवाङ्गत्वेनतदन्येनप्रयुज्यते॥ एकंपदंचारितक्रियत्वाद्याकांक्षमेवाखंडमितिप्रतिपादयिष्यति। अतस्तदन्येन
नैवप्रयुज्यतइतिबोद्धव्यं। एतदेवस्फुटीकर्तुंप्रतिपादयितुमाह॥ ॥यत्रकोऽयमिति प्रश्नेगौरश्वइतिवोच्यते॥ प्रश्न

गम० ५६

एवंक्रियानंतरमक्रांतादर्शनारिका ॥ कोपमितिप्रश्नेदर्शयतेभवतीतिवाकापिक्रियागर्भीकृतासैवोत्तरेपिगर्भीकृतेतितदपिचारितक्रियमेकंवाक्यमेवेतिमत
मं ॥ इदानींन्यूनाधिकभावएव गौणमुख्यविभागकारणंकेचिदभ्युपगतमित्याशंकांनिराकर्तुमाह ॥ ॥नैवाधिकत्वंधर्माणांन्यूनतावाप्रयोजिका।कस्मा
दित्याह ॥ ॥आधिक्यमपिमन्यंतेप्रसिद्धेन्यूनतांकचित् ॥ आपेक्षिकत्वादस्याव्यवस्थितत्वमेवेतिनतेन गौणमुख्यव्यवहारःकल्पयितुंशक्यः ॥ सादृश्यमिदा
नींनिमित्तत्वेनाह ॥ ॥जातिर्वाद्वेंतरेणापिजातिंयत्रप्रयुज्यते।संबंधिसदृशाद्धर्मात्तत्रगौणमपरेविदुः॥ गोशब्दोगोत्वजातिंविनापितद्व्यक्तिगतगुणसादृश्या
द्वाहीकेप्रयुज्यतइतिसादृश्यंगौणमुख्यभावेनिमित्तं ॥ अथविपर्यासमेवनिमित्तत्वेनाह ॥ ॥विपर्यासादिवार्थस्ययत्रार्थांतरतामिव ॥ मन्यंतेतत्रगवादिकंगौ
णमित्युच्यतेकचित् ॥ अर्थस्यवाहीकलक्षणस्यार्थांतरतांगोरूपतांविपर्यासादिवयत्रमन्यंतेतत्रतस्मिंस्तद्वाचकोगोशब्दःप्रवृत्तोगौणइतिकेचिन्मतं।विपर्या
सश्चाध्यवसायेनभवत्याध्यारोपेणचरजतमिदमित्यत्रविपर्ययाध्यवसायएव।इहत्वध्यारोपएवगौणानगुणान्वाहीकेध्यवस्यतीत्यध्यारोपितत्वाद्वोप्येविपर्य
यः।अतएवविपर्यासादिवेत्युक्तं।तस्मादध्यवसितत्वाद्वानिमित्तप्रयुक्तोनास्तिगौणमुख्यव्यवहारइति ॥ अथरूपशक्तिनिमित्तकोगौणमुख्यव्यवहारइति
पक्षांतरंदृष्टांतप्रदर्शनपूर्वकंदर्शयितुमाह ॥ ॥नियताःसाधनत्वेनरूपशक्तिसमन्विताः।यथाक्रमंमृगमयंतेसीरासिमुसलादयः।खड्गमानेषुमुक्तेसंन
द्धानांसंग्रामकथावर्त्तनइतिरूपशक्तिमाहात्म्यादभिधीयते।एवंसीरादिषु।क्रियांतरेलतालछेदादौनैतेषांशक्तिर्भवतीतिवक्तुंपार्यते॥तत्रस्वरूपेणनिय

॥२७८॥ प्रकृते योजयितुमाह॥ ॥तथैव रूपशक्तिभ्यामुत्पत्त्या समवस्थितः॥ शब्दो नियतस्तादर्थ्यः शक्त्यान्यत्र प्रयुज्यते॥२७९॥+१

५७ 57 तएव कर्मणि सामर्थ्यमेषां व्यवसीयत इत्याह॥ ॥क्रियान्तरेण चैतेषां भवंति न हि शक्तयः। रूपादेव तु तादर्थ्ये नियमेन प्रतीयते॥ उत्पत्त्यास्वभावेनैव प्रयो-
ज्यते। औत्पत्तिकः शब्दस्यार्थे न संबंधः॥ सहज एवेति गम्यते। अनेकशक्तिसद्भावाच्चान्यत्रापि प्रयुज्यते॥ ततश्च गौणमुख्यभावः कथमत्र ज्ञायेतेत्याह॥ ॥
श्रुतिमात्रेण यत्रास्य तादर्थ्यमवसीयते। तं मुख्यमर्थं मन्यंते गौणं यत्नोपपादितं॥ गौणं यत्नोपपादितमिति [illegible]सहितं चार्थप्रकरणादिकं। अत्रानामादि
तदभिधानशक्तिसद्भावेप्यप्रसिद्धत्वाद्यत्नेन प्रकरणादिना गौणत्वाध्यवसाय इत्यर्थः॥ तदेवमर्थप्रकरणशब्दान्तरसन्निधानमात्रं प्रसिद्ध्यप्रसिद्धिसहितं
चार्थप्रकरणादिकं अत्रानामादि समुच्चयेन अंगांगिभावेन चेति द्वौ पक्षौ॥ न्यूनाधिकभावः। सादृश्यं। विपर्यासः। रूपशक्तिः इति सप्त पक्षाः। तत्रार्थप्रकरण-
मात्रं पुरणादित्यादिभिरतिप्रसंगादनिमित्तमेव। न्यूनाधिकभावस्याप्यव्यवस्थितेरनिमित्तत्वमेव। सादृश्यस्यापि कार्यप्रवृत्तिहेतुः कार्यपरत्वादनिमित्तं
युक्तेपि गौणत्वासद्भावादनिमित्तत्वे परिशिष्यात्प्रसिद्ध्यप्रसिद्धिसहिताः प्रकरणादयः। प्रकरणादिसहिते वा प्रसिद्ध्यप्रसिद्धी॥ विपर्यासोध्यारोपलक्ष-
णो रूपशक्तिरिति चत्वारः प्रकाराः गौणमुख्ययोर्निमित्तत्वेन परिगृहीताः। इत्येतैर्निमित्तैः शब्दोपचारोर्थोपचारो वा स च द्विधा। वाक्यार्थोपचारः स्वरू-
पोपचारो वेत्येवं गौणमुख्यविभागो मंतव्यः॥ इदानीमेतदेव लक्ष्ये योजयितुमाह॥ ॥गोयुक्तमन्महतां स्वार्थे स्वार्थादर्थान्तरे स्थितौ। अर्थान्तरस्य तद्भावस्त- हेरंबः
त्र मुख्योपि दृश्यते॥ गवादीनां शब्दानां स्वार्थादर्थान्तरे गवाद्यर्थलक्षणे आश्रितपूर्वावस्थोपचरितोत्तरावस्थात्मके स्थितौ प्रवृत्तौ सत्यां सामर्थ्यान्तरसंबा
॥२८०॥

ह्रीकारेस्तद्भावोगवादिरूपतापत्तिलक्षणेयदातदागौणोर्थस्तेषांद्रष्टव्यइतिबोद्धव्यं।नकेवलंगौणोर्थस्तदायावन्मुख्योपिद्रष्टव्यइतिबोद्धव्यं।तत्रागो
गौःसम्पद्यतेगोऽभवदित्यत्रसंपद्यतेत्वद्भवतीत्यत्रागविअयुष्मदिचगोरूपतायुष्मद्रूपतावोत्तरावस्थायांविद्यमानेवोपचर्यतइतिगौणार्थता।अमहा
न्महानशुक्लःशुक्लःसंपद्यते।महद्भूतश्चन्द्रमाःशुक्लीभवतिपटइत्यत्रतदुत्तरावस्थावस्तुसत्त्वेवेतिमुख्यएवार्थमहच्छुक्लोत्पन्नौस्थितावितिनास्तिगौ
णत्वम्।ततश्चगोऽभवदित्यत्रगौणार्थत्वादोदंतस्यनिपातत्वेप्योदितिप्रगृह्यसंज्ञायानास्त्येवप्राप्तिः।तथात्वद्भवतीत्यत्रोपचरितस्ययुष्मदर्थस्यप्रती
तेर्गौणार्थत्वादेवमध्यमपुरुषस्याप्यभावः।यतोगौणमुख्ययोर्मुख्येसंप्रत्ययइतिभाष्येस्थापितं।वार्त्तिककारस्तुगोऽभवदित्यत्रच्व्यर्थवृत्तित्वान्निपातस्य
गोशब्दस्यच्व्यर्थलक्षणांमुख्यमेवसर्वमर्थमवगच्छन्गौणमुख्यभावासंभवमेवात्राभिमन्यमानःप्रगृह्यसंज्ञानिवृत्तये।ओतश्च्विप्रतिषेधइतियत्नमा
रब्धवान्।भाष्यकारस्त्वभिप्रायानभिज्ञएवंतरंगत्वाद्गौणमुख्ययोर्मुख्येसंप्रत्ययइत्येवमत्रप्रगृह्यसंज्ञानभविष्यतीतिवार्त्तिकंप्रत्याख्यातवान्।तदे
वंगोऽभवदित्यत्रनिपातत्वेपिभाष्यकारमतेनगौणार्थत्वान्नप्रगृह्यसंज्ञाअंतरंगस्यकार्यस्यप्राप्तिरितिस्थितम्।ननुगौणार्थत्वेशब्दानांकार्यप्रवृत्तौ
गोर्वाहीकस्तिष्ठतिगांवाहीकमानयेत्यत्रद्रष्टव्यत्वेनप्राप्नुतःअत्रस्तूपचरितार्थोगोशब्दइतिच्यते।द्विविधंहिशब्दानांकार्यमस्तिप्रातिपदिककार्यं
पदकार्यंच।तत्रपदकार्येषुगौणमुख्यन्यायःनप्रातिपदिककार्येषु।पदस्यक्लिष्टपदसामानाधिकरण्यान्यथानुपपत्त्यागौणार्थता।प्रातिपदिकस्य

प्रयोगान्महत्त्वपर्यन्तेरणसामानाधिकरण्यासंभवाद्गौण्यार्थे तानेवनिमित्तं तुं शक्यते। प्रातिपदिककार्यं च बहुत्वाद्यत्र इति तत्प्रवर्त्तत एव "तदुक्तम्" अयोग्यएत
देवं भवति यद्विशब्दाश्रये शब्दमात्रेतद्भवति। शब्दाश्रये चबहुत्वादिइति। तदेवं गोऽभवत्त्वद्भवतीति चात्र गौण्यार्थे सिद्ध्यतीदं। महद्भूतश्चंद्रमा इत्यत्रतु
चंद्रमसः पौर्णमास्यां महत्त्वस्य सद्भावादनुपचरितत्वमिति महच्छब्दस्यान्महतइत्यादिनाप्राप्तोऽयेवात्वमिसार्थं क्वात्रापि गौण्यार्थतां प्रतिपादयितुमाह॥
महत्त्वं शुक्लभावं च प्रकृतिः प्रतिपद्यते। भेदेनापेक्षिता सा तु गौणत्वस्य प्रयोजिका॥ २८२ महद्भूतश्चंद्रमाः शुक्लीभवति पट इत्यत्रापि प्रकृतिर्महत्त्वं शुक्लभा
वं च भेदेनाश्रितापूर्वावस्थोपचरितोत्तरावस्थतयैव प्रतिपद्यते। ततश्च यद्यपि वस्तुत्वहत्वादेकएवार्थः तथापि विवक्षापेक्षिताऽऽश्रितासती गौणत्वं प्रयोजय
ति। एतदुक्तं भवति। यद्यपि चमहत्त्वं शुक्लभावश्च तथैव विद्यते तथाप्यत्रशब्दवृत्त्योन्मज्जद्रूपाप्रकृत्यवस्थैवगौणतइतितदाश्रयेणोपचरितत्वान्महत्त्व
स्यनभवत्यत्रमहच्छब्दस्यात्वं। शुक्लीभवतिपट इत्यस्य कार्येण किंचिदस्ति अर्थप्रदर्शनार्थं केवलमत्र प्रदर्शितो। २८२ अथाग्निसोमौ माणवकाविव्यत्र संज्ञाश
ब्दत्वान्मुख्यार्थत्वेग्नेःस्तुतस्तोमसोमा इति षत्वं कस्मान्न क्रियत इत्याह॥ ॥अग्निसोमादयः शब्दा ये स्वरूपनिबंधनाः। संज्ञाभिः संप्रयुक्तास्ते प्रसिद्धे
ष्वेषु गौणता॥ २८३ इहाग्निसोमादयः शब्दा देवतावाचकाः स्वरूपनिमित्तकाः संज्ञाभूतार्थेष्वतयश्चेति त्रिविधाः संभवंति। तत्र देवतायां स्वरूपनिमित्तेषु
संज्ञासु चैते मुख्यार्थाः एवं तत्र संज्ञायां गौणता इति देवतायामग्निसोमादयः प्ररूढिमुपगताः माणवके चाप्रसिद्धा इत्येवमप्रसिद्ध्यातेषां गौणार्थत्वमुख्य राम०

त्यार्थान्तरमेव तदध्यारोपेण यत्राभिदधति तत्र गौणार्थत्वं स्फुटमेवैते शब्दाः प्रतिपद्यन्ते इति बोद्धव्यम्॥२८४॥ अ २

दत्तशब्दस्यार्थवृत्ति र्यस्य सतादृशोऽग्निदत्तः २

तेन तदध्यारोपेणेति बोद्धव्यो। अतश्च षत्वाप्रवृत्तिरेव। यत्र तु तस्मिंस्तदध्यारोपे गुणाग्निसोमास्थः प्रवर्त्तेते तत्र स्फुटैव गौणार्थता मिस्याह॥ ॥अग्निदत्तस्त-
योर्निःस्यात्तत्र स्वार्थो पसर्जनः। शब्दो दत्तार्थ इति तादृशौ णत्वं प्रतिपद्यते। स्वार्थं देवतालक्षणमुपसर्जनीकृत्य हरिश्चंद्रो माणवक इत्यत्र सुट्समर्थनार्थं
प्रस्तौतुमाह॥ ॥निमित्तभेदासक्तौ ते शब्दव्युत्पत्तिकर्मणि। हरिश्चंद्रादिषु सुटो भावाभावौ व्यवस्थितौ। हरिश्चंद्रादिषु सुटो भावाभावौ निरूपितावेव यस्मा-
च्छब्दक्रियायां तत्र निमित्तभेदः समाश्रीयते। कृष्णावनादिभ्यते प्रसिद्धो हरिश्चंद्रः साधुः। हरिश्चंद्रोपसेस्य तस्मिंस्तद्व्युत्पत्तिकर्मण्यभाव एव सुट इत्यसोक्त-
यमेव। अथ यदा पुरातन हरिश्चंद्रगतगुणसंदर्शनेन साक्षाद्धरिश्चंद्रोयं माणवक इत्युच्यते तदा किं गौणार्थत्वान्न भवितव्यमेव सुटेत्यसोक्तयं माह॥ ॥ दर्शयितुं ५
अध्यारोपप्रसंस्कारोयः शब्दोन्येन युज्यते। तत्रांतरंगः संस्कारो बाह्येर्थेन निवर्त्तते। हरिश्चंद्रशब्दस्तावद्दृशावेव संस्कृतः उत्तरकाले प्राप्तसंस्कारः सन्नसोप्र-
दा हरिश्चंद्रगुणसधर्मेणार्थेन प्रयुज्यते तदान्तरंगः संस्कारो वा कार्यवेलायामर्थान्तरसंबंधावसरेण निवर्त्तत इति वैयाकरणसमयः। यथा करिष्यति स्वः वर्षेण
गमिष्यतीत्यत्र स्वः शब्दसंनिधानाद्भविष्यदनद्यतनलक्षणकालप्रादुर्भावे भविष्यत्सामान्यसमाश्रयेण विहितस्य ल्टो न निवृत्तिः शाकोकतुमेवमत्रा-
पि हरिश्चंद्रो माणवक इति गौणार्थेपि सुट् सिद्ध एवेति। इदानीं न्याय्यदर्शनच्छायया बोद्धव्य एव शब्दार्थे नास्ति कश्चिद् गौणमुख्यविभाग इत्याशंक्याह॥
॥ ॥असंतविपरीतोपि यदा योर्थोवधार्यते। यथा संप्रत्ययं शब्दस्तत्र मुख्यः प्रवर्त्तते। इह वक्तुरिच्छया विपरीकृतेर्थे कश्चिद्यावच्छब्दः प्रवर्त्तते तावद्यदा

यथावत्त १

५९ 59 यथाविपर्ययेण बाह्यार्थावधारणं क्रियते तत्र यथासंप्रत्ययप्रसरानुसारेण लोकव्यवहारः प्रवर्त्तमानः सर्वत्र मुख्यतयैव प्रवृत्त इति वा केन शब्देषु गौणमुख्यविभागः क-
ल्पितः। इदानीमत्रापि गौणमुख्यविभागं समर्थयितुं सत्यासत्यविभागं तावदुपक्रमितुमाह॥ यद्यपि प्रत्ययाधीनमर्थेन तावद्धारणं। न सर्वः प्रत्ययस्तस्मिन् प्रसिद्ध
इव जायते॥ दृष्टो न सलिलेन तुल्यं मृगतृष्णादिदर्शनैः॥ तुल्यत्वे दर्शनादीनां न जलं मृगतृष्णिका। प्रदसाधारणं कार्यं प्रसिद्धं रज्जुसर्पयोः॥ तेन भेदः परिच्छेद्यस्त-
स्योस्तुल्येपि दर्शने॥ देवपीतिज्ञारिकोर्व्यानं दर्शनमित्यादि कारिकाद्वयं समापतत्त्वं स्त्रीणं च मलपुस्तके परित्यक्तमिति तिनापि लिखितं तद्दूर्ल अपदर्शनस्य विषयाप्रम-
त्यत्वेनाप्यसत्यत्वमुपदर्शयितुमाह॥ ॥प्रसिद्धार्थविपर्यासनिमित्तं यदुत्पद्यते। यत्तस्माल्लक्ष्यते भेदस्तमसत्यं प्रचक्षते॥ यच्चानैमित्तिकत्वेन प्रसिद्धार्थवि-
पर्यासनिमित्तं प्रसिद्धः स्वरूपोऽर्थः तस्य विपरीतो यो मिथ्यात्वलक्षणस्तस्य निमित्तं कारणं मिं द्विविषयगतो दोषदूषितः स्यात् तस्माद्भेदो विज्ञानयोर्लक्ष्यते द्विचन्द्रा-
असत्य ४ दिः तेन यामतं तदृशं विषयं प्रचक्षते। पुनरपि दर्शनभेदमाह॥ ॥यत्तु निम्नोन्नतं चित्रे सरूपं पर्वतादिभिः। न तत्र प्रतिघातादिकार्यं तद्वत्सवर्त्तते। पर्वतादि-
भिः सरूपं निम्नोन्नतं चित्रभित्तौ दृश्यते। न च तावता तत्र प्रतिघातादिकार्यभेदः। ज्ञानान्तरेण तत्र भेदावगतिरेवेत्यर्थः। एतदेव दृष्टान्तान्तरैः प्रतिपादयितुमाह
॥ ॥स्पर्शो प्रबन्धो हस्तेन यथा चक्रस्य संततः। न तथा लातचक्रस्य विच्छेदोऽपि यस्त्वितस्मान्न विषयः कथं। महता न प्रियते देशः प्रसिद्धैः पर्वतादिभिः। अल्पदे- हेरंबं०
शान्तरावष्टंभं प्रतिबिंबं तु दृश्यते। मरणादिनिमित्तं च यथा मुख्या विषादयः। न ते तस्मात् प्रादुर्भवन्ति स्वप्नतद्दर्पस्य साधकाः। अत्र हस्तिकान्विकौ ते अश्वकान्वि-
तं स्पृश्यते हि तत्॥२९४॥ वप्रप्राकारतल्पैश्च स्पर्शनावरणैस्तथा॥ नगरेषु न ते तद्वद्गन्धर्वनगरेष्वपि॥२९५॥ मृगपश्वादिभिर्व्यावान्मुख्यैरर्थः प्रसाध्यते॥ तावान्नम्न

+२११+ २

स्य श्लोक १

२८०

क्षीणो तद्दत्तादौ कार्यभेदादेव भेदमध्यवसायकल्पस्य यातान्यतिक्रातिवाचकानीशितवानि तिरस्तपस्वादिभिरित्येसार्थः। अनन्तरस्यैवं इदानीमुपसंहर्तुमाह॥ देशका
लेंद्रियगतैर्भेदैर्येदृश्यते न्यथा। यथाप्रसिद्धिर्लोकस्य तथा तदवसीयते॥ देशभेदे नासन्निविप्रकर्षेहरूपेण कालभेदेन यथा ग्रीष्मे मरीचयो भौमेनोष्मणा स्पंदमा
नादूरस्थस्य जलज्ञानमुपजनयंति। इंद्रियभेदेन यथा तैमिरकस्य हि चंद्रज्ञानमुपजनयंति। तैर्देशकालेंद्रियगतैर्भेदैरन्यथा दृश्यमानं वस्तु लोकप्रसिद्धिव
शाद्वार्द्धा राद्धप्रत्ययभेदेनार्थक्रियाभेदेन च यथापूर्वं दृश्यते परीक्षेनाध्यवसीयते॥ ततश्चैदमत्रार्थतत्त्वं गोद्वयमित्याह॥ ॥ इन्द्रियोपघातजेऽज्ञानेऽयथ्रज्ञानमलो

३००

किकं। नताभ्यां व्यवहारोस्तिऽत्राद्वा लोकनिबंधनाः। उपघातजे सत्यत्वविपरीतं तैमिरिकादिज्ञानं अलौकिकं च यदपि परमर्षीणां संबंधि ज्ञानं ताभ्या [redacted]
मुभाभ्यामपि व्यवहारनिर्वहणमशक्यमित्यतो यथैवाऽविसंवादि लोकप्रसिद्ध्या सकलव्यवहारनिर्वहणनिपुणेऽज्ञानेऽयथावदर्थतत्त्वावधारणाय समाश्रीयते॥
यथोक्तेश्च समाख्येयतत्त्वानामर्थानां लौकिके दृश्या। व्यवहारे समाख्यानं तत्प्राज्ञो न विकल्पयेदिति। तथैवार्थस्वरूपप्रत्यायनाय शब्दा लोकनिबंधना लोकव्यव
त्वा सवलज नित्वा र [illegible]हारनिमित्तम्मताश्च वर्तमानाः प्रसिद्ध्यप्रसिद्धिभ्यामेव सवलजनिताभ्यां गौणमुख्यविभागमापादयंतीति बोद्धेपि शब्दार्थे व्यवस्थित एवं गौणमुख्यप्रवि

३००

भाग इति सिद्धं। एवं गौणमुख्यविभागमुक्त्वा तत्प्रसंगेन च समासासत्यविभागं विधाय पुनरपि शब्दानां मुख्यानां तरीयकविचारं वेतसेनकर्तुमाह॥
घटादिषु यथादीपेनार्थेन प्रयुज्यते। नतोऽन्यस्यापि सांचिव्यात्सकरोति प्रकाशनांॅरहयस्ततिपादनाय शब्दाः प्रयुज्यंते तेन तस्य प्रयोजकं मुख्यं। तत्प्रतिपादनावसरे च सं

३०१

पो १

स्वार्थानुष्ठापकत्वं प्रयोजकत्वम् १



६० 60 निधानाद्घटस्य तस्याप्रतीतिस्तत्तस्य नान्तरीयकमुच्यते। एतत्तद्दृष्टान्तद्वयेन प्रदर्श्यते। घटादिविषया दीपादय इति ज्ञापकदृष्टान्तोपदर्शनं। घटादिग्रहणा
तेषु विषयेषु यथा ज्ञापको दीपो येनार्थेन घटादिज्ञापनलक्षणेनैव ततः प्रयोजकादन्यप्रकाशनं नान्तरीयकं यथा करोति एवं दार्ष्टान्तिके योजयितुमाह॥ संसर्गि नि॥३०१॥+२
षु तथार्थेषु शब्दो येन प्रयुज्यते। तस्मात्प्रयोजकादन्यानपि प्रत्याययत्यसौ॥ यथा भावरूपादावर्थेषु बहुषु संसर्गिषु मध्यादेनार्थेन सिद्धतादिना सो भावशब्दः प्रयु सिद्धो धात्वर्थो भावः ३
ज्यते तस्मादन्यानपि लिङ्गसंख्यादीन्नान्तरीयकतयास्थितान् संनिधानात्प्रत्याययत्येवेति बोद्धव्यं। कारकहेतुदृष्टान्तोपदर्शनार्थमाह॥ ॥निर्मथनं यथार उत्पादको हेतुः कारकहेतुः ४
णयोरन्यदुपपादितं। धूममप्यनभिप्रेतं जनयत्येकसाधनं। अरण्योः संबन्धि यन्निर्मथनं तदन्यार्थं अग्निनिष्पत्त्यर्थेऽग्निस्तत्प्रयोजकद्रव्यं। तस्मा
न्नान्तरीयकतया धूममप्यनुपयोगिनं जनयत्येव। कीदृशमेकसाधनं एकहेतुकमित्यर्थः। अरण्योरित्यनेनोत्तरारणिरधरारणिश्च तन्त्रेणोच्यत इति दर्शितं।३०३॥
पुनरपि दार्ष्टान्तिके योजयितुमाह॥ ॥तथा शब्दोऽपि कस्मिंश्चित्प्रत्याय्येऽर्थे विवक्षिते। अविवक्षितमप्यर्थं प्रकाशयति सन्निधेः॥ कस्मिंश्चित्प्रत्याय्येऽर्थे सि
द्धतारूपे धर्मे विवक्षितमर्थं पुंस्त्वैकत्वलक्षणं प्रकाशयति प्रत्याय्यप्रतिसंनिधानादिति॥ ननु यत्र वस्तुगतिरीदृश्येव प्रदीपादिना नान्तरीयकप्रत्यायनेन
प्रयोजकं प्रकाश्यते तत्संनिधानान्नान्तरीयकतयान्यदपि घटकुड्यादीति तत्र युक्तं शब्दस्य तत्प्रतिपादनाय वक्त्रा प्रतिपादयितुमिष्टस्य त्वेवंभूतानन्यप्रति हेरंब०
पादनं कौतुकं तस्य नान्तरीयकप्रत्यायनेनेत्याशङ्क्याह॥ ॥यथैवात्यन्तसंसृष्टस्य कुसुमगन्धो न शक्यते। तथा शब्दोऽपि संबन्धी प्रविवेक्तुं न शक्यते॥ ३०५

यामत्वस्मांसाथिं नाम स्वमांसमंसर एव श्लोकं लकं टकादिरनुपयोग्यपि त्यक्तुं न शक्यते तथा शब्दोऽप्यसंनसंबंधाल्लिंगसंख्याप्रतिपादकस्तत्र न केवला प्रकृतिः प्रयोक्तव्या
न च केवलः प्रत्यय इति प्रविवेक्तुं परिहर्तुं न शक्यते। [३०५] अत एव तत्रार्थेषु बहुषु संसर्गिषु सन्निहितेषु कः शब्दस्यार्थो वाच्यः स्यादित्याह॥ ॥अर्थानां सन्निधानेऽ
पि सति चैषां प्रकाशने। प्रयोजकोऽर्थः शब्दस्य रूपाभेदेऽपि गम्यते॥ [३०६] बहूनां संसर्गिणामर्थानां तत्र सन्निधाने तेषां च सत्यपि शब्दादीपादिवा विशेषेण प्रकाश
नेऽस्त्यस्य प्रयोजकः स एव वाच्योऽर्थोऽन्योन्तानरीयको न तस्य प्रयोजकत्वं। तत्रापि रूपस्याभेदे समानरूपत्वे [illegible] इति। [३०७] एतदेव वैतत्येन प्रकारभेदप्रदर्शनपूर्वक
माह॥ ॥क्वचिद्गुणप्रधानत्वमर्थानामविवक्षितं। क्वचित्सान्निध्यमेतेषां प्रतिपन्नावकारणं। पश्चानुपातं यत्र वेन तत्क [illegible] स्मिंश्चित्प्रतीयते। क्वचित्प्रधानमेवार्थो
भवत्यन्यस्य लक्षणम्॥३०॥ अत्र च गुणप्रधानता विपर्ययः परार्थैकदेशाविवक्षा। सकलपदार्थाविवक्षा। उपात्तपदार्थापरित्यागेनैवान्यार्थोपलक्षणमित्येव
मनेन श्लोकद्वयेन प्रकारचतुष्टयस्योद्देशः कृतः। [३०८] अथाद्यप्रकारप्रदर्शनार्थमाह॥ ॥आख्यातेन तद्धितार्थस्य यत्किंचिदुपदर्शकं। गुणप्रधानभावस्य तत्र दृष्टो वि
[३०९] पर्ययः॥ तेन दीव्यतीत्याख्यातेन तद्धितार्थस्य निमित्तत्वेनोपक्रान्तस्य तत्र क्रियाप्रधानमाख्यातमिति तदर्थस्यैव तद्धितान्तादवगतिः स्यात्। यत्र तु तत्र क्रियाप्रधान
त्वेऽपि चाख्यातस्य तद्धितः स्वभावात्साधनप्रधान इति साधनार्थस्यैव प्राधान्येनावगतिरिति तेन दीव्यत्यादौ निर्देशे गुणप्रधानभावो न विवक्षितः। प्रकरणके
वलादिक्रियाकर्तृमात्रमेव तत्र प्रयोजकमिति स एव मुख्योऽर्थः वक्ष्यति च गुणप्रधानता दृष्टपुरुषादि विपर्ययः। निर्दिष्टस्यान्यथात्वात्सत्रे नित्यत्वान्न विरुध्यते। य

मे१

स्वरसमाहाररूपा भवन्ति॥ तत्र ह्रस्वस्वरितादीनां कियदुदात्तं कियदनुदात्तं आदौ किमुदात्तमथानुदात्तमध्येऽन्ते वेति सन्देहापाकरणायोक्तं। तस्यादित उदात्त ह

६१ मानिर्देशामथोः स्पृष्टे पञ्चशास्त्रं विधायकं। किं चित्सामान्यमाश्रित्य स्थिते तु प्रतिपादनं। योर्ध्वयोः पीठद्वयस्य ग्रन्थ तयोरश्वपीठयोः। यथोपलक्षणार्थत्वं तथार्थेष
61 नुशासनमिति। अथ कश्चित्सन्निधिमिच्छेत्तत्प्रतिपादनायाह॥ ॥निर्देशे लिंगसंख्यानोसन्निधानमकारणं॥ सिद्धलक्षणो भावो घञादीनां निमित्तत्वे
नाभीष्ट इति तत्प्रतिपादनाय भाष्य इत्यस्मिन्निर्देशे लिंगसंख्ययोर्नान्तरीयकतया प्रतिपन्नावपि सन्निधानमकारणं। ननु तयोः प्रयोजकत्वमिति शावत्। ननु नान्त
रीयकतया प्रतिपन्नौ कथं कश्चित्सान्निध्यमप्येषां प्रतिपन्नावकारणमित्युक्तम्। प्रयोजनकार्यं वक्तव्यवहारं प्रयुक्ताय तत्प्रतिपन्नावकारणमित्यभिप्रायः॥ रूढानां
सच्चानुपात्तमिच्छेत्तत्प्रतिपादनायाह॥ ॥प्रमाणमर्द्धह्रस्वाद्यनुपात्तं प्रतीयते॥ इह उदात्तानुदात्तस्वरसमाहारः स्वरित इत्युक्तं। ह्रस्वदीर्घप्लुताश्च मात्रिकद्विमा
त्रत्रिमात्रलक्षणा उदात्तानुदात्तमर्द्धह्रस्वमिति। अत्र चार्द्धह्रस्वग्रहणमर्द्धमात्रालक्षणस्य प्रमाणस्योपलक्षणमिति तदेतत्साम्यं नीयते इत्यर्द्धह्रस्वग्रहण
प्रतिपाद्यस्य प्रधानस्याविवक्षेवोक्ता। एतदेव प्रदर्शयितुमाह॥ ॥ह्रस्वस्यार्द्धं च यद्दृष्टं तत्तस्यासन्निधावपि॥ ह्रस्वस्य लक्षणार्थत्वात्तद्देशाभिधीयते॥ अत
त्र ह्रस्वस्यार्द्धं च यद्दृष्टमर्द्धमात्रात्मकं तत्तस्य ह्रस्वस्यासन्निधावपि दीर्घप्लुतयोरप्यादिमत्ताद्धमात्रोदात्तेत्युच्यते। कस्मादित्याह। ह्रस्वस्य लक्षणार्थत्वादिति। अ
र्द्धह्रस्वमित्यत्र ह्रस्वग्रहणं मात्राया उपलक्षणार्थं अतो दीर्घप्लुतयोरप्यादिमत्ताद्धमात्रोदात्तेर्भवतीत्यभिधीयते। किंवदित्याह। तद्देशेति। यथा तस्य ह्रस्वस्यार्द्ध
मात्रोच्यते तथा तद्देशं निर्दिष्टं दीर्घप्लुतयोरपीत्यर्थः॥ अथवा प्रकारत्रयमत्र प्रतिपाद्यते। तत्राद्यं प्रकारमाह॥ ॥दीर्घप्लुताभ्यां तस्य स्यात् ह्रस्वग्रहणेन उकालोऽत्रे हेरंब०

तिवोढव्यम्॥ एतदेवान्ये रुक्तम्॥ अर्द्धह्रस्वमित्यनेनार्द्धमात्रा लक्ष्यते ह्रस्वग्रहणमतन्त्रमिति॥ तस्माद्ध्रस्वस्यात्र लक्षणार्थत्वाद्दीर्घप्लुतयोरप्यर्द्धमा
त्रोदात्ता २

स्यादीर्घप्लुतइत्यत्रैकयोगनिर्दिष्टत्वाद्दीर्घप्लुतावपि लक्ष्येते। ततश्च दीर्घप्लुताभ्यां तस्या ह्रस्वत्वाच्छेदः स्यात्। विषमविभागेप्यर्द्धशब्दो ह्रस्वो ग्रामार्द्धो नगरार्द्ध इति तत्पर्यात्रेति
दीर्घप्लुतयोरप्यर्द्धमात्रोदाहृता भवति॥ द्वितीयं प्रकारमाह॥ ॥मात्रयावा विशेषणं।मात्रया अथवार्द्धस्यावच्छेदः। ह्रस्वसंज्ञकस्याविवक्षितत्वात्। एतच्च निदर्शितं ह्र
स्वस्यार्द्धमित्यनेन॥ अथवा निरस्तावयवविभागोऽर्द्धह्रस्वशब्दोऽखंड एवार्द्धमात्रे जातेः समपर्णादिवदुपलक्षक इति तृतीयमत्र प्रकारमाह॥ ॥जातेर्वा लक्षणा
य स्यात्सर्वथा समपर्णवत्॥३२२ इदानीं क्वचित्प्रधानमेवाप्रोभवत्यन्यस्य लक्षणमिति व्याख्यातुमाह॥ ॥गंतव्यं दृश्यतां सूर्य इति कालस्य लक्षणे। प्रायतां कालदृश्ये
तत्सोपायमभिधीयते॥३२३ पथिकैः क्वचिद्दृश्यमभिधीयते स्वयंतामप्राप्तेरोधागंतव्यः सूर्यश्च दृश्यतामित्यत्र सूर्यदर्शनप्राधान्येन शब्दः प्रयुज्यमानोऽन्यायतामस्तोया
नभागोऽर्द्धः परिशिष्यत इत्यर्थे समसोपायस्य सन्निश्चयस्योपलक्षकः संपद्यत इति प्रधानेनार्थेनान्यार्थोपलक्षणमिति लक्षितप्रार्थमुख्यशब्दार्थोऽपि न स्यादिति॥३२४॥
एतदेव श्लोकत्रयेण शास्त्रलोकयोरुदाहरणे प्रवृत्तिस्य प्रदर्शयितुमाह॥ ॥विध्यर्थस्य धनुषेत्यत्र विशेषेण निदर्श्यते। सामान्यमात्रयः शाक्तेयः कश्चित्सति
पादकैः॥३२५ अथ धनुषेत्यनेन विशेषेण करणसामान्यमात्रं निदर्श्यते। तत्कीदृशमित्याह। शाक्तैः करणशाक्तेराश्रयोऽधिकरणमात्रं। ततश्च तस्यायः कश्चित्सतिपाद
क उपादीयते एतदुक्तं भवति। करणनिषेधपराया चोदनायां धनुर्लक्षणस्य विशेषस्याऽपरित्यागेनैव करणमात्रस्य मुख्यत्वमिति शास्त्रीयमुदाहरणं उक्तं चाति
धासकरणेन तीतरथा स्यात्तिमसंग इति।३२६ विशेषाभिधायकेऽपि वाक्ये सामान्यमात्रमेव प्रयोजकं लोकेऽपि दृश्यत इत्याह॥ ॥काकेभ्यो रक्ष्यतां सर्पिरिति बालोऽपि

६२ चोदितः। उपघातपरेवाक्येन त्वादिभ्यो नरक्षति। सर्पिषः काकेभ्यो रक्षणमत्रविशिष्टमेवविहितमप्युपघातमात्रनिवारणफलं पर्यवस्यतीति तदेवं त त्रप्रयोज
62 कं वा द्रष्टव्यं। क्वचित्साक्षादनुक्तमपि मुख्यार्थनांतरीयकत्वात्प्रतिपद्यत एवेति दर्शयितुमाह॥ ॥प्रक्षालनं द्वाराद्वाणां स्थलानां मार्जनं तथा। अनुक्तमपि रू
पेण मुख्यं गवाद्यस्थनीयते। भोजनमस्योपपाद्यतामित्यत्र भोजनोपपादनं द्वारवृः प्रसादपर्यस्तदंगानामासनदानपात्रप्रक्षालनानां नांतरीयकत्वात्प्रसादनं क नादी ३
रोत्येव। प्रक्षालनइतिवा पाठः। द्वाराणां प्रक्षालनेन द्वाद्वेनोपात्तेस्थलानिमार्जनाद्यनुक्तमपि [redacted] संभवाद्गुणं गवाद्यतीयत एवेति। तदेवं प्रयोजकमिदं
तेषामत्रेदं नांतरीयकमित्येतदेव वितत्यप्रसंगाद्वैचित्र्येणोपदर्शितं। एवं प्रमाणमईहृस्वादाविस्तारिना प्रक्षालनं द्वाराद्वाणामित्यं तेन ग्रंथेन यद्व्यनुगतमि
त्यादि श्लोकैर्व्याख्यातः। एतेन श्लोकेन प्रकारद्वयेन लक्षणा प्रदर्शिता। कदाचिन्मुख्यार्थस्यागेनैवान्यस्योपलक्षणमेतदेवाविवक्षितं वाच्यमुच्यते। कदाचिन्मु
ख्यार्थाविरामोपायपूर्वकमन्यार्थोपलक्षणमेतदेव विवक्षितान्यपरवाच्यमुक्तं विहितेयं द्वैविध्यमुख्येनांतरीयकविभागउपदर्शितः। अथात्रेदं गौणमिदं मुख्य
मिदं नांतरीयकमित्येवं शब्दार्थनिर्णयप्रस्तावेन तन्निश्चयोपायानुपदर्शयितुकाम आह॥ वाक्यात्प्रकरणाद्यर्थादौचित्याद्देशकालतः। शब्दार्थाः प्रविभ
भीर ज्यंतेन रूपादेव केवलात्॥ तत्र वाक्याच्छब्दार्थनिर्णयो यथा। कटं करोतीति समुदारं दर्शनीयमिति तु साधारणमपि कटं कर्म तो प्रदाकटस्यैव करोतिक्रियया संबंधः। तदा द्
र्यस्य च निर्गुणस्यानुपपन्ने र्गुणानां च निरधिकरणानामसंभवाद्याकांक्षादिनात्मसामान्याधिकरण्येन वाक्यार्थात्समन्वयादिति भीमगुणान्वितस्यैव कटस्य हेरंब०

करणं वाक्यार्थः। वक्ष्यति च। आश्रयाश्रयिणोर्वाक्यान्निर्णयस्त्वगति स्थते इति। तथा च शास्त्रे कर्मणि द्वितीयेत्यादीनि पृथगेव प्रकरणानि विरचितानि तत्र प्रातिपदिका
द्दनभिहिते कर्मणीत्यादेकत्वादितत्र द्वितीयाद्या विभक्तयो भवन्तीत्येवमर्थस्य संगतेराकांक्षादिवशाद्भिन्नेष्वपि प्रकरणेषु तासां परिलोचनके श्रोतरि वाक्यीयः संबं
धोऽर्थः निश्चयः पर्यवस्यतीति वाक्याच्छुद्धार्थनिर्णयः। तथात्र प्रकरणमप्यग्रशब्दस्यार्थनिर्णयनिमित्तं॥ यथा यात्राप्रस्तावे सैंधवानां चोदनमश्वानयनपर्यवसा
यि भवति। भोजनप्रस्तावे तु सैंधवलवणप्रतीतिमुपजनयतीति। आश्रयिणो धातुप्रकरणात् धातुरित्युक्तो। तथा चोभयावगतो संस्याकर्तृकरणयोस्तृतीयेत्यत्र कार
काणां प्रक्रांतत्वात् करणशब्देन क्रियाग्रहणं न विज्ञायते शब्दैर्वैरित्यादौ सत्रे च धातावधिकारे करणशब्दात् क्रियाप्रतीयत इति। अर्थेत्यशब्दस्याच्छुद्धार्थ
निर्णयं प्रकल्पयति। यथांजलिना जुहोत्यंजलिना सूर्यमुपतिष्ठते अंजलिना पूर्णपात्रमाहरतीत्यत्र जुहोतीत्याद्यर्थवशात् हि भिन्नार्थ [redacted]
[redacted] वाचकोंजलिशब्दः। शास्त्रेपि परगुणसुहितार्थेत्यत्र गुणेन सह षष्ठी न समस्यत इत्यर्थसामर्थ्यादेकदेशमसंप्रत्ययः। तथा नगाग्रदवादिगु
॥औ२ णानामित्यत्र नाम्न शिणो ग्रहणं भवत्यर्थादिति चित्यादपि शब्दार्थ [redacted] व्यवस्थानं दृश्यते यथा सीतामिमुसलैः केवलैरनिर्दिष्टक्रियापदैर
प्यो वित्याह्निलेखनयुद्धावहननलक्षणासमुचितक्रियाप्रत्याक्षेपेण शब्दार्थनिर्णयः पर्यवस्यति। यथा वा प्रष्ठादयः शब्दा अग्रगामित्वादिनिमित्तसमा
श्रयणेन प्रवर्तमाना स्तत्प्रवृत्तिनिमित्तस्यौचित्यात्सुप्येव संभवात् सुशब्दास्तु उच्यंते। [redacted] तद्योगात् स्त्रियां वर्ततेन साक्षादिति

आश्रयिणोरूपरसगन्धस्पर्शसंख्यादेः ३

६३ प्रसंबंध एव प्रष्ठादीनां तु प्रयोगादाख्यायामित्यनेन निमित्तत्वेनोपदर्शितः। यथा च "यश्च निंबं परशुना यश्चैनं मधुसर्पिषा। यश्चैनं गंधमाल्याभ्यां स
63 र्वस्य कटुरेव सः" इत्यत्रानुक्तक्रियापदानि साधनान्येवौचित्यवशात्स्वसमुचितक्रियापदावगत्या अवांतरवाक्यापञ्ञावनप्रत्यायनपूर्वकमशक्तप्रशं
सालक्षणस्य वाक्यार्थस्य प्रतीतिमुपजनयंति। तथा च "यो निंबं परशुना छिनत्ति यश्चैनं गंधेनानुलिंपति माल्येनार्चयति सर्वस्य तस्य दुस्सजा प्रकृति
रिति कटुत्वाकटुरेवदोमेन स्य दाननिपुण एवेति कस्यचित्स्वल्लभतिपादनमत्र तात्पर्यार्थः। आक्षेपप्रयोगादाख्यायामित्यत्रोक्तं। पुंस्त्रिशब्दप्र
वृत्तिनिमित्तस्य संभवासुत्प्रव्या एतद्गुती देशाच्छब्दार्थनिर्णयो यथा। मधुरायाः प्राचीनादुदीचीनाद्वा नगरादागच्छामीत्युक्ते नगरविशेषात्पाटलि
पुत्रादागच्छामीति गम्यते। पाटलिपुत्रस्य मधुरासंबंधिनोऽस्य [redacted] प्राचीनोदीचीनभागयोर्विद्यते प्रत्यासत्तिरिति कलादेशावश्याद्दत्र निर्णयः॥
कालात्खल्वनुव्यवस्था दृश्यते। यथा शिशिरे द्वारमित्युक्ते पिधेहीति गम्यते। ग्रीष्मसमये त्वेवमभिधाने समुद्घाटयेति गम्यते। एतच्च शब्दार्थनिर्णयो
पायानां दिङ्मात्रप्रदर्शनं बोद्धव्यं। अन्येऽपि तन्निरूपणप्रकारा अनुसंधातव्याः। श्लोकवशाच्चोदाहरणमात्रमेव दर्शितमिति मंतव्यं। सर्वथा न स्व
पमात्राच्छब्दार्थप्रविभागनिर्णयः कर्तुं शक्य इति प्रतिपादयितुमुक्तं। ननूपादेव केवलादिति तथा चापरैः संसर्गादयः शब्दार्थावच्छेदहेतवः प्रदर्शि
ता इत्याह॥ ॥संसर्गो विप्रयोगश्च साहचर्यं विरोधिता। अर्थः प्रकरणं लिंगं शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः। हेरंब०
३१८

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ इह कैश्चिदर्थभेदाच्छब्दभेदोऽभ्युपगतः तदपरैरेकशब्दत्वेनेति द्वौ पक्षौ । तत्र नानात्वपक्षे स्वभावभिन्नेषु तुल्याकृतिषु रू-
पाभेदादनवच्छिन्नेषु निमित्तान्तरैः संसर्गादिभिरवच्छेदः क्रियते । एकत्वपक्षे तथाभिधाने भिन्नासु शक्तिषु श्रुतिसारूप्यमात्रादलब्धविभागासु तथैव सं-
सर्गादिभिरर्थनिर्णयः क्रियत इत्युभयत्रापि प्रकरणादयः शब्दार्थनिर्णयनिपुणा इति तदुपन्यासः क्रियते । तदत्र केचित्सामर्थ्यमेवैकं शब्दार्थनिर्णा-
यनिमित्तमिति मन्यन्ते । योऽप्यर्थप्रकरणादिना तत्र भेदः समधिगम्यते सोऽपि सामर्थ्यादेवात्र प्रतीयत इति कथयन्ति । सामर्थ्यमेव हि संसर्गादिभिर्व्यज्यत
इति । तत्र संसर्गो यथा । सकिशोरा धेनुरानीयतामित्यत्र नियतेन संसर्गिणा किशोरलक्षणेन विशेषावसायनिमित्तेन वडवाया एव संप्रत्ययः । यथा च सव-
त्सा धेनुरित्यत्र वत्ससंसर्गाद्गोधेनोरेव संप्रत्यय इति संसर्गादर्थनिर्णयः । रूढ्या गोरेव धेनुरुच्यते इति तु येषां दर्शनं तेषामत्र संसर्गो विशेषसंप्रत्ययेनोपयुज्यत इ-
ति वोद्धव्यं । शास्त्रे यथा । अवादुर इत्यत्र प्रस्यावेनोपसर्गेण संबन्धः संभवति स एव गम्यते गिरतिः । गृणातेस्तु स्वभावादर्थविरोधादेव संबन्धो नोपपद्यत
एवातयासंसर्गवद्विप्रयोगोऽप्यवच्छेदहेतुर्यथा निर्ज्ञातसंबन्धस्योच्यते । अकिशोरा धेनुः [redacted] अवत्सा अकरभा वा आनीयतामिति किशोरादिविप्र-
योगेन विशिष्टजातीयाया एव धेनोरवगतिरुपजायत इति । शास्त्रेऽपि भुजोऽनवन इति प्रस्य भुजेरवनमनवनं चार्थः तस्य ग्रहणं विज्ञायते । न तु कौटिल्या-
र्थस्य निर्भुजति पाणिमिति । साहचर्यं यथा । रामलक्ष्मणाविति केवलक्ष्मणसाहचर्याद्दाशरथेरेव प्रतीतिः । अत्र यद्यप्येको दृष्टव्यभिचारः तथाप्यद्-

ष्टव्यभिचारसाहचर्यात्तत्तुल्यधर्मात्तागत इति बोद्धव्यं॥ शास्त्रे च यथा विपराभ्यां जेरित्यत्र पराशब्दोऽदृष्टव्यभिचारेण विना साहचर्यादुपसर्ग एव वर्त्तते। अ
द्यपि वहुविवनमित्यादौ विशब्दोऽनुपसर्गोऽस्ति। तथापि समुदायोऽर्थवानजहत्स्वार्थवृत्तिपक्षेऽवयवा अनर्थका एव। अजहत्स्वार्थवृत्तिपक्षे कथं। उपसर्ज
नभावमापन्नो वि[redacted]रप्राधान्यात् गृहीतुमशक्य एवेति नास्ति विरनुपसर्गः। वीजपूतेरित्यत्र तु वीशब्दो न विशब्द इति। भाष्ये प्रयुक्तमसंयोगो द्वितीये
नार्थ इति गौरेव प्रतीयते नाश्वो न गर्दभ इति। यथा चांतरांतरेण युक्ते इत्यत्र द्वावपि द्वितीयां तयोः संभवात् दृष्टापचारौ अतः परस्परसाहचर्यान्निपा
तयोरेव ग्रहणमित्येवं साहचर्यमर्थनिरूपणहेतुः। शब्दानां विरोधादप्यर्थोऽवधार्यते। यथा रामार्जुनावित्यत्रार्जुनसन्निधाने निसर्गवैरिणो जामदग्न्य
स्यैव प्रतीतिः। अर्थप्रकरणदेशकालौ चित्येषां विशेषे व्यापनं प्राक्प्रदर्शितं। लिंगाच्च वाक्यान्तरे दृष्टाद्भेदः प्रसिद्धः प्रतीयते। यथा अक्ताः शर्करा उपद
धातीत्यत्रानेकसंयोजनद्रव्यस्य संभवे तेजो वै घृतमिति घृतस्य स्तुतिरुक्ता। एतस्माल्लिंगात् घृतसाधनत्वमंजिक्रियायाः शर्कराकर्मिकाया निर्द्दि
श्यते। तथा पशुमालभेतेत्यत्र पशुत्वसंबंधिषु प्राणिषु सत्सु छागस्य हविषो वपाया मेदस इति लिंगाच्छागैकार्थसमवायि पशुत्वं प्रतीयते। शास्त्रेऽप्यूह्यं। श
ब्दांतरसंनिधानाद्विशेषावगतिः। यथा अर्जुनः कार्त्तवीर्यः रामो जामदग्न्य इति शास्त्रेऽप्यूह्यं। सामर्थ्याद्विशेषप्रतिपत्तिर्यथा अनुदरा कन्येति साम हेरंब०
र्थ्यादुदरविशेषप्रतिषेधप्रतीतिः। तथा अभिरूपाय कन्या देयेति अभिरूपवराये ति सामर्थ्यात्प्रतीयते। शास्त्रेऽपि प्रथमानिर्दिष्टं समास उपसर्जनमिति समासे शास्त्रे
सा।

समासत्वादस्य प्रवृत्तिः। एकविभक्ति चापूर्वनिपात इत्यत्र यः समासशब्दोऽनुमीयते तस्य प्राथमकल्पिक एव समासे वृत्तिः। व्यक्तिर्लिंगं तस्मान्निर्णयो यथा।
तद्ग्रामस्यार्द्धं लभेते यत्र समप्रविभागेऽर्द्धशब्दो नपुंसकेन परामृशति। तस्माद्ग्रामस्यार्द्धं सममेव प्रतीयते। तं ग्रामस्यार्द्धमित्यत्र तु तमिति पुल्लिंगेन परामर्शा
द्ग्रामैकदेशमात्रं प्रतीयते। शास्त्रेष्वर्द्धेन पुंसकमित्यत्रार्द्धशब्दस्य नपुंसकत्वेन विशेषणात्समप्रविभागवृत्तेरेव ग्रहणम्। स्वरादयः स्वरषत्वसत्वणत्वन
त्वादयः। तत्र स्वराद्यथा स्थूलपृषतीमालभेतेत्यत्रांतोदात्तस्य श्रवणात्स्थूला चासौ पृषती चेत्येवंविधार्थप्रतीतिः। पूर्वपदप्रकृतिस्वरत्वदर्शने स्थूलानि
पृषंति यस्या इत्यन्यपदार्थप्रतीतिः। तथा वेपाद्भः कूप इत्यत्राद्युदात्तश्रवणाद्धि पाशाउत्तरस्य विशिष्टस्यैव प्रतीतिः। अंतोदात्तश्रवणे तद्धि परी
तत्र सत्वाद्यथा। सुसिक्तमतिस्तुतमित्यादौ एजातिक्रमयोः कर्मप्रवचनीयसंज्ञायामुपसर्गत्वाभावेन षोरेव प्रतिपत्तिः। उपसर्गसंज्ञायां तु सत्यां सु
षिक्तं सुष्टुतमित्यादौ षत्वप्रवृत्तेरर्थांतरस्य प्रतिपत्तिः। णत्वनत्वाभ्यां यथा। प्रणायकः इत्यत्रोपसर्गाश्रयणत्वसद्भावे प्रणयनक्रियाकर्तुः प्रतीतिः। ण
त्वाभावे तु प्रगता नायका अस्माद्देशादसौ प्रनायको देश इत्यन्यपदार्थप्रतीतिरिति। तदेवमेतेः शब्दार्थस्य संदेहपराकरणद्वारेण निश्चितार्थावसायहे
तुत्वाद्विशेषस्मृतिहेतवो निर्णयहेतवः संसर्गादय इति बोद्धव्याः। नन्वेकत्वदर्शने भेदाभावाच्छब्दानामर्थस्य संदेहे तन्निर्णयाय प्रकरणादय उच्यंत इति
शोभनं। भेदपक्षे तु विभिन्नत्वादेव शब्दस्तदर्थप्रत्यायनेऽकारिष्यतो। त्याशंक्यात तत्रापि रूपसादृश्योत्पादितसंशीतीनां व्यवहर्तॄणां प्रकरणादिभिरेवशा

65

श्री २

६५ वार्थनिर्णय इति प्रतिपादयितुमाह॥ ॥भेदप्रश्नेऽपि सारूप्याद्भिन्नार्थाः प्रतिपत्तिषु। नियता यान्ति संबन्धं शब्दाः प्रकरणादिभिः॥ ३२१ भेदप्रश्नेऽपि प्रतिपत्तिषु भिन्ना
र्थाः शब्दाः सारूप्याद्भिन्ना इवेति प्रकरणादिभिरेवोक्तस्वरूपैर्नियता अवच्छिन्ना अर्थाभिव्यक्तावुपयोगं यान्ति। तेन कुत्र विषये करणादिभिर्न तरेण नार्थनि
र्णय इति बोद्धव्यं उक्तं चैतत् कस्मादित्याह॥ ॥नामाख्यातसरूपा ये कार्यान्तरनिबन्धनाः। शब्दा वाच्यस्ततेषां र्थो न रूपादधिगम्यते॥ ३२२ इह वा केना
मरूपा आख्यातशब्दा अपि भवन्ति यथा अश्व इति। टु ओ श्वि गतिवृद्ध्योरित्यस्माल्लुङि मध्यमपुरुषैकवचने सिपि निरङि तङ् तं कारलोपे च्लि श्वेती ४
म स पदस्य अस्वभुम्रु च्लिस्यादिना ङादेशेऽश्वयतेरस्तस्मानो गुणे इति रूपत्वे सकारस्य रुत्वविसर्जनीययोः कृतयोर्लुङ्लुङ् ■ सादिनाटि कृते अश्वः द्वि ५
साख्यातपदं श्वयतिक्रियायाः कर्त्रवच्छिन्नायाः अतीतकालायाः प्रतिपादकं। अश्व इति च नामपदमश्वजातीयस्यार्थस्य सत्त्वभूतस्याभिधायक
इत्येतत् जिजय ४ मिति सारूप्यात्संदेहे प्रकरणादिभिरर्थव्यवस्था। अथ अजापयद्युस्माद्धातोः कश्चिदजेयं जितवान् तमन्यो नुप्रयुक्तवानि■ स्यर्थविवक्षायां हेतौ ये
पि विक्रीङ् जीनां णावित्यात्वे अर्तिह्रीव्लीत्यादिना पुकि जापि स्येवं स्थिते लङि शपि गुणायादेशयोः कृतयोः सकारस्य रुत्वविसर्जनीययोः कृतयोः लुङ्ङि
त्यादिनाडागमे च कृते अजापयः इत्याख्यातमयपत्राः अजायाः पयः अजापय इत्यपि नामपदं तत्सदृशं भिसप्यादिना तन्निश्चयः॥ आख्यातसरूपा यथ च नाम
न्यास्तेन यस्य तस्ये सादयः। तथा च न नु विस्तारे इत्यस्माल्लिटि मध्यमपुरुषबहुवचने द्वित्वे च कृते तु एकहल्मध्ये इत्यादिना एत्वाभ्यासलोपयोः कृ हेरंब ०

॥कुशलैः प्रतिपन्नानामयथार्थं प्रतीयते॥३२३॥ या प्रवृत्तये स्तुतिः कल्पना निवृत्तये च निन्दा प्रकल्पना॥५

नयेऽस्तेने व्याख्यातं तत्कृत्स्नस्य स्तुतीयां नस्य सदृशमिति तत्सु उपक्षेपेयसुप्रयत्नं इत्याभ्यां विधादोलोऽतिनस्य च सिध्येऽसो पि चेति ह्यादेशो दिवादिलाच्छ्रुनौ नुबंधलोपेनो
हेरिति हेर्लुकि तस्य प्रसेव्याख्यातपरं यत्नदोषः षष्ठीकरवचनां तयोः सदृशमिति सारूप्यात्संदेहे प्रकरणादिभिस्तन्निश्चीयते॥ कीदृशाः कार्यान्त रनिबन्धनाः॥ का
र्यान्तरं विशिष्टप्रत्ययलक्षणं प्रकरणादिना तन्निबंधनं निमित्तं येषां ते तथाभूताः॥ तेषु रूपमात्रावयोर्विगम्यात् तस्मात्तमश्वोऽजापयः शत्रुमवना नीत्यादि वाक्यार्थे
पर्यालोचने ये वार्थनियोगः आह वा न हि किंचित्स्वरूपेण नियतं कश्चित्। पदानामर्थरूपं च वाक्यार्थादेव जायत इति॥ अथ पुनर्यादार्थनिर्णयप्रस्तावे पद
पदार्थानामसत्यत्वमखंडस्यैव च वाक्यार्थस्य सत्यत्वमभ्युपगंतव्यमिति प्रदर्शयितुमाह॥ ॥यां प्रवृत्तिनिवृत्त्यर्थां स्तुतिनिंदां कल्पनां तामपेक्षावानपृथा
र्थामभिमन्यते परमार्थतस्तु तथाविधस्य वाक्यस्य प्रवर्तनेस्तानिवर्तने वेति वाक्यस्य भूतं वाक्यार्थं तत्रावगच्छतीति पदपदार्थप्रत्ययः सर्वत्रासत्यएवेति सैवं व्याता त्पर्य
शक्तिरितिकैश्चिद्व्यवस्थापितं एतदेव प्रकटीकर्तुमाह॥ ॥विधीयमानं यत्कर्म दृष्टादृष्टप्रयोजनं। स्तूयते सा स्तुतिस्तस्य कर्तुरेव प्ररोचिका॥ दृष्टप्रयोजनं
किंचित्कर्म स्तूयते यथा यो राजानं भजते स सारं भुंक्ते। अदृष्टप्रयोजनमपि। योऽग्निष्टोमेन यजते स स्वर्गं गच्छतीति विलक्षणाः प्रवृत्तिनिवृत्तिप्रयोजनोऽनुस्वा
विभागो वाक्यार्थस्तथाविधवाक्यनिबंधन एवाभ्युपगंतव्य इति स्थितं तैर्न नुकथं न तत्रस्पष्टमेव कृत्वा प्रवृत्तिनिवृत्ती विधीयेते किमनुपयोगिनिंदाद्यर्थं प्रति
पादनासंभारेणेत्याशंक्याह॥ ॥व्याघ्रादिव्यपदेशेन यथा बालो निवर्त्यते। असत्योपि तथाकश्चित्प्रस्तावो विधीयते॥ यथा रुदंतं व्याघ्रो भक्षयती

सं ३

६६ तिवाल्पसोच्यतेन तत्र [redacted] व्याघ्रमक्षणं वक्तुःस्थिरताभवति केवलं माकदाचिदेवं रोदीदितिरोदननिषेधएव तस्य क्रियते तथा तत्र प्रतिषिद्धाचरणा
66 न्नरकपातोभवतीत्येतावन्मात्रं प्रतिपाद्यतइतितत्तदर्थसमाश्रयणेनसत्यस्वरूपपदपदार्थाभ्युपगमो नयुक्तः॥ तथाप्रत्यवायोपदेशेन चयत्कुत्रशास्त्रेप्रतिषिद्धं
नतत्राहोपुरुषिकयाप्रत्यवायविधानमारचय्यप्रेक्षापूर्वकारिणः प्रवृत्तिरुच्यतेत्याह॥ ॥नसंविधानंकृत्वापिप्रत्यवायेन तथाविधेशास्त्रेण प्रतिषिद्धेषुवि
हान्कश्चित्प्रवर्त्तते॥ हष्टप्रयोजनप्रत्यवायप्रति विधाननिदर्शनपूर्वकमेतदेव व्याख्यातुमाह॥ ॥सर्पेषुसंविधायापिसिद्धैर्मंत्रौषधादिभिः नान्यथा
प्रतिपत्तव्यंनदंतोगमयेदिति। नदंतोगमयेत्प्रहतोगमयेत्सर्पोदंष्टा तुकामंत्वेनेनपुरोडाशस्यादंतोपदेशानपूर्वकंभोजनंनिषिध्यते।तत्र कश्चित्स
र्पाणांप्रतिविधानंमंत्रौषधादिभिः कृत्वायदितथाप्रवर्त्ततस्तदानेनशास्त्रानुष्ठानंपरित्यक्तमितिनशोभनमाचरितं॥ अस्त्वेवंविधिनिषेधपरेषुस्तुत्यर्थाद धविं ६
नामसत्यत्वं।यत्रतुस्तुतिनिंदेएवमुख्येप्रयोजिकेतत्रतदर्थानांसत्यत्वमेवोचितमित्याशंक्याह॥ कचित्तुसमाख्यानंक्रियतेस्तुतिनिंदयोः।नत्रापिनिहन्ति चप्रवृत्ति प्र ४
दृष्टोपदिश्यते॥ यत्रापिकश्चित्स्तुतिनिंदाविषयेनयोः संबंधिवाक्यार्थोपयुक्तस्य पदार्थैरेवतेसमाः॥ एतदुक्तंभवति।अन्यानत्रवाक्यार्थोःसाकांक्षत्वा
त्पदार्थतुल्याएवेति ननत्रवाक्यार्थव्यपदेशःकार्यः॥ अथपदैनैकस्मात्पदान्निराकांक्षोर्थःप्रतीयतेतत्रापिकिं तस्याऽसत्यार्थत्वंयुक्तमभिधातुमित्याशंका
ह॥ ॥वाक्यंतदपिमन्यंतेयत्पदंचरित [redacted] दरं ब०
ख्यानंक्रियते तत्रापिसर्वथास्तुतिनिन्दयोः केवलयोर्नकिंचित्प्रयोजनमुत्पश्यामइति प्रवृत्तिनिवृत्तीएवोपदिश्येतेइतिबोद्धव्यम्॥३२८॥ एवंपदपदार्थानामसत्यत्वेवाक्यवाक्यार्थयोरेव सत्यत्वेप्रतिष्ठापिते पदार्थ
नांस्वरूपस्यवाक्यार्थएवनिबन्धनमितिदर्शयितुमाह॥ ॥रूपंसर्वपदार्थानांवाक्यार्थोपनिबन्धनम्॥ एकस्मिन्वाक्यार्थरूपेनिबद्धास्तेसाफल्यंभजन्ते अन्यथा विशरारवएवेतिवाक्यार्थएवते
षांपरस्परसमन्वयेननिबन्धनं॥ वक्ष्यतिचपृथक् निविष्टतत्त्वानांपृथगर्थानुपातिनाम्॥ इन्द्रियाणांयथाकार्यमृतेदेहान्नकल्प्यते॥ तथापदानांसर्वेषांपृथगर्थनिवेशिनाम्॥ वाक्येभ्यःप्र
विभक्तानामर्थवत्तानविद्यते॥ इति॥ यथावोच्यते॥ नहिकेचिदित्यादि॥ ॥ननुवाक्यार्थस्यापिकस्याचिदपरिपूर्णत्वेकिंतस्याप्यपरवाक्यार्थनिबन्धनत्वमङ्गीकार्यमित्याशङ्क्याह॥ ॥सापेक्षा ३

३३० क्रियं । एतदुक्तं भवति । संति वा केषुचिद्वाक्यैकदेशाः प्रसिद्ध्यादिना वाक्यार्थप्रत्यायका इति । तदप्येकपदं वाक्यमेव । यस्मात्तत्र चरितक्रियमिति । चरिता गर्भीकृता आख्यातक्रि-
या यस्य तद्गर्भीकृतक्रियापदं नामपदं वाक्यं प्रयुज्यत इति चरितक्रियापदादस्मादर्थावगतिर्निराकांक्षोपजायमाना दृश्यत इति पदमात्रस्यैव वाक्यत्वं । ३३० एवं यथा ना-
मपदं केवलमपि गर्भीकृताख्यातं निराकांक्षार्थप्रत्यायनाद्वाक्यमेवेति तत्र स्थापितादर्थात्प्रवृत्तिनिवृत्तिपर्यंतव्यवहारसिद्धेः सत्यत्वेनैव तदर्थस्य । तथैवाख्यातं केव-
लमौचित्यादिवशाद्विशिष्टाभिधायकं वाक्यमेवोच्यत इत्याह ॥ ॥आख्यातशब्दे नियतं साधनं यत्र गम्यते । तदप्येकं समाप्तार्थं वाक्यमित्यभिधीयते ॥ ३३१ यथा वर्षती-
त्युक्ते देवो जलमिति कर्तृकर्मोक्षेपात्परिपूर्णार्थत्वे देवो जलमिति यथा वाक्यं एवं तदप्येकपदं समाप्तार्थं परिपूर्णार्थं वाक्यमेवाभिधीयते । तदुक्तमादावेव । आ-
ख्यातशब्द इति वाक्यमिति सर्वं ॥ ३३२ अत्र मीमांसकः प्राह ॥ ॥शब्दव्यवहिता बुद्धिरप्रयुक्तपदाश्रया । अनुमानात्तदर्थस्य प्रत्यये हेतुरुच्यते ॥ ३३३ केवलात्पदाद्या साधुव-
द्भावना बुद्धिः सा साधुवदर्थस्य तस्मादप्रयुक्तस्य पदांतरस्य योऽर्थस्तस्य हेतुरुच्यते । कीदृशी । शब्दव्यवहिता । यथा धूमेन स्वार्थानुमाने शब्दमंतरेण वह्निरुपक्षेपः । नैव-
मत्रापि । श्रुतार्थापत्त्या परिकल्पितो योऽसौ निष्ठसादिशब्दः तेन व्यवहिता । अथ तस्याश्रवणात्कथं तद्व्यवहितेत्याशंक्याह । अप्रयुक्तपदाश्रयेति । अप्रयुक्तमनुच्चा-
रितं वाचकं श्रुतार्थापत्त्याक्षिप्तं आश्रयो द्वारमुपायो निष्ठसाद्यर्थप्रत्यये यस्याः सा तथेति । कस्मात्तदर्थस्य प्रत्यये हेतुरित्याह । अनुमानादिति । निष्ठसादिकं श-
ब्दं श्रुतार्थापत्त्योपस्थापितमनुमायाक्षिप्यासौ बुद्धिस्तदर्थप्रत्ययमुपजनयतीति यावत् । अतो न केवलमेव नामपदं सक्रियस्यार्थस्य वाचकम् । आख्यातं वा

त्य ६

९१

॥३३२॥ १

६७ ससाधनस्येति कथमुच्यते संतिवाक्ये षुवाक्यैकदेशा वाक्यार्थस्य प्रतिपादका इति श्रुतार्थोपपत्त्याच्छब्दाभिसंबंधस्य किं प्रयोजनं एकपदादेव तस्माद् वृक्षस्तिष्ठती
67 त्यादिवन्निराकांक्षार्थप्रत्यायनमुक्तं कथं वाक्यैकदेशस्य सकलवाक्यार्थप्रतिपादकत्वमंतरेण शब्दांतरपरिकल्पनं युज्यत इति परमतमाशंक्याह॥ यस्मिं
पदाद्यो२ न्नुच्चरितेशब्दे यदा योऽर्थः प्रतीयते। तमाहुरर्थं तस्यैव नान्यदर्थस्य लक्षणं॥ इह यस्मादुच्चरितादर्थः प्रत्ययो दृश्यते तेन तस्यार्थमाहुः वृक्षदृत्य स्मादेव चार्थप्र
करणादिना वृक्षस्तिष्ठतीत्यर्थप्रतीतेः एतदेवार्थवाचकत्वाद्वाक्यमित्युक्तमेवा एवंकृत्वा क्रियार्थोपपद[redacted] सेत्यनेन नारंभणीयैव
चतुर्थीतादर्थ्येन सिद्धत्वादित्याह॥ ॥क्रियार्थोपपदेषु वस्थानिनां गम्यते क्रिया। क्रियार्थोपपदेषु विषये क्रियार्थोपपदानां चेतिषष्ठी प्रयोगे सप्तमी। स्थानिनाम
धातूनां६ प्रयुक्तानां संबंधिनी क्रियाहरणलक्षणा। एधेभ्यो व्रजतीत्यत्र धत्राद एवाहरणमभिदधातीत्येधाहरणार्थं व्रजतीत्यर्थप्रतीतिः अतस्तादर्थ्यस्फुटमेवेतिसि न४
द्धा चतुर्थी॥ एवं च कृत्वाहतेो निरादयः क्रांताद्यर्थप्रतिपादका इत्याह॥ ॥हतेो निरादिभिश्चैव क्रांताद्यर्थोवगम्यते निष्कौशांबिरित्यादौ निरादय एवसामर्थ्यात्क्रां
ताद्यर्थप्रतिपादका इति गतार्थत्वात्क्रांतादीनां शब्दानां वृत्तावप्रयोग एव। उक्ते च। उपसर्गास्तेवमालका॥ यत्र क्रियावाची शब्दः श्रूयते तत्र क्रियां विशिंषंति अ
न्यत्र क्रियाविशिष्टं साधनमाहुरितिा एवं वृ[redacted] क्षस्तिष्ठतीति निष्क्रांतः कौशांब्या इत्यादौति घत्यादीनां किं प्रयोगेण केवलैर् वृक्ष इत्यादिकं सर्वत्र नामपदमा
ख्यातं वाप्रयुज्यतां केवलैरेवसर्वत्र वाक्यार्थप्रतिपादनमित्याह॥ नानिशब्दांतरापेक्षा। केवलो वृक्षशब्दो वाक्यार्थप्रतिपादकोन्य एवा वृक्षस्तिष्ठतीति चान्यदे रम०

विततेमर २

वाक्यं। साहचर्याद्वृक्षस्तिष्ठतीत्यत्र वृक्षशब्दं वृक्ष इत्येकपदे वाक्ये ऽभिमन्यत इति भवत्येवं सर्वदा वृक्षशब्द एव केवलः किं न प्रयुज्यते। तत एव हि सामर्थ्यादिना वृक्षस्तिष्ठतीत्यर्थप्र
तीतेः किमनेन वृक्षस्तिष्ठतीत्यादिकेन प्रयुक्तेनेत्याह॥ ॥प्रयोगा इव लौकिकाः। एतदुक्तं भवति। लौकिके शब्दव्यवहारे लाघवं प्रयत्नानादरात् क्वचिद्वृक्षः क्वचिद्वृक्षस्तिष्ठ क्वचिद्वृक्षो दृश्यतां ३
तीति प्रयुज्यते। यथा तरुशब्देनैव लाघवाद्वृक्षार्थप्रतीतौ पादपशब्दं प्रयुञ्जत एवं लौकिका इति न कश्चिद्दोषः। अथ वृक्ष इति केवलं नाम पदं क्वचिद्वृक्षस्तिष्ठति क्वचिद्वृक्षोऽस्तीत्ये
वंविधस्य नियतस्यार्थस्य विशेषभेदेन कथं प्रतिपादकं स्यादित्याह॥ अर्थप्रकरणाभ्यां तु तेषां स्वार्थो नियम्यते॥ एषामेकपदार्थानां वाक्यानां प्रतिनियतोऽर्थः प्रकरणाभ्यां
व्यवस्थाप्यते। एवमखण्डवाक्येषु वाक्यार्थे सत्यरूपे स्थिते किं पदपदार्थपदभागपदभागार्थकल्पनयेत्याह॥ ॥प्रतिबोधाभ्युपायाः कल्प्यन्ते पुरुषं प्रति। एतदुक्तं भवति। ये वा
क्यार्थप्रतिबोधनोपायास्ते प्रतिनियतपुरुषसमाश्रयाः। ते चासत्यरूपा एव च पदपदार्थादीत्याह॥ ॥नावश्यं तेऽभिसंबद्धाः शब्दा ज्ञेयेन वस्तुना। ज्ञेयेन वाच्येन वस्तुनासत्य
रूपेण लौकिकेन नैव नैवश्यं संबद्धा इत्यसत्य[illegible]मतो यं तदिति॥ अप्रयस्मिंस्तु चरित इ[illegible]त्यादिकं यच्छब्दार्थलक्षणमाश्रीयते तन्नदाशशब्दचरितान्यतिन्तुरन्याक्षि
प्तचित्तत्वादकृतसंकेतत्वाद्वा ऽसत्सामर्थ्यप्रतिपत्तौ कुतश्चिद्भ्रमाद्वान्यथाप्रतिपन्नेन तदर्थानवगते रनित्यत्वमेव शब्दार्थसंबंधस्यात्। न चैतद्युक्तमिति श्रुतार्थाप्रतिवा
दी प्रतिपादयितुमाह॥ ॥असत्यां प्रतिपत्तौ च मिथ्या वा प्रतिपादने। स्वैरर्थैर्नित्यसंबद्धास्ते शब्दा व्यवस्थिताः॥ ३२७॥ ते ते शब्दा नित्यतान्वेदसंबन्धस्य नियतार्थप्रतिपा
दका एव व्यवस्थिताः कुतश्चिन्निमित्तादर्थानवगतौ शब्दार्थसंबन्धहानिः प्राप्नोति। तस्मादेकपदेषु पदान्तराध्याहारेण वाक्यार्थावगतिरुपपन्नेति प्रतिपादयितुमा
॥३२७॥

६८ 68

ह॥ ॥यथाप्रकरणं द्वारमित्यस्यां कर्मणःश्रुतौ। यथा न देहि देवेत्येतदुपायादधिगम्यते [३३८] प्रकरणानतिक्रमेण साधनं क्रियाया अविनाभावितया आक्षेपकं भवतीति द्वारं
द्वारमित्यत्र कर्मश्रुतिर्विधाने देहि देवेति एतमर्थं प्रकरणादेरुपायाद्वाचकद्वारेणाक्षिपतीत्येतदेव श्रुतौ [३३८] एवं यस्मिन्नुच्चरितत्यादिके शब्दार्थलक्षणे शब्दार्थसंबंधस्या
नित्यत्वमभिधाय दूषणांतरमभिधातुमाह॥ ॥यैव साधनवृत्तिर्यः शब्दः सत्वनिबंधनः॥ न स प्रधानभूतस्य साध्यस्यार्थस्य वाचकः [३३९]॥ यस्मात्साधनताभिधायी सत्व
प्रधानः शब्दैः स एव प्रधानभूतस्यार्थस्य प्रतिपाद्यस्य सत्वभूतस्याभिधायक उपपद्यते विरोधात् [३३९] तस्मादिदमत्र वक्तुं युक्तमित्याह॥ ॥स्वार्थमात्रं प्रकाश्या
सौ साकांक्षो विनिवर्त्तते॥ अर्थस्तत्तस्य संबंधी प्रकाशायति संनिधिं [३४०]॥ असाव्याख्यातशब्दो नामशब्दो वा स्वार्थमेव केवलं प्रतिपाद्य सापेक्षः साकांक्ष एव विनिवर्त्त
ते तस्य विनिवृत्तस्य संबंधी स्वर्थैः अर्थांतरस्य तद्वाचकशब्दस्य कल्पनद्वारेण संनिधिमुपकल्पयति। तत एव वाक्यार्थप्रत्ययः परिपूर्ण उपजायते इत्येवं युक्तमिति [३४०] इदानी
मखंडवाक्यश्रुतार्थापत्तिवादिनं निराकर्त्तुमाह॥ पारार्थ्यस्याविशिष्टत्वान्न शब्दाच्छब्दसन्निधिः॥ नार्थाच्छब्दस्य सान्निध्येण गमयतीत्युच्यते। तदत्र किं शब्देन शब्द आ
क्षिप्यते उतार्थेन शब्दः आहोस्विच्छब्देनार्थः उतार्थेनार्थ इति चतुष्टयी गतिः। तत्र शब्देन शब्दस्याक्षेपो न युज्यते। स्वार्थप्रतिपादन एव शब्दव्याक्षेपात् तत्राह। न शब्दा
च्छब्दसंनिधिरिति। अथार्थेन शब्दस्याक्षेप इत्युच्यते तत्राह। नार्थाच्छब्दस्य सान्निध्यमिति। नार्थेनापि शब्दाक्षेपो घटते। वाच्यं तु वाचकमाक्षिपतीति युक्तं॥ अर्थो न शब्दा
र्थस्य शब्दांतरस्य चेद्वाचकभावविरहात्कथमर्थेन शब्दस्याक्षेपः। अयं शब्देनोच्चारितेन श्रुतार्थापत्तिपर [redacted] कल्पितशब्दवाच्योर्थे आक्षिप्यते हेरंब॰

क्षंनशब्दादर्थसन्निधिः॥३४१॥ इहपीनो देवदत्तो दिवा न भुंक्ते इत्यत्र भोजनेन विनापीनत्वं देवदत्तस्यानुपपद्यमानं रात्रिभोजनं
नद्वाचकशब्दपरिकल्पनद्वा ४

इत्युच्यते तदप्यनुपपन्नमित्याह। नञ्शब्दाद्यैः सन्निधिरिति। नञः शब्दान्तरवाच्यस्यार्थस्य सन्निधिरुपपद्यते। वाच्यवाचकभावाद् इवेति कथं शब्देनार्थस्याक्षेपः। अथार्थेना
र्थो गम्यत इत्युच्यते। अनुमानमेवैतस्यार्थं भवति। नञ्शब्दार्थस्यासावर्थ इति शब्दैकत्वमेव परित्यक्तं स्यात्। अत एवात्र चतुर्थपक्षप्रदर्शनमौचित्यं न जहातीति भिन्नाः नर
सो न कृत एवं तस्मादेकपदेषु श्रुतार्थापत्त्याशब्दो तदाक्षेपवाक्यार्थावगतिरिति यत्किंचिदेतत्। एकपदमेव नञ्शब्दान्तराभिसंबन्धमन्तरेण प्रकरणादिवशात्तत्तदर्थ
प्रत्यायननिपुणमित्येव मन्तव्यं। पुनः श्रुतार्थापत्तिवाद्याह॥ ॥नश्वरूपमिवाख्यातमाक्षिप्तं कर्मवादिनो दिग्ना तं प्रधानत्वं गुणभावस्तयोः॥ द्वारं द्वारं कर्म
इत्यत्र कर्मपदेनैवाख्यातमसत्त्वमाक्षिप्तं तत्र प्रयुज्यते। तदा युगपत्परस्परविरुद्धयोः सिद्धासिद्धयोरर्थयोरेकस्मिन् शब्दे प्रधानत्वेन वाच्यत्वमापतितं। न चे
पूर्वं तत्र प्रधानमवति तत्परिदृष्टं। पूर्वं यत्र साधनत्वं निरिस्तानेनयः सत्त्वप्रधानो नामाख्यातार्थवाचक उपपन्न इत्युक्तं। इदानीं पुनः प्रत्ययस्य च विरुद्धार्थवाचकत्वमुच्यत इति वि
रोधः सिद्धान्तवाद्याह॥ ॥नैकनामस्वरूपत्वमाख्यातस्योपवर्ण्यते। द्वारं द्वारमित्येतदाख्यातमेव नाम पदस्वरूपं तु वर्ण्यते। अत एवाख्यातत्वप्राधान्येन
क्रियायाः एतदपि नामपदस्वरूपं प्रतिपादकमेवायं॥१०॥ यद्येवं कथमस्माद् द्वितीयाश्रूयत इत्याह॥ अन्वयव्यतिरेकाभ्यां व्यवहारो विभज्यते॥ भाण्डं भाण्डं पिधेहि द्वारं द्वारं पि
धेहीत्यादावाख्यातस्य क्रियाभिधायकत्वं परिदृष्टं नाम्नो द्रव्यवाचकत्वमित्यन्वयव्यतिरेकाभ्यामन्यत्रापि एकपदे द्वारमित्यादौ साध्यसाधनाभिधायित्व
मेवेति भवत्येव द्वितीया॥ अथ द्वारं द्वारमित्यस्मानेकार्थवाचकत्वात्संदेहे कथमस्य वाचकत्वं भवेदित्याह॥ ॥न चापि रूपात्संदेहे वाचकत्वं निवर्तते॥१०॥ रूपमा
३४२

६८ 69 हरेयपि सामर्थ्यादिनां येन निर्णयो व्यवस्थाप्यत इत्याह॥ अर्द्धं पशो रिवयत्या सामर्थ्यात्तद्विकल्प्यते। [३४४] अत्र प्रकृत्यवयवो ऽर्द्धं देवदत्तावयवो ऽर्द्धं पशुस्वामिक मिति सं
देहः॥ तत्र किं संदेहे वाक्यमवाचकमेव। अर्थप्रकरणादिना यस्तत्र कल्प्यत एवं चोदयति॥ ॥ सर्वं सत्यपदं शुद्धं प्रविभावनिबंधनं। संसर्गे च विभक्तो ऽस्य
तस्यार्थो न दृश्यत इति॥ [३४५] क्रियाप्रधानमाख्यातं नाम्नां सत्त्वप्रधानता॥ चत्वारि पदजातानि सत्त्वमेतद्विते [३४६] स्पष्टोऽर्थः [३४६] एतन्मोद्येनिरूपकर्त्तुमाह॥ ॥ वाक्यस रुध्र ३
बुद्धौ नित्यत्वमर्थयोगं च लौकिकं। दृष्ट्वा चतुष्ट्वं नास्तीति वार्त्ताक्षौदुंबरायणौ॥ [३४७] वाक्यस्य खंडस्य बुद्धौ प्रतिपत्तृबुद्धौ नित्यत्वं दृष्ट्वा तथा न स्वे वार्थे न प्रतिभा
प५ लक्षणे न योगं संबंधं दृष्ट्वा यदेतत्पदपरिकल्पनं दार्थपरिकल्पनं च तन्नास्त्येव नैवोपपद्यत इत्याचार्यावाहतुः। अतोऽस्माकमेषा विभीषिका पदार्थानां च
तुष्ट्वं नोपपद्यत इति॥ [३४७] यद्येवं किं शास्त्रेणेत्याह॥ व्याप्तिमांश्च लघुश्चैव व्यवहारः पदाश्रयः। लोके शास्त्रे च कार्यार्थं विभागेनैव कल्पितः॥ [३४८] पदाश्रयो वाक्य
व्यवहारः शास्त्रेऽण्योपदिष्टः स न व्याप्तिमान् सकलसाधुशब्दपरिज्ञानहेतुर्विभागेन परिकल्पित इति किमत्रानुपपन्नं॥ [३४८] अथ यदि पदपदार्थविभागः सर्वथै
वासत्यभूतः तत्कथं लौकिकानां तदाश्रयेण प्रवृत्तिरित्याशंक्याह॥ ॥ न लोके प्रतिपत्तॄणामर्थयोगात्प्रसिद्धयः। तस्माद्लौकिको वाक्यादन्यः कश्चि
न्न विद्यते॥ [३४९] लोके प्रतिपत्तॄणां सर्वथा नस्त्यार्थयोगादेव प्रसिद्धो व्यवहारनिष्पत्तयो यस्मादसत्येनाप्युपायेन मरीचिकास्वपि जलप्रसिद्धिस्तेषां दृश्यते।
अथवा रेखागवयवदसत्येनाप्यनेनोपायेन सत्यभूतवाक्यपरिज्ञानं भवत्येव। सर्वथा न लोकस्यार्थं विना प्रवृत्तिर्दर्शनसंतीति वक्तव्यं। कदाचित्सत्यगवेन हेरबः
य॰

ये२

गवशार्थप्रतीतिरस्तन्न्यतेकदाचिद्देवागवैनेतिबोद्धव्यं।एतएवंतस्माद्वाक्यार्थे[redacted]प्रत्ययोज

वा२ न्यतइतिनकश्चिदलौकिकःसंसभूवःपदार्थःपदैर्विद्यतेउपपत्तिविरहादिति।ज्ञापकगम्यस्यार्थःसर्वत्रवाक्यादेवावगम्यतइत्याह॥ ॥अन्यत्रश्रूयमाणेष्व

लिंगैर्वाक्येषुसूचिताः।स्वार्थएवप्रतीयंतेरूपाभेदादलक्षिताः।अक्ताःशर्कराउपदधातीत्यत्रतेलेनघृतेनवेतिसंदेहेऽत्रतेजोवैघृतमितिघृतस्यस्तुति

रूपक्रांतोऽयंतत्सूच्यतेऽभ्यंजनंघृतेनैवोपदिष्टमिति।अतोत्राक्ताइत्यारोवाक्येघृताक्ताउपदधातीत्यर्थोवगतः।किंज्ञापकानुसारेणेत्याह।रूपाभेदादलक्षि ता: उपदधातीतिवाक्यार्थोज्ञायतइतिविज्ञेयं।यद्याकारस्यस्येवचताक्ता। ४

ताः।अक्ताःशर्कराउपदधातीतिवाक्येरूपमविशिष्टपर्यपतोविशेषमवगंतुमक्षमाइतिलिंगानुसारेणात्रार्थनिर्णयोव्यवस्थाप्यतइतिवाक्येषुवाक्ये

कदेशाःसंतीत्येतदप्रमाणमेवं।अथवाध्यबाधकभावंनिर्णेतुमाह॥ ॥उत्सर्गवाक्येयत्प्रक्रमवादमिवशब्दवत।तद्बाधकेषुवाक्येषुश्रुतमन्यत्रग

म्यते।उत्सर्गवाक्येसामान्यलक्षणेउपक्रमएवयत्प्रक्रमपवादाक्रांतंकिंतत्रशब्देनपरित्यक्तं।नेत्याह।अशब्दमिवेति।बाधकविरहेणेवाकथंस्तःकेशा

व्दवत्बोधकदेवत्यक्तं।धातोःकर्मण्युपपदेऽण्प्रत्ययस्तावदेवबाधकानाक्रांतधातुविषयमेवाणप्रत्ययविधानमितिगम्यतएवं।अन्यथातविशेषेण

प्रवृत्तावुत्तरकालमाकारांतेभ्यःकथंनिवार्यते।अतस्तात्पर्यपर्यालोचनवशाद्बाधकानाक्रांतधातुविषयेऽणप्रत्ययोभवतीतिवाक्यार्थोज्ञायतएवतद्

र्शिना।एतत्रकालएवनावधारितं।उत्तरकालेतुबाधकेषुवाक्येषुतच्छ्रुतंसदन्यत्रसामान्यलक्षणेवर्जितमितिगम्यते।लौकिकेनदृष्टांतेनैतदेवव्याख्या

७० 70 तुमाह॥ ॥ब्राह्मणानां श्रुतिरेद्धि प्रक्रान्ता माठरं विना माठरस्तक्रसंबंधात्तत्राबद्धेय थायेनां दधि ब्राह्मणेभ्यो दीयतामित्यत्र श्रुसामाठरवर्जमेवा न्नब्राह्मणा

नां दधिदानमुपक्रान्तमिति बोद्धव्यं। उत्तरकालं तक्रमागरायेस्तेत तत्र यथार्थबाधकविषयपरिहारेणैवार्थवत्तागमप्रतीत्येवं भिन्नवाक्यतासमाश्रयणेनतोव

[३५२]

दप्राप्त्यनुमानं बाधइति बोद्धव्यं। इदानीमेकवाक्यतामेवाश्रित्योत्सर्गापवादयोर्बाध्य [redacted] कभावं दर्शयितुमाह॥ ॥अ

[३५३]

नेकाख्यातयोगेपिवाक्यं न्याय्यापवादयोः। एकमेवेष्यते कैश्चिद्भिन्नरूपमिवस्थितं। कैश्चिन्न्यायापवादयोरुत्सर्गापवादयोरारव्यातभेदेपि एकवाक्यतैवेष्यते।

कवाक्यतांगप भिन्नवाक्यतेव नकालं प्रतिभाति। वस्तुतस्त्वाकांक्षायोग्यतासंनिधिवशादैतं वाक्यं बोद्धव्यं। एवं सतीदं तत्रबोद्धव्यमित्याह॥ ॥नियमः प्रतिषेधश्च विधिशे

षस्तथासति। इको गुणवृद्धी इत्यादिको नियमः सार्वधातुकार्द्धधातुकयोरित्यस्य गुणविधेः शेषः तेन सहास्यैकवाक्यतायां सार्वधातुकार्द्धधातुकयोः परतो गस्ये

को गुणो भवतीत्येवं वाक्यार्थो ज्ञायते। अन्यथा गस्येगन्तिकोः स्थाने गुणवृद्धीः प्रवर्त्तयोरुत्तरकालं नियमेन किमत्र कृतं। उक्तं च योहि भुक्त्वैवं तृप्यन्मा भुंक्

था इति किं ने नकृतं स्यादिति। तथा प्रतिषेधोपि विधिना सहैकवाक्यतां गतोस्य फलं भजतीत्याह॥ प्रतिषेधश्चेति। प्रतिषेधश्च विधिशेषएवतथासतिबोद्ध

व्य इत्यर्थः॥ अलुगुत्तरपदइत्यनेनोत्तरपदे परतो लुक्प्रतिषेध उच्यमानः सुपोधातुप्रातिपदिकयोरित्यस्य लुग्विधेरंगभावमुपगच्छन्त्वाक्यैकवाक्यतयाथप्र

साधनं करोतीति बोद्धव्यं। एतदेव दर्शयितुमाह॥ ॥द्वितीये योलुगाख्यातस्तत्त्वेषमलुकं विदुः। द्वितीये अध्याये य आख्यातो लुग्विधिः तस्य षाष्ठिकं लुक्प्रतिषे हेरंबः

[३५४]

धं शेषमंगं विदुर्व्याख्यातार इति। अ यथाक्रमेदाह। निराकांक्षाणि निर्दिष्टानि प्रधानानि परस्परं तेषामनुपकारित्वात्कथं स्यादेकवाक्यता। निर्दिष्टो विशेषपरिपूर्णतायां वा
क्यानि निराकांक्षाण्येव अतः परस्परं प्रधानानि तान्यभिधीयन्ते। न तेषामंगांगिभाव इति। अतः परस्परमुपकार्योपकारकभावाभावात्कथं तेषां निष्प्रयोजनापेक्षा परिकल्प्य
तेनैकवाक्यते ति पूर्वः पक्षः। अथैकवाक्यतामाह॥ ॥विशेषविधिनार्थित्वाद्धाकांक्षायोऽनुमीयते। विशेषवन्निवर्त्यार्थं तस्मात्तुल्यत्वापेक्षणं। उत्सर्गवाक्यशेषः सर्वत्रानु
मीयते। कस्मा[redacted]दित्याह। विशेषविधिनेत्यादि। अन्यथा वाक्यान्तरवद्विशेषेण न तस्य प्रवृत्तिः स्यात्। न चैतद्युक्तं। ततश्च निवर्त्यप्रतिषेध्यार्थापेक्षणमुपपद्यत एव तस्मात्
वशेना ५ तयोः परस्परापेक्षणं तुल्यमेवेति कृत्वार्थपर्यालोचनाकांक्षादिना परस्परसंबंधेनांगांगिभावापन्नावेकवाक्यतैवत्यायसीत्युक्तं। उद्धारेण वाक्यैर्वाक्यैकदेशाः संतीति चतु
र्भिः प्रकारैर्निरूपितं। अर्थप्रकरणाभ्यां यथाहवृक्ष इत्यादौ प्रसिद्ध्यर्थं यावर्षतीत्यादौ॥ लिंगाद्यथा अक्ताः शर्करा इत्यादौ। आकांक्षादिना वाक्यान्तरस्य सन्निधानाद्यथा। दधि
ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्यायेत्यादौ यथा च कर्मण्यण् आतोनुपसर्गे क इत्यादौ। इदानीमपोद्धारसमाश्रयणेन प्रसंगात्पदेषु पदैकदेशाः संतीति विचारयितुमाह॥ ॥
संज्ञाशब्देकदेशो यस्तस्य लोपो न विद्यते। विशिष्टरूपा या संज्ञा कृता च न निवर्त्तते। इह देवदत्तादयः संज्ञाशब्दाः स्थिताः तत्र कदाचिद्देवः कदाचिद्दत्त इति प्रयुज्यमाना दृश्यन्ते। तदे
तत्कथमुपपद्यते। यस्मात्तेषु संज्ञाशब्देषु एकदेशास्तेषां लोपस्तावच्छास्त्रे न कुत्रचिदुपदिश्यते। उपदेशोपि तेन कर्तुं न पार्यत इत्याह। विशिष्टरूपेत्यादि। यदा लोके नियतव
र्णानुपूर्वीकः पदसमुदायः संज्ञात्वेन विनियुज्यते। तदा तदन्तर्गता अप्यवयवा विनियुक्ता एव। यथा वृक्षः प्रचलन् सहावयवैः प्रचलतीत्याचार्यानुरोधेन किमसौ न्यूनवर्णो वा

७१ चिका भवति। सा हि नियतानुपूर्वीका परिपूर्णैव वक्तानतिवर्तते॥ ३५८ अपोच्यते। दत्तशब्दादसौ सकला प्रतीता स्वसंज्ञिनं प्रत्याययन्ती साशंक्याह॥ ॥संज्ञांतरं च दत्तादेर्नान्या संज्ञा
प्रतीयते। दत्तशब्दः स्वतंत्रोन्य एव कस्यचित्संज्ञांतरं ॥ तस्मात्कुणयम्यादेवदत्तेति संज्ञा प्रतीयते। शब्दांतरत्वात् कृतसंकेतत्वाच्च स्वाभिप्रायः॥१०॥ नापि तद्वाच्यसंज्ञिनमवगमयितुमलं
दत्तशब्द इत्याह॥ संज्ञिनं देवदत्ताख्यं दत्तशब्दः कथं वदेत्॥ ३५८ दत्तशब्दस्यान्य एव संज्ञी प्रत्याय्यस्तत्कथं शब्दांतराभिधेयमसौ प्रत्याययेत्। तदेवं नियतवर्णानुपूर्वीकाः प्रस्तस्यालो
पस्तावदेकदेशस्य नोपपद्यते। नापि दत्तशब्दाद्देवशब्दाद्वा तदेकदेशभूताद्देवदत्तशब्दप्रतीतिरुपपद्यते न चापि तद्वाच्यप्रतिपत्तिरिति प्रत्येकं चिदेनत। ३५९ अत्र मतांतरं दर्शयितुमाह॥
॥ ॥सर्वैरवयवैस्तुल्यं संबंधं समुदायवत्। केचिदुच्चस्वरूपाणामन्यं तेस्य बेसंज्ञिभिः॥३६०॥ सर्वैरवयवैस्तुल्यमेव समकालमेव संज्ञिनः संबंधः कथं समुदायवत्। यथा समुदायस्तस्य
वाचकत्वेन नियुक्तः तथा तत्काल एव तदवयवा अपीत्यतस्तदेकदेशस्तत्प्रत्यायनं करोतीति को दोषः॥ ३६० अत्र दूषणद्वयं दर्शयितुमाह। वर्णानामर्थवत्त्वं तु संज्ञानां संज्ञिभि
र्भवेत्। संज्ञानां ये वर्णास्तेषां संज्ञिनार्थवत्त्वं प्राप्नोति। तत्र चाभिमतैकदेशवदेकोपि वर्णो वाचकः स्यात्। न चैतत्सरिद्दृष्टं॥१०॥ अपि च तदवयवः एव स वाचको नोपपद्यत इत्याह॥ ॥
संबद्धोवयवः संज्ञाप्रविवेकेन कल्प्यते॥ ३६१ यो सौ भवता वाचकोवयव एकदेशः परिकल्प्यते। स संबद्ध एव वाचकत्वेन वि नियुक्तः। समुदायाच्च तस्य प्रविवेके एव अभावे वाचकत्वं न क
ल्प्यते॥ विलक्षणत्वात्॥ एतदेवापरेण श्लोकेन प्रतिपादयितुमाह॥ सर्वस्वरूपैर्युगपत्संबंधे सति संज्ञिनः। नैकदेशास्वरूपेभ्यस्तत्प्रत्यायनसंभवः॥३६२॥ युगपत्सर्वावयवस्वरूपैः सं
बंधे नैकदेशास्तद्वाचका उपपन्ना॥ अथवा नैकदेशास्तेन भवंतीति प्रतिपादयितुं नैकदेशस्वरूपेभ्य इत्यादि। एकदेशासरूपेभ्य इत्युक्ते एकदेशास्सदृशास्ते दत्तादयः न पुनस्त हेरंब०
माह॥१

देकदेशा इति मतांतरमाह ॥ ॥ एकदेशानुसंघाते केषांचिज्ज्ञायते स्मृतिः । स्मरते त्वविषयाच्छब्दात्संघातार्थः प्रतीयते ॥ स्वरूपेण ॥ ३६३ ॥ एतन्निराकर्तुमाह ॥ एकदेशात्स्मृतिर्भि
न्ने संघाते जायते कथम् । कथं प्रतीयमानः स्याच्छब्दो र्थस्याभिधायकः ॥ सदृशात्वस्तु संदर्शनात्स्मृतिरुपजायत इति प्रसिद्धं । तत्र संघाते भिन्नस्वरूपे कथं तस्मात्स्मृतिः । कथं च तस्मा
त्प्रतीयमानो देवदत्तस्य संज्ञिनो भिधायक [redacted] उपपद्यते । प्रतीयमानस्य वाचकत्वेति प्रसंगः स्यात् । श्रुतिपथमवतीर्णाः शब्दा वाचका इति प्रसिद्धं इदानीं सिद्धांतमा
ह ॥ ॥ एकदेशास्सरूपास्तु नैते लिंगैः समन्विताः । अनुनिष्पादिनः शब्दाः संज्ञा सु समवस्थिताः ॥ यदा तु समुदायः संज्ञात्वेन विनियुज्यते तदैव तदंतर्गताव यवस्सरूपा अ
पि संज्ञात्वेन विनियुज्यंत इति ते ष्वनुनिष्पादिन्यायेन सिद्धाः संज्ञात्वेन बोद्धव्या इति । तदंतर्गतावयवस्सरूपा अनुनिष्पादिन्यायेन विनियुक्ता अपि साधारणत्वात्संज्ञिनमभि
धातुमसमर्थाः । तथा हि देवशब्दो देवानां वाचकः कस्यचित्संज्ञिनो पि । तथा दत्तशब्दः क्रियाशब्दो पि संज्ञाशब्दो पि । तन्न कथं निश्चितस्य संज्ञिन स्तेभ्यः प्रतिपत्तिः स्यादिसाशंक्य
निश्चितार्थत्वमेषामसमर्थयितुमाह ॥ साधारणत्वात्तेदिग्धाः सामर्थ्यात्तिश्चिताश्रयाः । नैषां ये साधव [redacted] स्तेनुशास्त्रे लोपादिशिष्यते ॥ सा दृश्यासंदेहेपि सामर्थ्यादिभिर्निश्चिताश्रयाः +३६६+४
संज्ञ्यभिधायकाव्यवस्थाप्यंते । तेषामनुनिष्पादिनामेव शास्त्रे लोपादिविधिप्रणालिकया साधुत्वमुच्यत इत्याह । तेषामित्यादि । तेन देवदत्तेस्य नेनः क्रियावाचकदत्तस्य साधार श ३
णो दत्तः संज्ञाशब्दः देवो पि संज्ञाशब्दो नुनिष्पादित्वान्न तदंतर्गता अपीति बोद्धव्यं । एतदेव शास्त्रे लोपादि द्वारेणान्वाख्यायते । प्रयोक्ता । चतुर्थ्यादिन्जादेश च लोपः पूर्वपदस्य चेत्या
दि । एतत्स्फुटीकरणायाह ॥ ॥ तुल्यायामनुनिष्पत्तौ ये प्रयोगा इत्य साधवः । नत्वान्वाख्यायके शास्त्रे ते शुद्धादिवत्स्मृतिः ॥ समुदायेष्य पदान्यनुनिष्पादिन्यायेन तत्रवि

७२ नियुज्यंते तेनैव मत्रसमानायामप्यनुनिष्पन्नो वर्णानां वर्णविनियुज्यंते । अत एव जैतादिषु न सादृश्यो वर्णमात्रा इह व्यवहारे साधवोऽभ्यनुज्ञायंत इति शास्त्रेप्यन्वाख्यायके न
72 शु२ तथाभूतानामनुगमः क्रियत इति बोद्धव्यं । अतो नैते घादयो वर्णम घादिवाच्ये शब्दार्थे वाचका इति । अथ पदेषु पदैकदेशाः संतीति विचारप्रस्तावे संज्ञाशब्दानां शब्दार्थसंबंध
स्यानित्यत्वमाशंक्य समर्थयितुमाह ॥ ॥कृतणत्वाः श्रूयंते यानि संस्करणादयः । एकदेशोपदेशिनाज्ञा साधून्संप्रचक्षते ॥ इह संज्ञाशब्दानां संज्ञिसंबंधस्यानित्यत्वलक्षण
योग उत्तरकालं यदा प्राकृतदासो न कस्यचित्संज्ञेतित नित्यसंबंधं न कार्यं कथं स्यात् ॥ अत्रोच्यते । अत्र संज्ञासंज्ञिसंबंधानित्यत्वे तत्र लक्षणमिति । अथोत्तरकालेन
तं तदा वा कृतणत्वो सौ ज्ञायः संप्रति णत्वं भजतः इत्यनित्यत्वं शब्दानां स्यादित्याशंक्याह । कृतणत्वा इत्यादि । इह हि रोहणादी । कृतणत्वानामेको राशिर्नित्य एव अकृत
णत्वानामपर इति । तत्र ये कृतणत्वास्ते साधवो नित्या एव । एकदेशोपदेशिना त्वभावे नैव ते संज्ञाशब्दाः रूप्यंते । शास्त्रे पूर्वपदात्संज्ञायामग इत्यनेन कृतणत्वानामे
व तेषां साधुत्वमन्वाख्यायत इति । कृतणत्वं तु शास्त्रे प्रक्रियामुखसमाश्रयणेनैषामुक्तमिति न कश्चिद्विरोधः । एतदेव प्रतिपादयितुमाह ॥ ॥ गोत्राणि वनुतास्मादुः संज्ञा
शक्तिसमन्वयात् । निमित्तापेक्षणं तेषु स्वार्थे नावरुप्यमिष्यते । संज्ञाशब्दकुलानि व्यवस्थितानि न तेषु स्वार्थे संज्ञिनि निमित्तान्वेषणमिष्यते नित्यत्वात् शब्दार्थसंबंधस्य
व्य२ तद्वाचकास्ते स्ववाच्ये नियता इति स्वरूपव्यतिरेकेण निमित्तांतरान्वेषणमव्यापकमेव । तं तु च नित्यत्वे संज्ञाशब्दानामनुपपन्नं संप्रतिक्रियमाणत्वात् यस्मात्सुरु
वेद्मसादयः यथाकथंचिन्नियुज्यसंज्ञाक्रियंते । उक्तं च । कृतकत्वादनित्यत्वं संबंधस्योपजायते । संज्ञाशास्त्रः साहि पुरुषैर्यथाकामं नियुज्यते । यथा हि पांसुरेखाणां बाल हेरव०

केयं धुराः स्पृः संज्ञाः क्रियन्ते संज्ञासु सर्वासु विशेषेषु कल्पने सामर्थ्यं कस्य समर्थयितुमाह॥ ॥व्यवहारार्थं नियमः संज्ञानां संज्ञिनि क्वचित्। नित्य एव तु संबन्धो डित्थादिषु गवादि-
३७१ वत्॥ संज्ञाशब्दानां क्वचित्संज्ञिनि यदिपरं व्यवहारार्थं पुरुषेण नियममात्रं क्रियते। यथास्मिन्नरहे ऽप्यप्रभृति डित्थशब्द [redacted] वाच्यो ऽयमि-
ति बोद्धव्यं। शब्दार्थसंबन्धस्तु डित्थादिष्वनादियोग्यतालक्षणो नित्य एव। यदुक्तं। इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा। अनादिरर्थैः शब्दानां संबन्धो योग्यता तथे-
ति। तदेवं यथा गवादिष्वनादियोग्यतासंबन्धाद्वाचकत्वं गोशब्दानां तथैव डित्थादीनां बोद्धव्यं। शास्त्रेऽपि तथैव व्यवहारनियमः संज्ञाशब्दानामवसातव्य इत्याह॥ ॥वृद्ध्या-
दीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः। अकृत्रिमोऽभिसंबन्धो विशेषणविशेष्यवत्॥ शास्त्रे वृद्ध्यादीनां संज्ञाशब्दानां सर्वार्थप्रकाशनशक्तियोगः संज्ञिनामादैजादीनां
च सर्वशब्दवाच्यता। (योग्यता॥) अतः केवलं शास्त्रे संज्ञानराद्यवच्छिद्य ऐजादिप्रत्यायने वृद्धशक्तिर्वृद्ध्यादीनां नियम्यते। आदैजादीनां वृद्ध्यादिशब्दवाच्यत्वमेव व्यवस्थाप्यत इति॥
सहजशक्तिप्रतिनियम एव वाच्यवाचकयोरुच्यते न पुनः कृत्रिमसंबन्धाधानं विज्ञेयं। यथा विशेषणविशेष्ययोरनादिः शब्दवाच्यतात्मक एव संबन्धो [redacted]
न पुनस्तत्र पुरुषेण नीलत्वादियोगः क्रियत इति। अथ संज्ञाप्रवृत्तिनिमित्तं विचारयितुमाह॥ ॥संज्ञास्वरूपमाश्रित्य निमित्ते सति लौकिकी। कासुचित्प्रवृत्ते नैकाचिन्निमित्ता
संनिधावपि॥ सर्वसंज्ञाशब्दानां स्वरूपमेव प्रवृत्तिनिमित्तं बोद्धव्यं। तस्मिन्सति कुत्रचिदर्थानुगतं निमित्तं [redacted] विद्यते। कुत्रचित्तदभाव एव डित्था-
दाविति केचित् तत्राप्युच्यत एव। न केवलं तत्रैकाक्षराणां स्वरूपमेव प्रवृत्तिनिमित्तं विद्यते यावन्महतीनामपि स्वरूपमेवोपनिबन्धनं प्रवृत्तिनिमित्तं बोद्धव्यमित्याह॥ ॥

७३ 73 ग्राह्यत्वेनुमहतीसंज्ञास्वरूपोपनिबंधना । अनुमानं निमित्तस्य संनिधाने प्रतीयते [३७४] ॥ केवलं तत्र निमित्तस्यावयवार्थस्य संनिधाने स्यानुमानं तत्स्य द्वावेव प्रतीयते अनुमाने नावयवा
र्थोपि तत्र निमित्तमिति प्रतीयत इत्यर्थः । कथं तदनुमानमित्याह ॥ ॥ अर्थैते [redacted] रनुमानं वा सारूप्यात्तत्र गम्यते । आवृत्तिभेदादनुमानं वा आवृत्तिभेदस्य वा गतिः [३७५] ॥ स एक एव हि द्विरावर्त्ते
विरूपि २ ते । तत एकेन स्वरूपेण संज्ञिनः प्रतिपत्तिरपरेणावयवार्थनिबंधनता व्यवस्थाप्यते । न त्वावृत्तिरनुमीयते । किं यदि हि तत्र तत्त्वाभीक्ष्ण्यात् द्विधोच्चारणादि स्यादित्याह । सारूप्यादि
ति ॥ सारूप्यादेक एवोच्चारितः शब्द इति गम्यते । अथवा तंत्रेण द्वावेव शब्दावनुच्चारितावित्यनुमीयत इत्याह ॥ आवृत्तिभेदादनुमानं वेति । तत एकेन स्वरूपाच्छादितसंज्ञिनः प्रति
पत्तिपरेणावयवार्थनिबंधनेति तृतीयमपि पक्षं प्रदर्शयितुमाह ॥ आवृत्तिभेदस्य वा गतिरिति । [redacted]
। स एवैको द्विरावृत्तिरुच्चारितस्तत एकया संज्ञिप्रतिपत्तिरपरयावयवार्थसंगतिरिति [३७५] ॥ इदानीं लौकिकस्याकृत्रिमस्य क्वचिद्ग्रहणं क्वचित्कृत्रिमस्य पारिभाषिक
कृत्रिमा २ स्य क्वचिदुभयगतिरिह शास्त्रे संभवतीत्युभयोरपि कृत्रिमयोः क्वचित्कृत्रिम एवाप्तेः परिग्रहीतरस्यापि विषयं व्याप्नोतीति चानुविधेयं संज्ञाशब्दानां प्रदर्शयितुमा
ह ॥ ॥ क्वचिद्विषयभेदेन कृत्रिमा व्यवतिष्ठते । कृत्रिमा शास्त्रीया पारिभाषिकी उच्यते । सा विषयभेदेन व्यवतिष्ठते । न तु सर्वत्र तथैव व्यवस्थापयितुं याकर्तरि कर्मव्यतिहार इत्यस्या
कृत्रिमायाः ग्रहणे । व्यतिहारस्यात्र कृत्रिमसंज्ञाश्रयणानुपपत्तेः । कर्मशब्दोपि स त्वकृत्रिमा । शास्त्रे वैदेशाद्वा कृत्रिमाधात्वधिकारात्कृत्रिमाया अत्रानुपपत्तेः । कर्तृकरणयो हेरंब

३७८

स्तंतोऽप्येस्य त्र कृतिमेति ॥१०॥ क्वचिदेकत्रोभयरूपताया ग्रहणमिति दर्शयितुमाह ॥ ॥संख्यासामेकविषयं व्यवस्थानं द्वयोरपि । संख्याविषये ऽत्र स्त्रे कृत्रिमाकृत्रिमयोरपि समाख्य

प्रपंशास्त्रीयाकवद्गुणवत्तुडती सादिकाऽपि कृत्रिमाया लौकिका अथ कृत्रिमाया विंशत्यादिका अतिशदन्ताऽऽइति प्रतिषेधाद[redacted]न्ज्ञापकाद्ग्रहणं क्वचिदकृ ॥३७६॥ २

त्रिमः संज्ञाशब्दो गृह्यते । तः कृत्रिमस्यापि प्रसाशनं करोतीति प्रदर्शयितुमाह ॥ ॥विषयं कृत्रिमस्यापि लौकिकः क्वचिदुच्चरन् । व्याप्नोति दूरात्संबुद्धेस्तथा हि ग्रहणं तयोः ॥३७७

लौकिकोऽकृत्रिमः संज्ञाशब्दः समुच्चरन् कृत्रिमस्यापि [redacted] शास्त्रीयस्यापि विषयं व्याप्नोति । यथैकश्रुति दूरात्संबुद्धौ इत्यत्र संबोधनं सं

बुद्धिरिति लौकिकेन शास्त्रीयमप्येकवचनं संबुद्धिरिति गृह्यत एव । न तत्रापि संबोधनस्य विद्यमानत्वादित्यर्थः ॥ अथेदानीं वाक्यविचारप्रस्तावे क्वचित्स्यैकं वाक्यपरिसमा

३७८

संघैकदेशसंघेषु ६ प्तिः क्वचित्समुदाय इति प्रदर्शयितु[redacted]माह ॥ ॥संघैकशेषद्वन्द्वेषु केचित्सामर्थ्यलक्षणं । प्रसाध्यं समवस्थानं क्रियाणां प्रतिजानते । वाक्यवद्वाक्यार्थस्यापि प्रत्येकस परिसमाप्तिरिति दर्शयति ६

मुदाये परिसमाप्तिं वाक्यपरिसमाप्तिं प्रसंगान्मतभेदेन निरूपयति । तत्र वाक्यार्थस्य प्रत्येकपरिसमाप्तिरिति तावद्दर्शयति ॥ संघैकशेषद्वन्द्वेष्वित्यादिना । कदाचित्संघे देशेष्वित्यादि ४

नैकशेषेण द्वन्द्वेन वार्थप्रतिपादनं क्रियते । यथा ब्राह्मणा भोज्यन्तां ब्राह्मणौ भोज्यन्तां देवदत्तयज्ञदत्तविष्णुमित्रा भोज्यन्तां ॥ अत्र ब्राह्मणकर्तृकायाः भुजिक्रियायाः

वाक्यार्थभूतायाः प्रसाध्यसमवस्थानं प्रतिजानते ऽभ्युपगच्छन्ति । कीदृशं सामर्थ्यलक्षणमिति ॥ सामर्थ्यं समर्थभावात्मकं अग्रे निरूप्यमाणं लक्षणं स्वरूपं यस्य

तत्तथाविधं सामर्थ्यलक्षणत्वादित्यर्थः ॥ ३७९ अथ भुजिक्रियाकारकसमुदाय एव नान्वेति यावत् किन्न समाप्यत इत्याह ॥ भोजनं फलरूपाभ्यामेकैकस्मिन्समाप्यते ।

घ

७४ अन्यथा हि व्यवस्थानेनानर्थः प्रकल्प्यते। [३७९] इहैकेन पादप्रक्षालनमपरेणासनोपवेशनमपरेणान्नदानमन्येनानिगरणमिति नैवं भुजि क्रियानिर्वर्तयितुमा
शाति। यस्मादसौ भुजिक्रियाफलेन तृप्तिलक्षणेन रूपेणान्नादानादिनां चैकाधिकरणेनानिर्वर्त्यते। न यथा नाश्रयेण न भुज्यर्थो निष्पद्यते। भिन्नाधिकरणा सा
स्वरूपं न भजति भजतरति प्रत्यक्षसिद्धमेवार्थं न देवस्फुटयितुमाह॥ ॥अन्नादानादिरूपं च सर्वैर्न तृप्तिफलां भुजिं प्रत्येकं भजति पद्यं तेन तु नाद्यक्रियामिवा [३८०] विनियत
स्वरूपा हि वस्तुगते योऽहर्यन्ते। नाद्यक्रियानेकसाधनसाध्या सती फलवत्सु प्रजायते। भुजिक्रियात्वेकैककारकनिर्वर्त्येति वस्तुगतिः। एतदेव दृष्टान्तान्तरेण व्याच
ष्टे। पाद्यवत्सा विभागेन सामर्थ्यादवतिष्ठते। भुजिः करोति भुज्यर्थं नातं च येन प्रदीपवत्। [३८१] श्राद्धकर्मणि ब्राह्मणो भुक्त्वा यथा पाद्यमनेकाधिकरणं कृतं तन्न दम्पत्योर्ना
योपकल्प्यते। तथैवेयं भुजिक्रियासामर्थ्याद्दुत्तस्वाभाव्याद्विभागेनावतिष्ठत इति। न तु तं चेन साधारणापि नासौ प्रदीपवदेकाधिकरणो वभुज्यर्थं तृप्तिलक्षणं
करोति। [३८२] अथ भुजिक्रियैकापि तथाभूते भुक्तमस्तु। आहृत्यंतरेणापि समुदायाश्रयाभवेत्। देवदत्तयज्ञदत्तविष्णुमित्राद्युपना मित्यत्र द्विक्रियातथाभूते
पं॰ ३ भुज्यो गय देवाश्रितेभुक्तमस्तु विषये प्रत्येकं समाप्तिं विना भुजिर्वक्तो पपद्यत इति नोच्यते। युगपद्देवाद्ध्वदर्शनक्रियाधिगमफला समुदायसमाप्तोती यसौ समुदाया
श्रयाभवेत्। [३८३] अथ पश्चाद्विक्रियाः किं समुदायपरिसमाप्ता किं वा प्रत्येकं समाप्ते त्याशंक्याह॥ ॥भिन्नव्यापाररूपाणां व्यवहारादिदर्शने। कर्तॄणां दर्शनं भि
न्नं संभूयार्थस्य साधकं॥ देवदत्तः काष्ठैः स्थाल्यामोदनं पचतीति विक्लिद्यमानतण्डुलानां विक्लेदयतीत्यत्र भिन्नव्यापाररूपाणां कारकाणां दर्शनं भिन्नं दर्शनं प्रा हेरं बः

क्रियावदन्यासामपि क्रियाणां तरसमाश्रयणेन समुदायपरिसमाप्तिमुपदर्शयितुमाह॥ ॥दृश्यादिसु ४

घेनादिको व्यापारो भिन्नः स संभूय संघातरूपस्य पाकक्रियालक्षणस्य साधको दृश्यते व्यवहारादिदर्शने इति। व्यवहारः कश्चिन्नियतविषय एवो द्योगोऽत्राभि-
प्रेतः। आदिग्रहणेन तदन्येषां परिग्रहः तेषां दर्शनं समारंभः प्रारंभ इति यावत् तस्मिन्सतीत्यर्थः। एतदुक्तं भवति। कर्तृस्था वा क्रिया भवति कर्मस्था वेत्यत्र प्रति-
दृत ८ वृत क्रिया कर्मणि समवेतानां समुदाय इति केचित्। अन्ये त्वाहुः। यद्यपि कर्मणि समवेता तथाप्यधिश्रयणोपसर्जनविक्लित्तिरूपपचेरर्थे स्वावांतरक्रियान्यभावे प्र-
धानक्रियासमाश्रयणेन व्यापारव्यापारस्याविशेषात्संभूय सर्वैर्निर्वर्त्यत इति समुदाय एव समाप्यत इति।[३८३] अथ शास्त्रे प्रत्येकं वाक्यपरिसमाप्तिमुपदर्शयितुमा-
ह॥ ॥लक्ष्यस्य लोकसिद्धत्वाच्छास्त्रे लिंगस्य दर्शनात्। अर्थित्वादेस्तु भेदेन वृद्धिसंज्ञा समाप्यते॥[३८४] वृद्धिरादैजित्यत्र वृद्धिशब्दः प्रत्येकमादैच्स्वर्थिषु संज्ञात्वेन
नियुज्यते। यस्माल्लोके नथैव लक्ष्यं सिध्यति। आश्वगुप्तायनिः ऐतिकायनिः। औपगव इति। तथा शास्त्रे प्रत्येकमादैचां वृद्धिसंज्ञा ... दृश्यते। यथा प्रस्थे वृद्धम लिङ्गाद्द्६
कर्क्यादीनां मालादीनां च वृद्धिर्यस्याचामादिस्तद्वृद्धं। प्रस्थे वृद्धमकर्क्यादीनामित्यत्र प्रस्थे उत्तरपदे पूर्वपदमवृद्धमाद्युदात्तं भवतीति। तदनंतरं मालादीनामादि-
रुदात्तो भवतीत्युक्तं। यदि चैकैकस्य वृद्धिसंज्ञा। तदा मालादीनां वृद्धिर्यस्याचामादिस्तद्वृद्धमिति मालादयो वृद्धा भवंति।[३८४] इदानीं क्वचित्समुदाये वाक्यपरि-
समाप्तिरिति प्रदर्शयितुमाह॥ ॥उत्पादाने प्रधानत्वात्कृदंते गतकर्मके। अर्थिनां गुणभेदेऽपि संख्यायोऽर्थो न भिद्यते॥[३८५] गर्गाः शतं दंड्यंतामित्यत्र शतकर्म-
के दंडने समुदाये परिसमाप्यते। अर्थिनश्च राजानो हिरण्येन भवंति न च प्रत्येकं दंडयंति। यस्माद्वाक्यार्थेन राजानो विवेचयंति। यथात्र दंडेः कर्मणि प्रधानमप्र-

७५ 75 धानं चेति तत्र ज्ञातकर्मकेदंडेनेश्वातादानमेवप्रधानं यदि च प्रत्येकं शार्तिदानं समाप्येत तदा गर्गाः शतानि दंड्याः स्युः। ततः श्व प्रधानकर्मणः स्वरूपमेवश्रो
भवेत्॥ न च प्रधानार्थपरित्यागो युक्तः। अतः संख्यानरा श्वरणो विरोधो वा कास्त्यात्॥ वीप्सायां वा धप्राप्तेः। अत्र गुणभेदे पि दंड्यभेदेप्यप्रधानत्वात्तेषां नात्र प्र
त्येकं अपितु अर्थिनो राज्ञां शतकर्मकं [redacted] दंडनं समुदाय एव भवति एतत् इति बोद्धव्यं। एतदुक्तं भवति। प्रत्येकं वाक्यपरिसमाप्तिः समुदाये वा वाक्यपरिसमाप्ति [redacted] रित्येतन्नराजाज्ञावशाद्व्यवस्थाप्यते। अपि तु यथा तथा भावादितिन्याय सिद्धमेवैतदेदिति व्यं। ३८५ शास्त्रे प्रदर्शयितुमिदानीमाह॥ संघस्यैव विधेयत्वात् का
र्यवत्प्रतिपादने। तत्र तंत्रेण संबंधः समासाभ्यस्तसंज्ञयोः ३८६ समाससंज्ञाभ्यस्तसंज्ञा च समुदाय एव परिसमाप्यते। सह सुपा उभे अभ्यस्तमिति च। अत्र समाससंज्ञाया
अभ्यस्तसंज्ञाया श्व तंत्रेण साधारणेन समुदायस्यैव संबंधः कस्मादित्याह। संघस्यैव विधेयत्वादिति। यस्मादत्र संघ एव विधीयते पूर्वपदोत्तरपदे हि समाससंज्ञा
विधीयेते। तथाभ्यस्तमित्यत्र युगपद्वे अभ्यस्तसंज्ञाविधीयेते। किं वित्कार्यविधानुमिति। ननु समाससंज्ञायां कथं राजपुरुष इत्यादौ समुदायो विधीयते। यावतां
नि सत्वाच्छब्दार्थसंबंधानां विधेयतानुपपत्तिरित्याशंक्याह। कार्यवत्प्रतिपादन इति। यदा कार्यवदन्वाख्यानमिति पक्षः प्रतिपाद्यते नैतदुक्तमित्यर्थः ३८८ इदानीं
क्वचिदेकत्रैवोभयथापि वाक्यपरिसमाप्तिर्दृश्यत इति प्रतिपादयितुमाह॥ ॥लक्षणार्थोत्कनिर्येषां कांचिदेव क्रियां प्रति। तेष्वस्तेस्वसमस्तेस्वसधर्मेत्युपल
भ्यते॥ ३८७ उदाहरणमाह॥ हषलैनेप्रवेष्टव्यमित्येतस्मिन्नहेश्या। प्रत्येकं संहतानां च प्रवेशः प्रतिषिध्यते॥ अत्र वृषलजातीयस्य प्रवेशनिषेधः क्रियते तत्र [redacted] हेरंवः

चैकस्यापि द्रव्यत्वं दृष्ट्वा सामर्थ्यात्समुदाये च प्रवेशनिषेधः संपद्यत इति प्रकारान्तरेणोपपादयितुमाह ॥ तं प्रत्यक्षलिङ्गादिप्रतिषेधोपपादने। एष
गप्रतिषिद्धत्वात्सह्यते न विरुध्यते। भवद्भिः समग्रैरेवाश्वमेधिराजोपसेवा न कार्येति समुदायमनन्तरविधेयं कृषिकर्मेवानानुष्ठेयमिति यत्र समुदाये प्रत्येकं वा निषे
धे वाक्यस्य भेदवृत्त्यनुपपत्तिः अत्रापि शास्त्रीयमुदाहरणं दर्शयितुमाह ॥ ॥ अथवा सलक्षणार्थत्वाद्दृष्ट्कुप्राडादिभिस्तथा। प्रत्येकं वा समस्तैर्वा णत्वेन प्रतिषि
ध्यते॥ अथवा योग्यवधानं। तदुपलक्षणार्थत्वाद्दृष्ट्कुप्राडादिभिरिति प्रत्येकं समुदायेऽपि तेषां स्थितेर्व्यवायस्यासिद्धत्वान्नैवेणत्वं प्रवर्त्ततेति न कश्चिद्दोषः। इदानीं भु
जिक्रियाया एकत्वानेकत्वविचारः तत्रापि किमेकस्मिन्देशकालेऽपात्रेऽनुष्ठिता स्वरूपमासादयति उत देशादिभेदेनानुष्ठितेति विचारयितुमाह॥ ॥अनु
+३९१+६ ग्रहार्थभोक्तॄणां भुजिरारभ्यते यदा। देशकालाद्यभेदेन नानुगच्छति तानसौ॥ देशकालाद्यभेदेनेति नात्र भुजेरनुग्रहार्थायाविशेषः कश्चित्तु उभयथापि तद
नुग्रहस्य निर्वृत्तेरिति॥ अथास्या एकत्वानेकत्वविचारमाह॥ ॥पात्रादिभेदान्नानात्वं यस्यैकस्यापरिकल्पते। विपर्ययेण वा भिन्नस्तत्र सैकत्वं प्रकल्प्यते ॥
यस्य मते एकैव भुजिः तल्लक्षणसमानफलत्वात्तस्य देशकालभेदान्नानात्वं स्वतस्त्वेकत्वमेवाकस्यचिन्मते तु भोक्तृभेदात्फलभेदे भुजिक्रियाभेदे एवं तस्य
विपर्यये पात्राद्यभेदादेकत्वं तस्या बोद्धव्यं। स्वभावतस्तु भिन्नत्वमेवेति मतभेदः॥ किंच संहत्यापि च कुर्वाणाभेदेन प्रतिपादिताः। स्वस्वंभोऽसंविभागेन प्राप्तं संभ
स्य भुञ्जते॥ देवदत्तयज्ञदत्तविष्णुमित्राभोऽसंतामि तत्र सामर्थ्याद्दृद्धेन वाक्यार्थे प्रतिपन्ना विच्छावशात्संभूय स्वस्वभोऽसंविभागेन प्राप्तं संभूय भुञ्जते॥ अथ शतादी

76

७६ 76 न प्रधानत्वादित्येतत्प्रतिपाद्यस्यार्थस्योपपत्तिं प्रतिपादयितुमाह॥ ॥वीप्सायाविषयाभावात् विरोधादन्यसंख्यायां द्विधासमाप्तिप्रयोगाच्चयातं संघे वर्तिष्यते। ३९४ यद्येके
कं यातं यातं दण्डेन तत्तदा वीप्साविषयोऽपहृतः स्यात्। तथाद्य न कर्मकमत्र दण्डनं प्राधान्येन विधीयते। यदि तु प्रत्येकं यातं दण्डनं प्राधान्येन विधीयते। प्रत्येकं यातं दण्डने सं
रव्या ३ ख्यान्तरोपजननाच्छ्रुतसंख्या विरुध्यते। न चाप्यत्र द्विधा वाक्यं समाप्यते। यत एकेन प्रधानकर्मणः संबन्धोऽपरेण गुणकर्मणामिति वाक्यार्थे द्वैः पर्यालोच्य संघए
वाक्य ४ वशातादानमवतिष्ठत इत्युच्यते। ३९४ अथ भुजिक्रियायाः प्रत्येकं परिसमाप्तावपि पुत्र देवदत्त यज्ञदत्त विष्णुमित्रैः सहभोक्तव्यमित्युच्यते तत्र द्विधापि प्रत्येकं समुदाये च वा
क्यं वाक्यार्थश्च परिसमाप्यत इत्याह॥ ॥भुजिर्द्वैकशेषाभ्यां [redacted] यत्रान्यैः सह हि उच्यते। न ...पि लक्षणार्थत्वात् द्विधा वाक्यं समाप्यते। ३९५ लक्षणार्थत्वादिति
यस्माद् त्र सहभोजनं सहैव वा तत्प्रतिषेध इत्येव तावल्लक्ष्यते। तत्र बहुभिः सह भोक्तव्यं द्वाभ्यां त्रिभिर्वा न वेत्येतदत्राभिधीयते। एवं च सहैव भोक्तव्यं न वेति समुदाय एव
विधिर्वा प्रतिषेधो वा विधीयते केवलं सहभोजनविधिस्तत्प्रतिषेधो वाभीष्ट इति प्रत्येकं समुदाये च वाक्यार्थोऽत्र समाप्यत इति बोद्धव्यं। एवं वाक्यार्थस्य ग्रहणेन प्र
त्येकं वाक्यपरिसमाप्तिः समुदाये च वाक्यपरिसमाप्तिरिति प्रदर्शितं। इदानीं वाक्यसमाप्त्यग्रहणे न प्रतिपादयितुमाह॥ ॥वाक्यान्तराणां प्रत्येकं समाप्तिः क्वचि
दिष्यते। सूत्रान्तरेणायुक्तानां वाक्यानां तेन संग्रहः॥३९६॥ इहैकं यद्वाक्यं श्रुतं तेन वाक्यान्तराणां वाक्यरूपाणां ग्रहो लक्षणं प्रत्याय्यनमिष्यते। तानि वाचकानि तस्मा
न्महावाक्यं प्रत्येकं समाप्यते। ततश्च तथैवार्थविगतिरिति। अथवा वाक्यान्तराणां किमेकमेवतन्महावाक्यमभिधायकमुच्यत इत्याशंक्याह॥ ॥नवाक्य हेरंबः
३९६

सं २

श्रो ढवादि २

निका
स्याभिधेयाभिमेदवाक्यानिश्चितं। तस्मिंस्तूच्चरिते भेदांस्तथान्याः प्रतिपद्यते॥ ३९६ तस्मादुच्चरितादर्थं प्रतिपत्ता वर्ण्यपर्यालोचनावशेनावान्तरवाक्यप्रतिपत्तिः संपद्यत इत्युच्यते न पु
नस्तेन तत्तान्यभिधीयन्त इति। ३९७ अत्राखण्ड वाक्यवादिनं तयापरवादिमतं निराकर्तुमाह॥ ॥येषां समस्तो वाक्यार्थः प्रतिभेदं समाप्यते। तेषां तदानीं भिन्नस्य किं पदार्थस्य सङ्गतः॥ ३९८
प्रत्येकमखण्डस्यैव वाक्यार्थस्य परिसमाप्तेः पदार्थो नामनुपयोगात् सदार्थकल्पना ३९८ थैवं वाक्यवादाविकल्पयितुमाह॥ ॥अथ तैरेव जनितः सोऽर्थो भिन्नेषु वर्तते। पूर्वस्मा
र्थस्मात्तेन तस्माद्विरोधः सहवास्थितिः॥ अथो चायं तैः पदार्थैरेव वाक्यार्थो जनितो भिन्नेषु वर्तते। पूर्वस्मात्तेन सह विरोधः सहानवस्थानलक्षणो वा स्यात्। अथवा सहावस्थितिरिति
द्वयी गतिः। तत्र सहस्थितौ चो द्यमाह॥ ॥सहस्थितौ विरोधित्वं स्याद्भिन्नाच्च विस्थितः पयोः। भेदसंसर्गौ विरुद्धौ वक्तानुष्टेया नाभिस्य र्थः॥४०॥ अथ पदार्थवाक्यार्थयो
रत्र सहानवस्थाने सत्पूर्वः पदार्थो वाक्यार्थो वाक्यार्थेन त्वसमासे विनिवर्त्तते तदा यं दोषमाह॥ ॥व्यभिचारी तु सम्बन्धस्त्यागे पूर्वस्य प्रसज्यते। ४०० वाक्यार्थफलानां
पदानामुपात्तार्थपरित्यागे शब्दार्थसम्बन्धो व्यभिचारी नित्यः प्राप्नोति॥ अतः प्रत्येकं वाक्यपरिसमाप्तिपक्षे न सम्भवतः पदार्थो सम्भव एव॥ ४०० अथ समुदाये वाक्यपरिस
माप्तिपक्षे किं समुदायार्थेन संघ एवार्थवान्नावयवाः। आहोस्वित्तदवयवा अपीति विचारयितुमाह॥ ॥एकः साधारणो वाच्यः प्रतिशब्दमवस्थितः। संघे संघि
षु चार्थो तात्संनिधाननिदर्शकैः ४०२ सोऽर्थस्तावाच्यः ससम्भूतो वाक्यार्थलक्षण एकोऽखण्डः प्रतिशब्दमवस्थितो बोद्धव्यः। यतो सौ साधारणः सर्वेषां वाच्यमतः स्थितः। अथ
तेष्ववस्थितो सोनेसाहसंघिषु चेति। साधारणता समुदायेषु चार्थे तत्तदवयवे ष्वपीति यदि प्रतिशब्दमवस्थितः तत एकपदोपलम्भकाले कि मिससौ नावगम्यत इत्या
ने

२१

७७

77

हं तं निधानं निदर्शकं इति। इतरः परसंनिधानं निदर्शकं प्रस्तावस्मीतयाभनैः यथोक्तं पुरस्तात्। प्रत्येकं तु समाप्तो र्थः सह भवेत्तेषु वर्तते इति। अतः सकलपदोपलम्भ
काले प्रतीयत इति न कश्चिद्दोषः [40] ॥ एतं दृष्टान्तद्वारेण व्यक्तीकर्तुमाह ॥ ॥ यथा साधारणे स्वत्वं सामग्र्यसर्वफलं धने ॥ प्रीतिस्तथा विकल्पात् तद्वाक्यार्थे वर्णनत्वं ॥ ४०२॥
धने बहूनां साधारणे स्वत्वं। स्वस्वामिभाव आत्मीयत्वं सामग्र्ये सर्वेषां सामग्र्यसर्वदानलक्षणं फलं तदपि सर्वेषां अस्माकं बहुधनमस्तीति चेतसः प्रीतिर्निवृत्तिल
क्षणा सा प्रत्येकं विकल्पात्साधारणत्वादेव सर्वेषां भवति। तद्वत्तेनार्थे न समं हत्वा तद्वर्णानां संघसंधिना संबन्धो बोद्धव्यः [402] ॥ इदानीमेतत्प्रसंगे नसंघातसे काप्यन्तुव
भावो वर्णादिष्वेत द्व्याख्यातुमाह ॥ ॥ वर्णानामर्थवत्तायां नैकेनार्थेन गम्यते। समुदायेन चैकत्वं भेदेन व्यवतिष्ठते [403] ॥ यदा वर्णा अप्यर्थवन्तः समुदायोऽप्यर्थवत्ता
तत्राह तदार्थवत्त्वस्य साधारणत्वेनैवैकत्वात्समुदायादेवैकत्वप्रतिपादनार्थे कथं चैकत्वानुषङ्गः न प्रत्येकं वर्णेभ्य इति [403] ॥ एतदेव दृष्टान्तप्रदर्शनपूर्वकं प्रदर्शयितुमाह ॥
एकेनैव प्रदीपेन सर्वे साधारणं धनं। पश्यन्ति तद्वदेकेन समुपासंख्याभिधीयते ॥ संनमसे साधारणधनस्वरूपपरिज्ञानं प्रत्येकेनैव प्रदीपेन संपद्यते। तद्वदत्रापि +४०४+४
साधारणार्थवत्ताभिव्यक्त्यै एकेनैव समुदायादुत्पन्नेन समुपाएकवल्लक्षणा सा व्याप्तमुदायाय गताभिधीयत इति न पृथक् पृथगनुभवतिः ॥ एते एव साधा +४०४+३
रणी यासावर्थवत्ता एकेनैव समुपाभिहिता तस्मात्सौ वर्णपदयोरपि वाक्ये च भवंतीति निर्विशिष्यते न पृथगभिधानमुपयुक्तम् इति बोद्धव्यमित्यभिधातुमाह ॥ ॥ हेरब०
नार्थवत्ता पदे वर्णे वाक्ये चैवं विशिष्यते। अनुपूर्व्यवाक्ये सैवार्थवत्त्वं महतात्रबंधेन व्यवस्थापिते पदान्यनर्थकान्येवाभिहितानि वर्णानामर्थवत्त्वे केवल कथा ॥०॥

इदानीं वर्णे पदे वाक्ये च समं कल्पितार्थवत्त्वो दृश्यते इति किमेतदुच्यत इत्याशंक्याह॥ ॥असत्या सत्यक्रमोऽप्यस्ति कविरुद्ध इव दृश्यते॥ इह भिन्नात्मागमदर्शना
नि लौकिके श्रावणे ग्रहणे भिन्नत्वात्तत्राभिनिविष्टैः परस्परं द्रव्याणां पृथक्त्वं पृथक्क्रमाः परिपाट्यो दृश्यन्ते विरुद्धा इव। परमार्थतस्तु तस्य सत्यरूपमेकमवि
रुद्धमेव सर्वत्र स्थितमिति। अतश्च सर्वे पार्षदत्वादेतदनुपंगात्कथं विदाश्रिते। नैतावतो भ्युपगतस्याखंडपक्षस्य सागम आयात इति बोद्धव्यं। इदानीं शब्दस्या
र्थाभिधाने स्वव्यापारं विचारयितुकाम आह॥ ॥विनियोगाद्दते शब्दो न स्वार्थस्य प्रकाशकः॥ अर्थाभिधानसंबंधमुक्तिद्वारं प्रचक्षते॥ इह केवल शब्दो
वदूर्थः स यदा वक्त्रा प्रति नियतएवार्थे विनियुज्यते तदा तमर्थं प्रकाशयतीति हृदयं। अतः शब्दस्यार्थप्रतिपादनयोग्यता उक्तिद्वारेवेत्याहुः। अथ किं
दानीमीप स्वाभाविकः शब्दार्थसंबंधोऽपेक्षते दर्शनमुपेतोऽयमीशब्दाद्यावत्कृतविनियोगमुखप्रेक्षणसंबंधाः। हंतैवं शब्दादिनाभवतां विमृषितैव वैयाकरणधु
रेसाकूतं कैतत्समर्थनार्थमाह॥ ॥यथा प्रणिहितं चक्षुर्दर्शनायोपकल्पते। तथाभिसंहितः शब्दो भवत्यर्थस्य वाचकः॥ यथा सहजयैव योग्यतया च
क्षुरिंद्रियमर्थविषयं दर्शनमुपकल्पयद्भूतसंबंधि प्रणिधानमपेक्षते। अन्यथा सर्वदा दर्शनोपजननप्रसंगात्तथैव शब्दः स्वाभाविकेनैव संबंधेनार्थ
प्रत्यायकोऽप्यभिधातृसंबंधाभिधानमपेक्षत एव। एतदुक्तं भवति। वाक्यानि स्वव्यापारे [redacted] प्रतियत स्वार्थभां जिभवंत्यभिधयार्थप्रकाशस्य
भिधात्वं स्वव्यापारं पुरस्कृत्य स्वार्थप्रकाशनं कुर्वंतीति बोद्धव्यं। स चाभिधातृव्यापारः प्रयोक्तृसंबंधाभिसंधाननिमित्तक इत्यभिसंधानतैवोपचर्यते।

७८ 78

ते २

यदाह। तथाभिसंहितः शब्दोर्थस्य वाचको भवतीति। अभिसंधानमेव व्यापारस्तत्र शब्दस्योक्तिलक्षणव्यापारतयोत्तिष्ठति इति। यदा त्वभेदपक्षस्तदा वक्तुरेवं लक्षणमि
तायतिभैवाभिसंधिरूपा शब्दस्य शक्तिर्भवतीति स एव वाभिसंधानो रभेदनिर्दिष्टः। अतः प्रचारश्च प्रभुत्वोपि व्यापारः प्रणिधानात्मक एवोक्तिः कार
णविन्यासेन विना शब्दभावनाभिव्यनुसंधानकारणकः शब्दस्य व्यापारोऽभिधा तदनुसंधानमेव शब्दस्य प्रवृत्तमभिधेति विज्ञेयं ननु चाभिधा
नमभिधेयं संबन्धश्च तयोरित्येतावदेव सुप्रसिद्धं यत्तच्च विनियोगयुक्तिरभिसं[redacted]धानमभिधेत्येवं स्वरूपस्य चतुष्कस्योपयोगः प्रतिपाद्यते तदप्रसि
द्धमेवेत्याशंक्याह॥ ॥कथं व्यवेतः संबन्धो दृष्टः कारणकर्मणोः। अभिधानियमस्तस्मादभिधेययोः॥ इह कारकाणां यः शालाकाकस्यानिपरस्परमसं भिधाना ५
बद्धानेव तेषां च यथा क्रियाव्यवधानेन क्रियासमाश्रयेण न संबन्धो दृश्यते तथैवाभिधानाभिधेययोर्वाच्यवाचकभावलक्षणः संबन्धोऽभिधाख्येन शा ना ६
ब्दव्यापारेण नियम्यत इति न पूर्वमत्राभिहितमिति। एतदेव स्फुटीकर्तुमाह॥ ॥वक्तृविवक्षाभिधानेषु सर्वेष्वेकार्थकारिषु। प्रत्ययोऽभिसंधत्ते शब्दस्त
सर्वेषु ३ त्रावतिष्ठते। तथा च वक्तृषु सर्वेषु गवादिषु वक्तृकवेकाभिधानेष्वेकशब्दप्रतिपाद्येषु च तत्रार्थेषु सजातीयस्यादेकार्थकारिषु [redacted] संनिहितेषु सत्सु प्रयोक्तारस्तत्रार्थेऽपमभिधत्तेऽभिसंधानेन वि तान ०



णाप्यतदेवस्फुटयितुमाह॥ ॥आम्नायशब्दानभ्यासे केचिदाहुरनर्थकान्॥ स्वरूपमात्रवृत्तींश्च परे २

नियोगेनाभिधाविषयीकरोतीति तत्रैवार्थे वाचकत्वेन शब्दोऽवतिष्ठते नान्यत्रेति स्फुटमेव परिहृत्य [४०८] प्रकारांतरैर्व्यां प्रतिपादने [४१०] अभिधानक्रियामेवार्थस्य प्रतिपादका
न। नियोगभेदान्यं प्रति तान्येवैकत्वदर्शिनः [४११] तथा चाम्नायशब्दा वैदिका अभ्यासवेलायां न कंचिदप्यर्थमभिदधति। तदानर्थका नेवतामाहुः। पदानि एव स्वरूपग्रहणाप्र
त्रिप्यायां प्रतिपाद्यं तेन तस्य स्वरूपप्रधानास्त इति तत्र तदर्थाः एवोच्यंते। यदा पुनः कुत्रचिद्याज्ञिके कर्मणि नियोगभेदेनाभिसंधानभेदेन तत एव विनियुज्यंते तदास्य व्यापारेणा
भिधात्वेन न तत्तदर्थप्रतिपादकाः स्तदर्थनिष्ठाः संपद्यंत इति स्फुटमेवाभिधेयव्यतिरिक्तो न्यत्र स्वभिधाप्रतिभात्येवेति न तदर्थपूह्यवुपपन्नः [४१२] एवमेकत्वदर्शिनोऽभि
धानं निमित्ताभिधात्वलक्षणव्यापारसमाश्रयणेन त्वर्थस्तत्तदर्थाभिधानमनुपपादितमिदानीं त्वभेदसमाश्रित्यैषां प्रकरणादिभिरेव तत्तदर्थप्रकाशनमुपपाद
यितुमाह॥ ॥तेषामत्यन्तनानात्वेनानात्वव्यवहारिणः। अक्षादीनामिवख्याताः रेकजातिसमन्वयात् [४१२] तेषां शब्दानां भेदवादिनो नानात्वमाहुः। केवलमेकजातिस
मन्वयस्तेषां सादृश्यरूपोऽस्ति। उदाहरणमाह॥ अक्षादीनामिवेति। यथाक्षाद [redacted] यः शब्दाभिन्ना एवस्थिताः
सादृश्याद्भेदेनैव प्रतीयंत इति [४१३] अत एवाक्रिमि साह॥ ॥प्रयोगादभिसंधानमन्यदेषु न विद्यते। प्रयोग उच्चारणं तस्मादन्यत्तेषामभिसंधानमुक्तिरभिधानैव
[redacted] विद्यते केवलं तर्हि नियतमेवार्थमभिदधातीत्याह॥ ॥विषयेषु तत्र शक्तित्वान्नानुत्वव्यवस्थितः [४१३] तत्र तत्र विषये नियतशक्ति
त्वाद्धि भिन्नशक्तित्वादेव सत्त्वात् तत्र तत्र व्यवस्थित इति [४१३] तेषामभिन्नत्वे सादृश्येऽपि सत्यर्थप्रकरणादिभिर्निग्रहीतार्थाभिधाना रवगम्यत [redacted] इत्याह॥ ॥ना

७९ 79

नात्वस्यैव संज्ञानमर्थप्रकरणादिभिः। नज्ञात्वर्थौ तैरेव हि निरन्वार्थौ नो कथं च न ॥४७५॥ शुक्रं चैतदस्य थैकत्रा यौ नरव्यक्ति तेवंशा व्यस्योपलब्धं पुस्तकस्यैवान्वार्थत्वं कथमनु
पपद्येते समभिधातुमाह॥ नज्ञात्विसारि ॥४७६॥ इदानीं पूर्वोक्त ग्रहणाय पुनरखंडवाक्योपक्रमेण वाक्यवाक्यार्थनिर्णयसंक्षेपेण कर्तुमाह॥ ॥पदरूपं तु यद्वाक्या
मस्तित्वोपनिबंधनं। कामं विमर्शोस्त्वयं नवाक्यावयवे पदे ॥४७७॥ योयमत्र विमर्शो विचारः कामं स पदैर्यरेकपदरूपमेव वाक्यं वाचकं नत्वौ पपन्नः कोहं यां तत्स्पदरूपं वा
क्यमित्याह॥ अस्तित्वोपनिबंधनमिति। अस्तित्वं अस्तिक्रियाया वाक्यत्वे वाचकत्वे उपनिबंधनं यस्य। यदृक्ष्यति। अस्तित्वेनानुषक्तोवेत्यादि। अथवा प्रकरणादि
नास्तित्वोपनिबंधनमित्येतन्त्वोपलक्षणं कदाचिन्निहस्यात्मतयाचेति बोद्धव्यं। तत्रैष विचारो यदुताभिधाव्यापारद्वारकं वाचकत्वं प्रतिनियतशक्तिकृतं चेति
नतु वाक्यावयवभूतैः पोद्धारपरिकल्पितैः पदैरिति। तस्यार्थवत्ताविरहादित्यभिप्रायः। तस्मात्स्फोटरूपमखंडमेव वाक्यं निराकांक्षं वाचकमभ्युपगंतव्यमि
तिदृष्टांतद्वारेणाभिधातुमाह॥ ॥यथैवानर्थकैर्वर्णैर्विशिष्टार्थोभिधीयते। पदैरनर्थकैरेवं विशिष्टार्थोऽभिधीयते ॥४७८॥ यथा ह्यनंतैर्वर्णैरनर्थकैरभिव्यक्तो
विशिष्टार्थः पदरूपः स्फोटात्मा वाचकोऽभिधीयते एवं पदैरनर्थकैरभिव्यक्त एव विशिष्टार्थः स्फोटात्मा वाचकोऽभिधीयते इति। ननु पदपदार्थसंप्रत्यय
स्तत्रोपजायत एव पदानां त्वनर्थत्वे कथं तत्स इत्याशंक्याह॥ यदंतराले ज्ञानं तु पदार्थेषूपजायते। प्रतिपत्तेरुपायोसौ प्रक्रमानवधारणात् ॥४७९॥ यदेतत्पदपदार्थज्ञा
नं विभ्रम[illegible]रूपमंतराले वाक्यवाक्यार्थप्रतिपत्तेरेवोपायभूतं बोद्धव्यं। तस्मान्निरंशत्वेपि वाक्यवाक्यार्थयोः प्रक्रमएव प्रथमसमयएव रूपं तयोर्नावधाय हेरंब०

४१७
तदुक्तिः। एवं वाचकाश्रयणे प्रकारद्वितयमुक्त्वेदानीं वाच्यमात्राश्रयणेन तथैव प्रतिपादयितुमाह॥ पूर्वैरर्थैरनुगतो यथार्थोऽत्मा परः परः। संसर्ग एव प्रक्रान्तस्तथा सोऽपृ
थग्वस्तुषु॥ ४१८ अनेन श्लोकेनान्विताभिधानसमाश्रयणेन संसृष्टं वाक्यार्थं प्रदर्शनं क्रियते। तथा ह्यभिहितान्वयवादिनः पूर्वपूर्वार्थानुगतः संसर्गो वाक्यार्थः। अन्विताभि
धानवादिनस्तत्तदुत्तरपदार्थानुगतः प्रथमतरमेव संसृष्ट एव। यदि परमत्र संनिधाने निदर्शकं यस्येतीति कर्तव्यतामात्रस्वरूपावगतावपेक्षितं इति बोद्धव्यम्॥ ४१८ ॥ अङ्गीकृते
तु केषांचित्साध्येनार्थेन साधने। आधारनियमार्थेव सा ˘˘धनानां पुनः श्रुतिः॥ ४१९ यदा केचिन्मन्यन्ते तत्र साध्येनार्थेन साध्यायेनिहे न संसर्गे येति यावत्। साधनउपकारलक्ष
पुनः ५ णेऽङ्गीकृत आश्लिष्टे विनाभावितया स्वयमेवा॒॑ वध्यते सति। यातत्र वाक्ये साधनानां श्रुतिः सा नियमायैव बोद्धव्या। कारकाणां यदि तत्र परमाधारनियमः क्रियत इति बोद्धव्यं इध
नाधारकरणशक्तिः स्यात्साधारैवाधिकरणशक्तिरेव मन्यत्रैव ४१९ तत्रानिःसाधना क्रिया न भवतीति साधनमात्रमनियताधारमाक्षिप्तं न त्वाधारसहितमित्याह॥ ॥ आधा
रनियमाभावात्तदाक्षेपो न विद्यते। सामर्थ्यात्संभवस्तस्य श्रुतिस्त्वनिहन्तये॥ ४२० साधनानामाधार [redacted] नियमो नास्ति। करणादिकृतयोहि नियताधारा हृष्यन्तद्ददा
धाराक्षेपः। तत्र साधनेनास्ति। सामर्थ्याद्यादि परं तस्य साधनस्य तत्र संभव एवाभ्यूह्यते। ततः किमाधारा एताः साधनशक्तयः स्युरिति दं उनत्यापि सार्थिकास्तु तिरस्याधार
नियन्त्रयेतासां पर्यवस्यतीति बोद्धव्यं॥ ४२० अथ क्रियाणां वाक्यार्थमाश्रित्याह॥ ॥ क्रियाक्रियान्तराच्छिन्नानियताधारसाधना। प्रक्रान्ता प्रतिपत्तॄणां भेदाः संबोधहेतवः॥ ४२१ क्रियेव
वविशिष्टा सर्वत्र प्रथमतरमेव वाक्यार्थत्वेन प्रक्रान्ता। क्रियान्तराच्छिन्ने त्वनेन विशेषकथनेन तदेव स्फुटीकर्तुमाह नियताधारसाधनेति। तत्रैव वाक्यार्थप्रदर्शनं कर्तुमाह॥

वाक्यभेदानांशे वा णां प्रयोगे ऽसौ सम्बोधनोपायमात्रमिति बोद्धव्यम्॥ ४२१ ॥ अथ स्वपक्षानुसारेण १

८० 80 ॥ ॥अविभागं तु शब्देभ्यः क्रमवद्भ्योऽपरक्रमं। प्रकाशते तदन्येषां वाक्यं वाक्यार्थ एव च ॥ [४२२] अक्रम एव निर्विभागः पानकरसादिवत्प्रतिभात्मको वाक्यार्थः स्फोटात्मकं च वाक्यमिति
कथं योगक्षेमत्वादेवमुक्तं वाक्यं वाक्यार्थ एव चेति ॥ [४२२] इदानीमसत्योपाधिः सत्यरूपः शब्दार्थ इति विचारपूर्वकं निर्दर्शयितुमाह ॥ ॥स्वरूपं विद्यते यस्य तस्यासत्यानि रूप्यते।
ना ... स्तित्यस्य स्वरूपं तु तस्यैवासत्यानि रूप्यते। [४२३] यस्य वस्तुनः प्रत्यक्षादिप्रमाणापरिच्छिन्नं स्वरूपं विद्यते। नीलं पीतमिति। तस्य तावन्तान्यसत्यानि रूप्यते। न व्यवहारगोचरतां
नीयन्ते। एतदुक्तं भवति। पदार्थः पृथग्रूपः सन्नपि पिण्डगुणाशेषा विभिन्नेर्व्यवहारपदवीं नेतुं पार्यते ॥ संसर्गस्य तन्त्वात्मनः प्रधानस्य तदितरविविक्तस्वरूपावधारणे पितदा पान ४
श्लेषेण सकलव्यवहारोपपत्तेः पदार्थोपायवदुपायो द्वारमिति तन्निरूपणमेव साफल्यं भजतइति तस्यैव सत्यत्वमुक्तं [४२३] अथ पदार्थासत्यप्रतिपादनपूर्वकं तदाक्षुरि
तस्यैव संसर्गस्य वाक्यार्थत्वं परिघटयितुमुपक्रमते ॥ ॥अत्रारम्भपरे येसरूपनिर्द्धारणं विदुः। अर्था[redacted]वभासरूपा हि श
ब्दे भ्योजायते स्मृतिः [४२४] अर्थस्वरूपनिर्द्धारणस्य स्वरूपपरिच्छेदो ऽयावद् एव न तत्रशब्द उपायभावमुपयाति। तद्धि निर्विकल्पकैकसमधिगम्यमित्यर्थः। तर्हि शब्दस्य
यां ३ तत्र कोपयोग इत्याह अर्थावभासेत्यादि। अर्थप्रतिभासस्य हेतुत्वं स्मृतावेव शब्दानामुपयोगः। तेनाक्षरस्यार्थेन सह सुदूरमेव विप्रकर्षस्तत एवकथं शब्दोऽर्थ
मभिदधीत सत्य एव शब्दार्थः पर्यवस्यति। [४२४] अतश्चैतदेवैत्युक्तमित्याह ॥ ॥अन्यथैवाग्निसंबंधाद्दाहं दग्धोभिमन्यते। अन्यथा दाहशब्देन दाहार्थः
प्रतीयते। [४२५] यदि शब्देन यथावद्वाह्योऽर्थः प्रकाश्येत तदा शब्दसंनिधापितो सौ नामपर्यन्तक्रियां कथं न कुर्यात्। तत एवाग्निसंबंधाद्दग्धो दाहमन्यथानुभवति दाहशब्देन हेरंब

चदाह मन्यथावगच्छतीति द्वाद्दार्थयोर्नास्ति कश्चिद्वास्तवः समन्वय इति बोद्धव्यं ४२५ तदेवं पदार्थो विपरीतख्यातिरूपोऽसत्ख्यातिस्वरूपो वा बोद्धव्य इति पदार्थस्यासत्य
त्वमभिधाय तदाश्रुरितस्य वाक्यार्थस्यासत्त्वं प्रतिपादयितुमाह॥ ॥पृथङ्निविष्टतत्त्वानां पृथगर्थानुपातिनां। इन्द्रियाणां यथा कार्यमृते देहान्न कल्प्यते। ४२६ पृथङ्निवि
ष्टतत्त्वं स्वरूपं पार्थिवत्वादिना भेदेनाऽयवा प्रतिनियतस्यार्थस्य समाश्रयणेन निविष्टमभिव्यक्तं तत्त्वं स्वरूपं येषां तानि तथा तेषामिति। तथा पृथक्पृथगर्थं रूपादिलक्ष
णमनुपतंति विषयीकुर्वंतीति तच्छीलानि तथा तेषां यथा सर्वस्य पृथक्स्वभावे देहादिना कार्यं प्रतिस्विकं नोपकल्पते। तथैव पदानां केवलानां वाक्यव्यतिरेकेण स्थिता
नामर्थवत्ताविरहः परिदृश्यते इति प्रकृते योजयितुमाह॥ ॥तथा पदानां सर्वेषां पृथगर्थनिवेशिनां। वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते। ४२७ वाक्यार्थस्वरूपं प्र
तिपादयितुमाह॥ ॥संसर्गरूपं संसृष्टेष्वर्थेषु वस्तु गृह्यते। नात्रोपाख्यायते न त्त्वमपदार्थस्य दर्शनात्। ४२८ न पुनरत्र पृथक्पदार्थप्रतिभासावसरे न सतत्त्वमुपाख्यायते प्र
कटीभवति। यस्मात्पदार्थरूपादिलक्षणमेव वाक्यार्थस्वरूपं दृश्यत इति। ननु चवन्ध्यायो नास्ति विषाणमस्तीतिवत्प्रतीतिः कं कथं सर्वमभिधीयते। पदं पदार्थप्रतिभासः सं
वेद्यमानोपि नाभ्युपगम्यते। पदार्थोपहितो वाक्यार्थस्तु सत्स्वेन निरूप्यत इत्याशंक्य संसृष्टपरिनिरूपितमेव व्यवहारगोचरतामुपयातीति न स्वरूपेणेति प्रतिपादयितु
माह॥ ॥दर्शनस्याप्रियत्वस्य न तथा दर्शनं स्थितं। वस्तुसंसर्गरूपेण तद्रूपं निरूप्यते। ४२९ इह सर्वोपरि बोध एव पारमार्थिकस्तद्व्यतिरेकेणास्य विचार्यमाणस्यानुप
पत्तेः सत्त्वं यथा सत्यत्वेन स्वस्थत्वादिरूपतया स्थितो न तथा तद्बोधस्वरूपदर्शनं पदार्थप्रतिभासावसरे स्थितं। [redacted]। तदवसरे हि वस्तु संसर्गरूपेण नो

८८

लपीताद्युपरक्तस्यानीलबोधः पीतबोध इति तद्रूपविरहितमपि निरूप्यते। एवमेतत्संसर्गादिकं वस्तु संसर्गरूपेण पदार्थोपहितं तथारूपं तद्रूपविरहितमपि निरूप्य
त इति किमत्रापराद्धं। तस्मात्सर्वथा केवलः पदार्थः पदं वा व्यवहार्यमेवास्त्वेतदसत्यमिति युज्यते॥४२८॥ वाक्यवाक्यार्थौ तु व्यवहार्यत्वात्सत्यम(न्त)ताविप्यर्यय इति प्रत्ययेवाकाङ्क्षेव
प्रयुज्यत इत्याह॥ ॥अशक्तिलेनानुषक्तो वा निरुद्धोऽर्थात्मनि वा स्थितः। अर्थोऽभिधीयते यस्माद्दतो वाक्यं प्रयुज्यते॥४३०॥ एतदेव स्फुटयितुमाह॥ ॥क्रियानुषङ्गेणावि
नानपदार्थः प्रतीयते। स सोऽवा विपरीतो वा व्यवहारे न सोऽस्ति तः॥४३१॥ अतो व्यवहारे केवलः पदार्थो नास्त्येवेति नोदनं। यत्राप्येकमेव पदं साद्दियेत तन्निराकाङ्क्षाशः स
त्ताशः प्रतिपादकं तच्चापि तदभूदस्ति नाभून्नास्तीति क्रियापदसंबन्धमन्तरेण परिसमाप्तार्थं न भवतीति सर्वथा केवलस्य पदमात्रस्यानास्त्यर्थवत्त्वेति प्रतिपादयि
तुमाह॥ ॥सदिति वस्तु यद्वाक्यं तदभूदस्ति नेति वा। क्रियाभिधानसंबन्धमन्तरेण न मन्यते॥४३२॥ तत्र च वाक्ये साध्यसाधने परस्परमविनाभाविनी अन्योन्यापेक्षके स
त्येव व्यवस्थिते। तथाहि। साधनं यथा निष्क्रियं न भवतीति साकाङ्क्षावत्त्वात्क्रियापेक्षमुच्यते। तथा क्रियापि निःसाधना न भवतीत्याख्यातपदप्रतिपाद्ये क्रियालक्षणे
सत्त्वाभिधानेन विना काङ्क्षा न निवर्त्तत इति। तत्र सा क्रिया साधनमाकाङ्क्षत्येवेति प्रतिपादयितुमाह॥ ॥आख्यातपदवाच्येऽर्थे साधनोपनिबन्धने। विना सत्त्वा
भिधानेन नाकाङ्क्षा विनिवर्त्तते॥ साधनं हि सत्त्वाभिधायिततस्तद्वतिष्ठते॥४३३॥ किं कृतस्तत्र गुणप्रधानभावस्तत्सोऽयं दुच्यते साध्यस्यैव प्राधान्यमिति विभाग इत्याशङ्क्याह॥
॥ ॥प्राधान्यं तु क्रियापूर्वमर्थस्य परिभाव्यते। साध्यप्रयुक्तान्यङ्गानि फलं तस्याः प्रयोजकं॥४३४॥ अर्थस्य वाक्यार्थलक्षणस्याख्यात प्रतिपाद्यस्य क्रियाप्रधा

॥४३३॥ साधनमुपनिबध्नं यस्याख्यातपदवाच्यस्यार्थस्य तस्मिंस्तथाभूते तस्मात्सत्त्वाभिधानेन विना नाकाङ्क्षा विनिवर्त्तते॥ १

नत्वा क्रियैवैषा धात्वात्मपूर्वैः प्रविभज्यते न साधनानि। यस्मात्तत्वार्थसाध्यनिष्पत्तये प्रयुक्तानि साधनान्यतो गौणान्यप्रधानभूतानि क्रियाणीति न तेषां तत्र विभागः। एवं क्रियाप्र-
युक्तानि नोक्तानि। ... प्रसंगात् क्रियाया अपि प्रयोजकमाह। फलं तस्याः [redacted] प्रयोजकमिति। फलप्रयुक्ता क्रियापीति फलापेक्षया क्रियाया अंगत्वं
द्रष्टव्यं[434] इदानीं सर्वोऽयं साध्यसाधनव्यवहारः काल्पनिकस्तयोश्च साध्यसाधनयोः परस्परसंबंध आपेक्षिक एव न वास्तव इति प्रतिपादयन् पुनरपि पदार्थासत्यत्वं व्यवस्थापयितु-
माह॥ ॥प्रयोगेनैवाभिसंबन्धे साध्यसाधनरूपतां। अर्थस्याभिसंबन्धकल्पनां प्रसमीहते[435]॥ इदं साध्यमिदं साधनं तयोश्चाभिसंबन्धः सर्वमेतत्काल्पनिकं तत तत्त्वस्यत्वमे-
तमेतंप वप्रयोक्तृसमीहामात्रजीवितमिति यावत्[435]। यदि हि वास्तवोऽयं स्यात्तदा वस्तुस्वभावस्योल्लंघनेनान्यथाकर्तुमशक्यत्वाद्व्यवस्थितमेवैतद्भवेन्न च तथा परिदृश्यत इति प्रतिपादयि-
तुमाह॥ पचिक्रियां करोतीति कर्मत्वेनाभिधीयते। पक्तिः कारणरूपं तु साध्यत्वेन प्रतीयते[436]॥ देवदत्तः पचतीत्यत्र या पाकक्रिया साध्यत्वेनोपलब्धा सैव पचिक्रियां देवदत्तः करो-
तीत्यत्र कर्मत्वेन पक्तिं पाकक्रियां व्यवस्थापिता। पचिक्रियाकरणं तु साधनत्वेनोक्तं रूपं प्रतिपादितमिति नैषा वस्तुगतिः। साधनसमुद्देशे चैतत्सर्वमेतद्वैवक्षिकमिति विस्त-
रेण प्रदर्शयिष्यति। तथा संबंधस्यापि काल्पनिकत्वमेव वक्ष्यतीति नेह प्रतन्यते[436]। अथवा अनेकशक्तिरर्थः। स्थितोऽपि यद्युपकारकत्वेनाद्य यथा प्रयोक्तृभिर्विवक्ष्यते तथैवा-
त्मानमुपदर्शयतीत्याह॥ ॥योऽयोऽयेनोपकारेण प्रयोक्तृणां विवक्षितः। अर्थस्य सर्वशक्तित्वात्तथैव व्यवस्थितः[437]॥ तथा वेदमपि वस्त्वनेकशक्ति क्वचित्तत्वात्सहं तदि-
तिप्रदर्शयितुमाह॥ ॥आराद्वृत्तिषु संबंधः कदाचिदभिधीयते। आश्लिष्टो योऽनुपश्लिष्टः स कदाचित्प्रतीयते[438]॥ आराद्वृत्तिषु वृत्तिदूरमपि विप्रकृष्टेषु पदार्थेषु कदाचि-

ये॥४४०॥+२

८२ 82 स्वरसंसंबंधः संज्ञो योऽभिधीयते। कदाचित्तु य आश्लिष्टः संबद्धोऽपि सोऽनुपश्लिष्टो योऽसंबद्धो दूरतः इति विवृक्षावशात्प्रतीयते ४३९। रूपांतरमप्याह॥ ॥संसृष्टानां विविक्तत्वं संसर्ग
श्च विवेकिनां। नानात्मकानामेकत्वं नानात्वं च विपर्यय एकत्वेपि च कल्पनावशान्नानात्वं वस्तूनां दृश्यते। राहोः शिर इति यथा। ना [redacted]
नात्मकानां च धवखदिरपलाशादीनामेकत्वमेकस्यां बुद्धौ संकलनरूपं दृश्यते वनमिति यथा। विवेकिनां परस्परविलक्षणानां पदार्थानामयः
शलाकाकल्पानां संसर्गो वा कार्यरूपो दृश्यते। यथा देवदत्तः काष्ठैरिसादो। संसृष्टानां च विभक्तत्वं यथा माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इत्यादावेषां बुद्ध्या संकलिता द्व ४
नां सतां पश्चाद्विभागेनावस्थापनं क्रियते ४४०। तदेतत्कथमुपपद्यत इत्याह॥ ॥सर्वात्मकत्वादर्थस्य नैरात्म्याद्वाथवा स्थितं। अत्यंतयतशक्तित्वाच्छब्द एव निबंधनं ४४१। सर्व
शक्तिरर्थस्तेन तेन रूपेण निरूपितस्तत्तद्व्यपदेशपात्रं भवतीति नियतशक्तिभिः शब्दैस्तथा व्यपदिश्यत इति स्थितं। अथवा निरात्मक एवासत्स्वभावो सावित्ति यथा य तथा ६
था विवक्षया निरूप्यते तथा तथा व्यवस्थानमुपदर्शयतीति शब्दैस्तथैव व्यपदिश्यत इति बोद्धव्यं ४४१। इदानीमर्थस्वरूपं शब्दानैव स्पृश्यमिति केवलं तत्त्वदृष्ट्या विमर्शे पार्थ
स्योपलक्षणाभावेन स्थितानां व्यवहारे पयोगितामुपयांतीत्यभिधातुमाह॥ ॥वस्तूपलक्षणः शब्दो नोपकारस्य वाचकः। न स्वशक्तिः पदार्थानां संस्प्रष्टुं तेन शक्यते ४४२॥ स्व ३
शब्दार्थयोर्न वाच्यवाचकभाव उपपद्यते। तथा सति शब्दानामर्थस्वरूपं प्रकाश्यतामुपेयान्न च तथा दृश्यत इत्याह॥ ॥संबंधिधर्मा संयोगः स्वशब्देनाभिधीयते। संबं
धः समवायस्तु संबंधित्वेन गम्यते ४४३। संयोगशब्दात्संयोगो द्रव्याश्रित इति यथावसरनिविष्टस्वरूपस्तत्र संबंधिस्वभावैः प्रतीयते न च तत्स्वतद्रूपं। एवं समवायशब्दात्समवा ^ हेरंब०
यः प्रतीयत इत्याह। सम्बन्धः समवाय इत्यादि सम्बन्धित्वेन सम्बन्धस्वरूपविरहेण समवाय इत्यस्मात्प्रतीयते॥ अथवा

पदासंयोगशब्देनासौ संबंधः स्वतंत्रोऽभिधीयते तदा तत्र समवायः संबंधत्वेन गम्यत इति। पदासंबंधत्वेन गम्यत इति पाठस्तदैवं योजनीयं[४४२] पदार्थानां स्वतो रूपं न किंचिद्व्यवतिष्ठते।
यथा यथा निरूप्यंते तथा तथा त्मानमासादयंतीत्याह॥ ॥लक्षणाद्व्यवतिष्ठंते पदार्था न तु वस्तुतः। उपकारात्स एवार्थः कथंचिदनुगम्यते[४४४] स एवार्थः केनचित्कथंचिदु
पयोगादन्यथा व्यपदिश्यते। इत्येवमनेकप्रपंचैरसत्यभूत एव पदार्थ इति संग्रहस्य व्यवस्थापितं[४४४] इदानीं वाक्यार्थस्य कस्य सत्यभूत इति प्रतिपादयितुमाह॥ ॥वाक्यार्थे योभि
संबंधो न तस्यात्मा क्वचित्स्थितः। व्यवहारे पदार्थानां तमात्मानं प्रचक्षते[४४५] परस्पराभिसंबंधस्वरूपः पानकरसादिवदविभागोऽनेकशः एव यो वाक्यार्थस्तस्य न क्वचित्स्वरूप
रूपतया आत्मा स्थितो वधारयितुं शक्यत इति शाबरा। पदार्थानां पुनरयमः त्वाकाकल्पानां व्यवहारावसरे तमात्मानं जीवितमिव प्रचक्षते। तदुक्तं तत्प्रतिपादितपदार्थो
[redacted] रेत्रो न सर्वस
कस्यचित्प्रवृत्तिनिवृत्तिसाफल्यात्। स चैकस्मिन्न यर्थसमुदाये एव वा परिसमाप्तो बोद्धव्यः[४४५] अथवा नैवासौ क्वचित्परिसमाप्तः इदंतदित्थंरूपतयानुपलक्षणात्केव
लं पदार्थसंबंधिना स्वरूपेणाखंडस्य वाक्यार्थस्य स्वरूपं प्रतिपद्यत इति प्रतिपादयितुमाह॥ ॥पदार्थसमुदाये वा समाप्तो नैव वा क्वचित्। पदार्थरूपभेदेन तस्या
८२ त्मा प्रविभज्यते[४४६] एतदुक्तं भवति। न पृथगेव यं गृह्यते तस्य स्वरूपं विवेक्तुं शक्यते। परोपाधिद्वारकमेव सर्वदा तस्य निरूपणमवसानं व्यमित्युच्यते[४४६] एतदेव स्फुटीकरणमा
ह॥ ॥अन्वाख्यानाय यो भेदः प्रतिपत्तिनिबंधनं। साकांक्षावयवं भेदे तेनान्यदुपवर्ण्यते[४४७] तस्मान्नाख्यानाय योऽयं पदार्थभेदोऽपोद्धृत्य स तस्येव प्रतिपत्ति [redacted] नि
भेदः १

८३ 83 वंधनं बोद्धव्यः । अतः पदार्थानां भेदे क्रियमाणे सति तेनापोद्धृते न पदार्थभेदेनान्यदेव पदार्थव्यतिरिक्तं वाक्यार्थस्वरूपमुपवर्ण्य तेन प्रकटीक्रियते । कीदृग्विमां कांक्षा
वयव मिति । भेदे सति सा कांक्षा अवयवाः पदार्थस्वरूपाः प्रतिपत्त्युपायाः प्रसृतत्वं तथाभूतं तत्पाभूतस्य च वाक्यार्थस्य नानात्वं क्रियते वितस्य निर्विभागस्यो पाधिकृतः
पदार्थद्वारकः प्रविभागो नानारूपत्वमनुगम्यते प्रतीयते ४४७ । परमार्थस्त्वेक एवासौ विभाग इत्याह । अनेककार्यकेरेकस्य प्रविभागोऽनुगम्यते । एकार्थत्वं हि वाक्यस्य मात्र
४४८ यापि प्रतीयते ॥ वाक्यस्य स्फोटात्मनो वाचकरूपस्यैकार्थत्वमेक एव निर्विभागस्वरूपो वाच्योऽर्थोऽयमस्तत्वयातस्य भावस्तत्त्वं प्रतीयते कथं मात्रयापीति । प्रदा
तस्य मात्रया नियतसंख्याकेनाल्पीयसा त्रायेनयोगोऽभिसंबंधोद्धृश्यते यथोक्तं । इग्यण इति योगस्यानादेशाभावलक्षणो वाक्यार्थः स संप्रसारणमिति व्यपदिश्य
ते । अतः संप्रसारणमित्येवमेकसंख्येन लघीयस्त्वान्मात्रया व्यपदिश्यते । तस्य योगो यदात्र परिदृष्टस्तदैतदवगम्यते यदुतानंश एक एवाखंडस्वरूपो सौ वा
॥४४८॥ तदेव कार्थोऽन्यथा संप्रसारणमित्येतेनैकसंख्याकेन कथं युज्येतेति वक्तुमेवं वाक्यार्थः स सरूपः पदार्थस्तस्य स एवेति निर्णीतं । स च वाक्यार्थो बौद्ध एवाबाह्यरूप इति
प्रतिपादयितुमाह ॥ ॥संप्रसार्यापोद्धारोऽर्थः सन्न सन्वा विभज्यते । बाह्यीकृत्य विभागस्तत्र तत्तापोद्धारलक्षणः ४४९ । संप्रसार्योबुद्धिविज्ञानमित्यर्थान्तरं । संप्रसार्योऽ न २
र्थोऽभिधेयरूपो यस्यासौ तथा । तथाभूतान्तस्मादपोद्धार्याद्वाक्यार्थाद्वाक्यार्थः सन्बाह्यीरूपतया विद्यमान एवाथवाऽसन्बाह्यरसत्यभूत एव विभज्यते । विभागेनानुग हेरंब०
म्यते व्यवस्थाप्यते । कथं कृत्वेत्याह ॥ बाह्यीकृत्येति । अबाह्य एवासौ बाह्यरूपतया प्रथते विवेकानवधारणात् दृश्यविकल्पैकाकारेण वाक्यार्थं प्रतिपद्य पश्चा

ता:पदार्थव्यक्तयो न व्यवस्थिता: यदि हि तत्र ता: स्यु: तदाह्यतीते ऽवगतेऽपार्थे ३

दसौ विभागेनानुगम्यते इति यावत्। विभागस्तत्र कीदृगित्याह॥ शक्त्यपोद्धारलक्षण इति। शक्तीनां पदार्थसंबंधिनीनामपोद्धार: पृथक्करणं लक्षणं यस्य सोऽत
था पदार्थशक्तयस्तस्मादपोद्धृ [redacted] ंतरस्यार्थ: अत्र तु बौद्धे वाक्यार्थे समाश्रिते शक्तीनां तत्राविद्यमानत्वात्तस्मादपोद्धारस्तासां कीदृश: स्या
त् स्यादेवार्थक्रियावाप्ति:। तस्माद्बौद्धादर्थादन्यत्र बाह्य एवार्थे ताः शक्तयो व्यवस्थिता स्तं च बौद्धादर्थादन्यत्र बाह्येऽर्थे विद्यमानमपि तासां स्वरूपं निराकारेण विज्ञा
नेनोपलभ्यते। तस्माद्विज्ञानाकारस्य बाह्यस्य चार्थस्य शक्तित एकाकारेण विना व्यवहारो नोपपद्यत इति बाह्यीकृत्येत्युक्तं। तथा चैकयोगक्षेमत्वाद्बौद्धार्थबाह्या
र्थयोरुक्तो बौद्धेऽप्यर्थे शक्त्यपोद्धारलक्षणो विभाग:। तत्र यदि विज्ञानाकारस्य विकल्पवासनामाहात्म्याद्बाह्यत्वेनैकीकृतस्य सत्यतो बहिरर्थोऽस्ति येनोपजन्यते त
दा बाह्य एव शब्दार्थ: न चेदसन्नेव तर्हि बौद्ध एव शब्दार्थ इति निर्णय:[४४९]। अथवा काव्यविचारप्र■स्तावे वाक्यानामेकवाक्यत्वं विभिन्नवाक्यत्वं वा मतभेदेन प्रतिपा
तिङ्तिङ्गो[४]
दयितुमाह॥ ॥बहुष्वपि तिङ् तेषु साकांक्षेष्वेकवाक्यता। तिङ्न्तेभ्यो निघातस्य पर्युदासस्तत्यार्थे वा ...[४५०] ह वार्त्तिककारेणाख्यातं साव्ययकारकविशेषणं वाक्यमित्य
त्रैकवचनस्याविवक्षितत्वादेकतिङ् इति वाक्यलक्षणं तत्प्रतिपादनादनेकाख्यातमपि वाक्यमेवं भवेदेवेष्यते। सूत्रकारेण त्वतिङ् इति प्रतिषेधोपादानात्सामर्थ्याल्लब्ध: न ३
पि बहुषु तिङ् तेष्वपि साकांक्षत्वान्नैकवाक्यतेवेष्यत इति प्रदर्शितं बहुष्वपीत्यनेन[४५०] वार्त्तिककारमते न वाक्यभेदस्तत्रेत्युपदर्शयितुमाह॥ ॥एकतिङ्न्यस्य
वाक्यं तु शेषस्तत्र नियतलक्षणं। तस्य तिङ्ग्रहणे नाथो वाक्यभेदान्न विद्यते नियतलक्षणमिति विवक्षितेनैकत्वमित्यर्थ:[४५१] केषांचित्तु नरनेकाख्यातमप्युद्भावेऽपि वा
[४५२]

वा २

८४ 84

क्यापेक्षभेदाभेदौ व्यवस्थितावेवेत्याह॥ ॥तिङंतांतरयुक्तेषु युक्तयुक्तेषु वा पुनः। प्रयोगः प्रत्ययतः याति तीति भेदाभेदौ न तिष्ठतः॥४५२॥ इह प्रयोगः प्रत्ययतः याति तीत्यत्र तिङंतां
तरसद्भावाद्वाक्यभेद एवं तथा च प्रयोगान्तरस्य पातीत्यस्य च संबंधादेकं वाक्यं। अनंतरं विभक्ति विपरिणामेन कर्म्मपदेन प्रसवमश्नीदेनं प्रयोगं पश्यतेति द्वितीयं
वाक्यं। अन्य स्त्वाह। युक्तयुक्तत्वाद्बहुष्वपि तिङंतेष्वभेद एवं तथा ह्यत्र प्रयोगशब्देनयाति पदस्य योगः। तद्युक्तेन याति पदेनाख्यातांतरस्य योगः तेनात्र प्रयोगकर्त्तृ
के सरणे पश्यतेति ह्येकक्रियापेक्षया एकमेव वाक्यमिति केचित्॥ पश्यतेति बहुवचनं ह्यनुरोधात्। वार्त्तिककारस्याप्येकतिङित्यनेकतिङ्प्रधानतिङं त्वं ४
तापेक्षया श्रूयमानं सत्त्वकारमनानुगुणं प्रभजत एवेत्यसन्नयोनोऽस्ति मतभेदः। तदपरिणाम न भेद एव बोद्धव्यः॥४५२॥ अथ वाक्यपरिसमाप्ति निराकांक्षत्वपूर्विका
नानावाक्यतेकवाक्यतावाद्वातुंक्व्यानाम पेक्षाशंकाशब्दलक्षणा वाक्यपरिसमाप्तिर्बोद्धव्या नार्थलक्षणेत्यत्र साकांक्षता नाकांक्षत्व विचारमाह॥ ॥श्रुतिक
र्त्तव्यतार्थस्य सामर्थ्याद्यस्य कांक्ष्यते। अत्र शब्दलक्षणाकांक्षसमाप्त्यार्थं तदुच्यते॥४५३॥ अविद्यमाना शब्दलक्षणा शब्दाश्रिता आकांक्षा यस्मिंस्तद्वाक्यं समाप्ता
र्थमुच्यते। तदवगतस्यार्थस्य तु यत्र सामर्थ्याद्दर्शितयाभावलक्षणान्तरदीयशमिति कर्त्तव्यतायामाकांक्षा जायते तावतानन्तरं तद्वाक्यमपरिसमाप्तमित्युच्य
तइति बोद्धव्यं। यथा व्रीहयो वहन्तंतामिस्यत्र श्राव्यापेक्षातावन्नास्ति व्रीहीणां तु वहननमुलूखलमुसलकर्म्मकर्त्त्रादिसंनिधानमंतरेणनसम्पद्यतइतिन
दपेक्षणाद्वाक्यं नात्रपरिसमाप्तमिति नयुक्तं वक्तुं। शब्दलक्षणापेक्षा योगादितिं तदेव स्फुटीकर्त्तुमाह॥ ॥तत्राकांक्षा नमात्रे तु पावानर्थानुषज्यते। विना हेरंब

॥४५३॥ए १

योगे लक्षणत्वेन प्रतिपादनेन विना

पितत्प्रयोगेण श्रुतेर्वाक्यं समाप्यते ॥४५७॥ ब्रीहीणामवहननमात्रमत्रान्वाख्यायते न स्थितं श्रमति उलूखलादिसन्निधाने यदत्रानुषज्यते तस्यापि
पितत्रतद्वाक्यं श्रुत्या शब्दव्यापारेण समाप्तमेवेति बोद्धव्यं ॥ इदानीमर्थमसाधनाभेदेपि शब्दवृत्त्येन गुणप्रधानरूपतयाभिधानं शब्दे सुसंभवतीति प्रसंगात्कुवन्नर्थमेव प्रति
पादनं कर्तुमाह ॥ ॥ चंक्रम्यमाणोऽधीष्व जपं स्थं क्रमणं कुरु ॥ नार्थ्यसाविशेषेपि शब्दैः प्रतीयते । चंक्रम्यमाणोत्र जपं कुरु । अथवा जपं श्च चंक्रमणं कुर्वि
त्यत्र उभयथा जपविधिः प्रतीयते केवलं चंक्रम्यमाणो जपेत्यत्र जपः प्राधान्येनाभिधीयते चंक्रमणं गुणत्वेन । जपं श्च चंक्रमणं कुर्वित्यत्र तु जपस्य गुणभावः
प्राधान्यं तु चंक्रमणस्य । अथवोभयथापि जपयुक्तत्वाच्चंक्रमणस्यार्थभेदो न कश्चित्त्वत्र शब्दप्रतिपादनवैलक्षण्यमात्रमेवावसीयत इति । एवमर्थाभेदेपि शब्दप्रति
पादनवैचित्र्यमुपदर्श्य इदानीं शब्दभेदान्नामर्थ्यादर्थप्रतिपत्तिवैचित्र्यं भवतीत्यत्र शब्दमपि व्यापारं प्रदर्शयितुमाह ॥ ॥ फलवंतः क्रियाभेदाः क्रियांत
रनिबंधनाः । असंख्याताक्रमो दृष्टो रेकाख्यातनिदर्शनाः ॥ यावज्जीवमग्निहोत्रं जुहोति । तथा प्रतुते देवदत्त इत्यादावेकाख्यातनिदर्शनाः । एकमाख्यातपदं
निदर्शनं वाचकं येषां ते तथाभूताः क्रियाभेदाः प्रतीयंते भेदश्च स्वरूपेण फलेन च भवतीत्यां फलवंत इति । फलभेदवंत इत्यर्थः । स्वर्गकामः कदाचिद्य
जते कदाचिद्वृष्टिकामः कदाचित्पुत्रकामो धनकामो वेति । फलभेदस्वरूपमाह ॥ क्रियांतरनिबंधना इति । इति कर्तव्यतायां क्रियांतराणि निबंधनं येषां ते त
थाभूताः । किं च बहुना क्रमेण प्राकृतिकेनैमित्तिकेन त्वयतया उद्देशेन फलस्वरूपेण च ते संख्यातुमशक्याः एवं क्रियाभेदास्ते नाख्यातेनैकरूपेणाभिन्नेनैव
निदर्श्यंत इति बोद्धव्यं । एतदेव स्फुटीकर्तुं प्रतिपादयितुमाह ॥ ॥ निवृत्तभेदा सर्वैव क्रियाख्यातेभिधीयते । ऋतेरश्याक्याभेदानां प्रविभागप्रकल्पना । आ

मात्राच्छन्दमात्रात्मा

८५ 85 ख्यातपदे क्रिया सैवेव निवृत्तभेदा सामान्येनाभिधीयते। यस्माच्छ्रुतिमान्येन क्रमताद्रूपतानां प्रविभागरूपता व्यवसायानुमत्का। ४५७ उदाहरणमाह॥ ॥अश्वमेधेन यक्ष्यं
ते राजानः सत्रमासते॥ ब्राह्मणादिना ख्यातरूपेद्वैरः प्रतीयते। अत्र फलसाधनभेदात् प्रतिक्रियायाः सत्यपि भेदे नैवाख्यातशब्दात् प्रतीतिरस्यार्थसामर्थ्यात्तु
भेदस्तस्या अवगम्यते इति नानाशब्दधर्माणां वैदिकमप्युदाहरणमाह॥ ॥[redacted] सहकृतुता सप्तदशास्वनाहृत्तापि याक्रिया। प्राजापत्येषु सा मध्यात्सा भेदं प्रति
पद्यते॥ सप्तदशप्राजापत्यानेकवर्णान् आलभेतेत्यत्र नाहृत्तापि आलंभनक्रिया सहकृतुताद्वेनानाहृत्तेनैकेनावगतोत्तरकालं वालम्भभेदादुद्देनाव
यस्यान्वाख्यानीय तिष्ठत इति बोद्धव्यं। यस्माच्चाख्यातानगतो धातुर्निवृत्तभेदायाएव क्रियायाः प्रतिपादकस्तस्माद्भेदासंभवाद्यथासंख्येनसंबंधानुपपत्ते भुजिक्रियादेवदत्तादि
ह्वा॥६ षु प्रत्येकं भवति इतरेत्यां देवदत्तादिषु भुजिः प्रत्येकं भवति इते प्रतिस्वंतंत्रं वाक्यं वा भेदेन प्रविभज्यते। देवदत्तादिकर्तृकाभुजिर्वाक्यार्थरूपा त्र प्रत्येकं भवति इ
तइस्यर्थसमाप्तिप्रदर्शनं। शब्दस्यसमाप्तिमप्युपदर्शयितुमुक्तं प्रतिस्वंतंत्रमित्यादि वाक्यमेवात्र प्रत्येकं देवदत्तादिषु भेदेनावतिष्ठत इति बोद्धव्यं। ननु देवद
दान्वयर त्तयज्ञदत्तविष्णुमित्रा भोज्यन्तामिसभेदरूपमेव वाक्यं प्रयुक्तमतः कथमस्माद्भेदेनावसायः स्यादित्याह॥ ॥उच्चारणेतु वाक्यानामन्यद्रूपं निगद्यते। प्रतिप
त्तौ तु भिन्नानामन्यद्रूपं प्रतीयते। वाक्यानामन्ययोच्चारणसमये स्वरूपवृत्तिः प्रतिपत्त्यवसरे त्वन्यथैव स्वरूपावसायइति सप्प्याख्यानस्याभेदेऽर्थप्रसिद्धोच हेरंब०
नेनात्र प्रत्येकं समाप्तिर्वाक्यवाक्यार्थयोः पर्यवस्यतीत्युच्यते। शास्त्रविषयमप्येतदेव प्रदर्शयितुमाह॥ ॥एकं ग्रहणकं वाक्यं सामान्येनाभिधीयते। कर्त्तरीतिय

कवाक्यताविरहादन्येन प्रत्ययविधायकेन सम्बन्धं नैवोपेयादित्यभिमतल(दया) निष्पत्तिरेव [४६४] तस्माद्यदेतदुपनिबन्धनभूतं सामान्येनासंयुक्तं विधि
नैवोपात्तं सकृद्ग्रहणकवाक्यं सद्विभागवाक्यानामवान्तर ४

यातत्त्वपक्षादिषु विमृश्यते [४६२] ।शास्त्रेपि च कर्त्रे रिक्तदिश्येकं प्रत्ययार्थप्रतिपादकं सामान्येन ग्रहणकवाक्यमुपादीयते।तच्च प्रत्येकं प्रत्ययार्थोपाधिषु प(क्ष)वादिषु विभि
न्नेषु विषयेषु विभागेन संबंधमुपनीयाभिमतलक्ष्यनिष्पत्तये व्यापार्यत इति प्रत्येकमेव तत्परिसमाप्यते [४६३]।यदि पुनः संयुक्तविधिनोपादीयेत तदाभिमतसिद्धये न स्या
दित्याह॥ ॥यथाकांक्षानिवर्त्तेन तत्द्रूपस्य सकृद्धुतौ।नैवान्येनाभिसंबंधं तदुपेयात्कथंचन [४६४]।यदि सकृदेव प्रत्ययविधायकेनैव सहैवोपादाय सार्थ्यपरिसमाप्तेराकां
क्षानिवार्यते तदा तद्योगेन तत्रैव परिक्षीणशक्तित्वाद्ग्रहणं वाक्यानां योनिः कारणं गोद्यमित्याह॥ ॥एकरूपमनेकार्थं तस्मादुपनिबंधनं।यो निर्विभागवाक्यानां
तेभ्योऽनन्यदिव स्थितं [४६५] अनेकेऽर्थोः प्रत्याख्यायस्य तत्तथा।अवांतरवाक्यानुपनिबध्यंते।स्मिन्निस्युपनिबंधनं।अयन्तेभ्योऽनन्यदिवाभिन्नमिव स्थितं।अथ च प्र
त्येकं भेदेन संबंधमुपगच्छत्यथा वल्लक्ष्यसिद्धयेविभवतीति [४६५]।अयाख्यानेधातुवाच्याऽस्तत्त्वभता पूर्वापरीभूतावयवासाध्यमानावस्थाक्षणप्रचययात्मिकाया
क्रियातस्याः कीदृशो जातिव्यक्तिव्यवहारः समाम्नीयत इत्याह॥ ॥क्वचित्क्रियाव्यक्तिभागे रूपकारे प्रवर्त्तते।सामान्यभाग एवान्यः क्वचिदर्थस्य साध
कः [४६६]।क्वचिद्दितिबाधकविकल्पसमुच्चयातिशयप्रशंसादेविषये क्रियाव्यक्तिभागेः समीहिता [redacted] ये सिद्धो प्रव
र्त्तते।जातिसमाश्रयेण विकल्पसमुच्चयाद्यनुपपत्तेः नहि देवदत्तः पचति यज्ञदत्तः पचती साद्ये जातेः समुच्चयाद्युपपद्यते।क्वचित्तु यजते पचत

३

८६ 86 इत्यादौ देशकालसाधनादिभेदेनैव व्यक्तिव्यवहारो वास्तवः स्यादिति संहत्या लोकव्यवहारः सिद्ध्येत न क्वचित्क्रियापरामर्शः सामान्यभाग एव वाक्यार्थमुपकरोतीति इ ४६६
हापि जातिभागमेव क्रियासंबन्धिनं शब्दाः प्रत्याययन्तीत्याह ॥ ॥कालभिन्नास्त्वभेदाय पेचापुष्ट्रासिकादिषु । प्रक्रमे जातिभागस्य शब्दात्स्मात्तेन भिद्यते । येक्रि ॥४६७॥+२
भेदः ३ याभेदाः क्रियाविशेषाः कालभिन्नाः पचत्यपाक्षीत्पक्ष्यतीत्येवमादयो पेचापुष्ट्रासिकादिषु विषये साधनभिन्ना उष्ट्रासिका आस्यते हतशायिकाः शय्यते
इत्यादौ तेषु क्रियासंबन्धतो जातिभागस्य प्रक्रमे सामान्येनैवापर्यालोचितदेशकालसाधनतया प्रक्रमे शब्दात् । न स्वरूपं न भिद्यते । साधनसंबन्धकृतस्त
४६८ त्रभेदो न प्रथममतद् इति यावत् । तदेवं देवदत्तादिषु भुक्तिः प्रत्येकमवतिष्ठत उत्पादिना ग्राव्लक्षणभेदमाश्रित्यैका क्रियानेकैः साधनैः प्रत्येकमर्थसमाप्त्या
का संबन्धमुपयातीति प्रदर्शितम् । इदानीं यत्र विजातीया विभिन्नपदवाच्याः क्रियाः एकशब्दवाच्यानि च साधनानि तत्र कथं भिन्नाभिः क्रियाभिस्तेषां साधना
नां संबन्धः स्यादित्याशङ्क्य तत्रापि प्रतिपत्तिकालसमाश्रयणेन भिन्नानामेव साधनानामवगतानीति तथैवैताः क्रियास्तैर्भिन्नैरेव साधनैः प्रत्येकमर्थस
माप्त्या का संबन्धमुपयान्तीति प्रतिपादयितुमाह ॥ ॥एकसंख्येषु भेदेषु भिन्ना जात्यासादिभिः क्रियाः । भेदेन विनियुज्यन्ते तच्छब्दस्य सकृच्छ्रुतौ । ४६८ समानसंख्ये
षु भेदेषु साधनविशेषेषु तेषु जात्यासादिभिरिति जात्या आदिग्रहणादिति कर्त्र [redacted] मतादिभिश्च याः क्रियाभिन्ना असंबद्धा उपात्तास्ताः साधनाभि हेरम्बं
धायिनः शब्दस्य सकृद्भेदेन श्रुतावपि प्रतिपत्तिभेदसमाश्रयणेन भेदेनैव विनियुज्यन्ते संबन्धमुपगच्छन्तीति । तिस्रो द्रव्याँ ४६९ उदाहरणमाह । असादिषु या भिन्ना भं

जिमक्षि दिवि क्रियाः। प्रयोगकालाभेदे पि प्रतिभेदं पृथक् स्थिताः ४६८ अक्षाभ्यस्यंतां भक्ष्यंतां दीव्यंतामिति या भिन्नजातिका [redacted] भिन्नतुल्या द्वा च्चाख्य क्रियासा
स्ता वाक्यभेदो पादानरहिता अपि प्रत्येकं समाख्याभेदे नैव स्थिता इति ४६९ यस्माद्वसाधनानि तत्र निबद्धानि भेदे नैवोपात्तानीति प्रतिपत्तिवेलायां भेदे नैव क्रियायाः यथा स्वं सं
बंधमुपयांती ति तत्र न्यायप्रतिपादनपूर्वकमभिधातुमाह॥ ॥अक्षाणां तत्रिणां तत्रमुपायस्तुल्यरूपता। एवं क्रमो विभक्तानां तन्निबद्धासहश्रुतिः ४७० तुल्यरूपते
त्यनेन तंत्रं व्याचष्टे। युक्तं चैतद्यस्मात्तुल्यद्वाः क्रमेण विभागेनैव कदाचित्प्रयुज्यंते। कदाचित्तंत्र न्यायसमाश्रयणेन युगपदेवेति अक्षादीनां प्रयोगवेलायां क्रमयौगपद्योरु
पायस्तद्वत्तंत्रेण युगपदेव भिन्नाः प्रयुक्ता अक्षादय इति क्रियाभेदे नैवेषां संबंधं गच्छंति ४७० अथ क्रमयौगपद्यस्वरूपमत्रोद्दिश्य व्याख्यातुमाह॥ ॥द्वावभ्युपायौ शब्दानां
प्रयोगे समवस्थितौ। क्रमो वा यौगपद्यं वा यौ लोको नातिवर्त्तते ४७१ तत्र क्रमे विभिद्यते रूपं यौगपद्ये न भिद्यते। रूपविभागेनैव क्रमः। साधारण्येन यौगपद्यं ॥०१॥ तत्र भिन्ना
क्रियायौगपद्येपि शब्दानां प्रयोगे क्रमरूपमेवानुपततीत्यर्थं तथा भावात्क्रमरूपानुपातित्वमेव बोद्धव्यमिति प्रतिपादयितुमाह॥ ॥क्रियासु यौगपद्येपि क्रमरूपा
नी॥४७२॥+२ नुपातिता तथा च अकृता स्वस्येव भंजनेन विभीतकद्वक्ताक्षयोः न पा विभीतकास्यस्येव भक्षणेनेरतयोः। देवना स्यस्येव देवनेन पूर्वयो रित्यर्थः तथाभावाद्यौगपद्ये
पि क्रमानुपातित्वं साविति। तत्रश्च ते क्रमयौगपद्ये भेदसंसर्गशक्ति रूपे शब्दव्यापाररूपे अपि शब्देभ्यो भिन्ने इव व्यतिरिक्ते इव स्थिते लक्ष्येते ४७२ परमार्थतस्तु श
ब्दशक्ती एव क्रमयौगपद्ये इत्यभिधातुमाह॥ ॥भेदसंसर्गशक्ती हे शब्दाद्भिन्ने इव स्थिते॥ किंतु शब्दस्यैव ते हे शक्ती पदे देशकालक्रमेणावभाति संसर्गश
स्य

८७ 87

क्रमानुयुगपद्वृत्तीनित्यंभेदसंसर्गप्रयोगेनैकेनक्रियापदेनसंबंधाद्युगपत्एववासाधारण्याद्योगपद्यक्रमस्वरूपयोर्भेदात्कथंयुगपत्प्रयोगेक्रमरूपानुपातित्वमेवक्रि

याणांश्रुतेरुक्तमि त्याह॥ ॥योगपद्येप्यनेकेनप्रयोगेभिद्यतेश्रुतिः।योगपद्येपिसाधनस्यप्रयोगेभेदेनक्रियापदसंबंधाद्युगपतएवसाधारणीश्रुतिरिति।त पर

त्रैहिसाभिन्नेवोपात्तेत्यर्थः।४७३ अथवा अक्षादस्तत्रोद्भूतावयवभेदःसमुदायएवप्रतिनिर्दिश्यतेतत्रावयवधर्मेणसमुदायोपदिश्यतेतुल्येवंभेदमुपपाद्ययथा

योगप्रत्येकमर्थेसमाप्त्यावाक्रियाणांभिन्नानांविनियोगःक्रियतइत्याह॥ ॥अभिन्नोभेदरूपेणासएकोर्थोविवक्षितः।तत्रावयवधर्मेणसमुदायोनुगृह्यते॥४७४॥

अभिन्नःसमुदायस्वरूपःभेदरूपेणोद्भूतावयवभेदतयायोसावर्थोविवक्षितस्तत्रावयवधर्मेणाभेदेनक्रमेणेतियावत्समुदायोनुगृह्यतेउपोद्बलीक्रियत

इतिभेदप्रतिपत्तौभेदेनैवक्रियाणांसंबंधः।अतश्चास्यसमुदायस्यभेदप्रतिपादनेप्रत्येकंवाक्यार्थःपरिसमाप्यते४७५ अथवावचनभिन्नएकत्वाद्वएवाक्षोभुज्यतांअ

क्षोदीव्यतामित्येवमवांतरवाक्योपश्लाविनीसाधनश्रुतिर्भेदेनैवावतिष्ठतइत्याह॥ ॥भेदनिर्वचनेतस्यप्रत्येकंवासमाप्यते।श्रुतिर्वचनभिन्नावावाक्यभेदेवति

॥४७६॥+२ ष्ठतेशब्दपरिसमाप्तेर्भेदप्रकारमाह॥ ॥तत्रैकवचनांतोवासौक्षशब्दःप्रयुज्यते।एकस्मिन्द्वाक्यभेदेनसंबंधिनिप्रवहिप्रमाणे सत्यक्षोभक्ष्यतामित्यादौ द्वाक्या ३

कवचनस्यैवाक्षशब्दस्यप्रयोगःकदाचित्।अथवाप्रत्याहृतिप्रत्येकंबहुवचनांतेनैववाक्यभेदइत्याह॥ ॥प्रत्येकंवाबहुत्वेनप्रविभागोपश्यतेकृतौ।अक्षाभ हेरंब

ज्यंतामित्यादिकःप्रविभागःकृतसनातिक्रमेणैववाक्यानांकरणीयः।४७७ इदानीमभेदवादिनामपिमतेद्विष्ठानोवाक्यानांश्रुतिभेदेनैवविभागमभिधातुमाह॥ ॥

दर्शिनाम्॥ अनेकशक्तेरेकस्य स्वशक्तिः प्रवि १

द्विष्ठानि प्रातिवाक्यानि तेषु पेकतैभजते[४७८]॥ द्वयोरर्थयोस्तिष्ठंतीति द्विष्ठानि शास्त्रीयाणि लौकिकानि च यानि वाक्यानि तेषु पि एकत्वदर्शिनां मते एकस्यैव तत्स्यप्र
तिपादकस्य शास्त्रस्यानेकशक्तेरसौ स्वशक्तिरेव प्रविभज्यते। यथा इग्यणः संप्रसारणं द्विर्वचनेऽचीति इदुरति वहस्या वहति मा राद्वं शादिभ्यः॥ कः स्य ब्रूल च यो मिस्यादीनि
शास्त्रीयाणि तथा श्वेतो धावति। अलंबुसानां याते त्यादीनि यानि लौकिकानि वाक्यानि तेषु द्व्यर्थद्वय प्रतिपादनाय शक्तिविभक्तत्र इति शक्तितंत्र प्रतिपादनेभेददर्शिनां ॥४७८॥ +२
पुनर्मते भिन्नान्येव वाक्यानीति तंत्रेणोपात्तानि वितिशा ढतंत्रे प्रतिपादयितुमाह॥ ॥अथ संगतभिन्नयोर्वाक्य स्वसंयोगस्तंत्र लक्षणः। उपायस्तत्र संसर्गः प्रतिपत्तृभिरुद्यते[४७९]। तंत्रे
वं तंत्रेण द्व्यर्थे तस्मिन्प्रयोगे प्रतिपत्त्रनुसारेणोभयोरात्मा सो संसर्गो वाक्याभिधेयलक्षणोभिद्यते। यथा यणो निकसे सलक्षणस्य सवर्णस्य का संज्ञा स्यादित्येके न ऐ नदप स्या ५
रेण प्रागिको यः स्थानादेशाभावलक्षणः संबंधः स किं संज्ञ इति लाघवादाचार्येस्तं तंत्रन्यायसमाश्रयणात् संप्रसारणमित्येकैनैव शब्देनोत्तरमाह। तथैवैके न प [redacted]
तीत्यप ४ [redacted] एवं किं जातियो धावतीरेण किं वर्णो धावति स नयोर्लाघवात्स श्वेति वक्ति श्वेतो धावतीति। तत्रासौ वाक्यार्थः प्रतिपत्तृभिरुद्यते। येन एवं किं जातीयस्य स्वा इतो धा
वतीत्येव रूपतश्च व्यवतिष्ठते। येन च किं वर्णदुक्तं तस्य श्वेत गुणयुक्तो धावतीत्यर्थरूपोसौ जायत इति तंत्रनिबंधनाद्द्विधा वाक्यार्थव्यक्तिरूपजायत इति एवमन्यत्र व्याख्येयं एत ॥४७९॥ +२
देव व्याख्यातुमाह॥ ॥भेदेनावगतौ पूर्वं शब्दौ तुल्यश्रुती पुनः। तंत्रेण प्रतिपत्तारः प्रयोक्त्रा प्रतिपादितौ[४८०]॥ पूर्वं प्रयोक्तृश्रये भेदेन रूपवैलक्षण्येनाधिगतौ श्वा इतः श्वेत इति
तावेव तुल्यश्रुती भिन्नावेव तंत्रेण प्रतिपत्तारः यस्मात् तंत्रन्यायसमाश्रयणेन प्रयोक्त्रा प्रतिपादिताः प्रतिबोधिताः[४८०]। इदानीमत्र वक्तुरेकस्यैव शब्दस्य प्रतिपादने विवक्षोपजा

यते तस्यां सत्यामपरेऽनुनिष्पद्यन्त इति शब्दभेदमते प्रकारान्तरेण तत्रमुपपादयितुमाह॥ ॥एकस्यापि विवक्षायामनुनिष्पद्यते परः। वक्तृच्छाविरहादपि साधारणत्वादपर
स्यानिष्पत्तिस्ततोऽर्थद्वयप्रतिपत्तिः॥८७॥ अभेदवादिनामपि मतेऽनन्तरस्य प्रकारान्तरमाह॥ ॥विनाभिसंधिना शब्दः शक्तिरूपः प्रकाशते॥८८॥ प्रयोक्तृभिसंधानमन्तरेण तत्रासौ
शब्दः साधारणत्वाच्छक्तिद्वयसंयुक्तः प्रकाशते। एतदुक्तं भवति। शुक्लजातीयप्रसाधनशक्तिः प्राणिविशेषप्रसाधनशक्तिर्वा श्वेतशब्दस्तत्रोदीरितः। स तत्रैकमर्थं प्रत्याय
यंस्तन्त्रेण सामर्थ्यादर्थान्तरप्रकाशनं करोत्येव॥८८॥ अथवा तुल्यकक्ष्यतया शक्तिद्वयप्रयोगाद्युगपदेव अ[illegible]र्थद्वयप्रकाशनं करोतीति शक्तितन्त्रतामाश्रयितुमाह॥ ॥अ
नेकशक्तिरेकस्य युगपच्छ्रूयते क्वचित्। अग्निः प्रकाशदाहाभ्यामेकत्रापि नियुज्यते॥८९॥ एकस्य शब्दस्य क्वचिद्विषये तो यावता स्पष्टो विषये युगपदेवार्थद्वयप्रत्यायनसमर्थश
क्तिद्वयमाश्रीयते। यथा क्वचिदवसरे दाहप्रकाशाभ्यां युक्तोऽग्निरेकत्रापि प्रकाशे दाहे वा नियुज्यते। उपयोगवशाद्धर्मद्वयायाप्युपादीयत इत्यर्थः। तथैवानेकशक्तियो
गाद्युगपदर्थद्वयप्रकाशनाय शब्दः समाश्रीयत इति॥८९॥ इदानीं शास्त्रविषयमप्येतदुपदर्शयितुमाह॥ ॥आवृत्तिशक्तिभिन्नार्था वाक्ये सकृदपि श्रुते। लिंगाद्वान्तत्रय
मोऽद्वाविभागेनावतिष्ठते॥९०॥ इग्यणः संप्रसारणमित्येतस्मिन्वाक्ये सकृदपि श्रुते। कीदृशे शब्दभेदवादिनां मते आवृत्तिभिन्नार्थे। एकत्ववादिनां मते शक्तिभ्यां भिन्ना
र्थे तत्र हि शक्तिभेदादर्थभेदः अनन्तरं तद्वाक्यं प्रतिपत्ति शब्दभेदमते लिंगात्तज्ज्ञापकाद्विभागेनावतिष्ठते वर्णवाक्यार्थप्रत्यायकतयावतिष्ठत इत्यर्थः। यस्मात्संप्र
सारणस्येति भक्तविभक्तिनिर्देशं पश्यन्ति ततोऽवस्यति वर्णः संज्ञीति वस्तोः संप्रसारणमित्यादौ भाविविभक्तिनिर्देशाद्वाक्यार्थस्यापि संज्ञित्वमवस्यतीत्यावृत्तिमेवश हेरंब०

तद्भेदवायुरनुमिनोति। अभेदवादीनुक्तिभेदं तत्र धर्मोक्तिं तत्र लक्षणादनुमिनोती स्यत्र संप्रसारणशब्दः शक्तिद्वयवशाद्युगपद्वर्णवाक्यलक्षणस्यार्थद्वयस्यापि
प्रतिपादनं करोत्येवं।[४८३] एतदेव व्यक्तो। प्रदर्शयितुमाह॥ ॥संप्रसारणसंज्ञायां लिंगाभ्यां वर्णवाक्ययोः। प्रविभागस्तत्र सूत्र एकस्मिन्नेव कल्पितो॥[४८४] लिंगाभ्यामुपदर्शिताभ्यां
भाविभक्तविभक्तिनिर्देशरूपलक्षणाभ्यां। तत्र एकस्मिन्नेव सूत्रे वर्णवाक्ययोः प्रयोःसंज्ञिनोः प्रयोगो लभ्यत इति। उक्तं च विभक्तिविशेषनिर्देशस्य ज्ञापक उभयसंज्ञात्वस्येति। तं
त्रचेदमेकशेषसमानफलं भाष्ये प्रदेशे प्रूपन्यस्तमिति[४८५] भाष्यकाराभ्युपगमेनार्थतं त्रसिद्धिमुपपादयितुमाह॥ ॥तथा द्विर्वचनेऽचीति तंत्रोपायादिलक्षणः। एकशेषेण
निर्देशो भाष्य एवोपवर्णितः।[४८५] इहीद्विर्वचनेऽचीत्यत्र द्विर्वचननिमित्ते ऽचि योऽज्ञादेशः स द्विर्वचन एव कर्तव्ये स्थानिवदिति सूत्रार्थो व्याख्यायते। तत्रोक्तं तस्सुन्नर्हिती यं द्विर्वे
चनग्रहणं कर्तव्यं। न कर्तव्यमित्याह। एकशेषनिर्देशाद्धासिद्धमिति। यद्येकशेषस्तदा द्विर्वचनं प्राप्नोति सत एकशेषसमानफलसाधारणलक्षणं तंत्रमेवात्रेकशे
षशब्देनोक्तं। तेन तंत्रोपायादिद्वैतोलक्षणएवैकशेषनिर्देशः प्रदर्शितः। तस्मादेकशेषमंतरेणापि तंत्रन्यायसमाश्रयणाद्द्विर्वचनेऽचीसत्रार्थे संगतेरेकशेषसमानफलं
शास्त्रपदसुपाय भूतं तंत्रमभ्युपगतं भाष्य इति सिद्धं।[४८५] अथ महाभाष्यस्यावतारान्वाख्यानपूर्वकं टीकाकारो महत्तामुपवर्णयन्स्वरचितस्य ग्रंथस्य सगुरुपूर्वक
ममभिधातुमाह॥ ॥प्रायेण संक्षेपरुचीनल्पविद्यापरिग्रहान्। संप्राप्य वैयाकरणान्संग्रहेऽस्तमुपागते॥[४८६] इह पुरा पाणिनीयेऽस्मिन् व्याकरणे व्याड्युपरचितं ग्रंथ
लक्षपरिमाणं संग्रहाभिधानं निबंधनमासीत्। तच्च कालवशात्सुकुमारबुद्धीन्वैयाकरणान्प्राप्यास्तमुपागतं। तस्मात्क्लेशभीरुत्वात्संक्षेपरुचयः प्रसिद्धजनाः। अतएवा
नू

८८ 89

सोविद्यासुपरिग्रहः स्वीकारो येषां तेतथा तैस्तैः संग्रहाध्ययनमुपेक्षिते सत्यस्तं याते संग्रहे ४७६ साधुत्वज्ञानोपायिकतया धर्मसाधनत्वेनोपपन्नातोऽप्युपयोगाय व्याकर
णस्येतरविच्छेदाशंकरुणानुयुक्तेनाथ भगवता पतंजलिना वार्त्तिकव्याख्यानपुरःसरं महाभाष्यनिबंधनमुपरचितमित्यभिधातुमाह॥ ॥कृतेऽथ पतंजलिना गु
रुणा तीर्थदर्शिना। सर्वेषां न्यायबीजानां महाभाष्ये निबंधने ४७७ ॥ गुरुणेति भाष्यकर्त्तुः पूज्यापदे ॥ तीर्थान्यागमविद्योपायाः तान्पश्यति विजानातीति तीर्थदर्शी। अने
न गुरुत्वनिबंधनः प्रभावातिशयो भगवत उक्तः। तच्च भाष्यं न केवलं व्याकरणस्य निबंधनं यावत्सर्वेषां न्यायबीजानां बोद्धव्यमित्यत एव सर्वन्यायबीजहेतुत्वादेव
महच्छब्देन विशेष्यं महाभाष्यमित्युच्यते लोके ४७८ । अयमहत्त्वमेव विशेषणद्वारेणास्योपपादयितुमाह ॥ अलब्धगाधे गांभीर्यादुत्तान इव सौष्ठवात् ॥१०॥ गाधो निष्ठाप
रिच्छेदस्तन्नेति यावत् असावलब्धो यस्य। कस्मादित्याह गांभीर्यादिति। गांभीर्यं गहनता मर्मप्रकाडुःस्थेन दुरवगाहत्वं। अतिगंभीरं हि भाष्यमुपरचितं भगवता पतं
जलिनेति। न तस्याभिधेयं व्यक्तं तुं केनचिच्छक्यत इति। किमेवमेकांतेन गहनमित्यं भाष्यं नेत्याह। उत्तान इवेत्यादि। उत्तानं स्पष्टं सौष्ठवं परिपाटी पुरस्कारेण द्रष्टुं परिपाटि
लक्षणादर्थसौष्ठवादुत्तानं स्पष्टमायं। यत एव प्रतिभाति। अतो नेदमसेव्यं। सज्जनमानसमिव निसर्गसुकुमारमतिगंभीरं चैतदत एव महाभाष्यमित्युच्यत इत्यर्थः। ए
तेन संग्रहानुसारेण भगवता पतञ्जलिना संग्रहसंक्षेपभूतमेव प्रायशो भाष्यमुपनिबद्धमित्युक्तं वेदितव्यं ॥१०॥ तदेवं ब्रह्मकाण्डकायवाक्यबुद्धिविषयाये मलाद्यादिश्लो
केन भाष्यकारप्रशंसोक्ताऽह चैवं भाष्यप्रशंसेति शास्त्रकर्त्तृ स्वटीका कृता महत्त्वोपवर्णिता। अतएव चेदं महाभाष्यमहत्त्वबुद्धयो नैवबोद्धुमलमित्याह॥ ॥तस्मिन्नकृ राम०

शास्त्रस्य

तद्बुद्धीनां नैवावास्थितनिश्चयः। ४८५ कृतानुसरन्नाप्रकर्षे प्रज्ञा महतां बुद्धिर्येषां ते तथा तद्रूपवैकल्येनाकृतबुद्धयः स्वस्य प्रज्ञा उच्यते। तेषां निश्चयो निर्णयरूपः प्रत्ययो बोधो नैवावावा
स्थितन प्रतिष्ठामलभत। न तेनास्मद्गुरोस्तत्र भवतो वसुरातादन्यः कश्चिदिमं भाष्यार्णवमवगाहितुमलमित्युक्तं भवति। ४८६ तथा च संग्रहप्रतिकञ्चुकैरा चार्यैस्तर्कविद्यामात्र
वैदिभिर्बुद्धपाटवादिदमाप्लावितमाभासीकृतमित्याह॥ ॥वैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः। आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके। ४८७ शुष्कतर्कैः केवल एवानपशा
स्त्रपरिमलरहितो भराप ते। तमेवानुसरन्ति प्रमेयनिर्णयायेति तदनुसारिणः। महाभाष्यं हि बहुविधविद्यावाटलहलमार्षं व्यवस्थितं न तन्त्रान्वीक्षिकीमात्रकुशलः कथं तन्नि
श्चिनुयादिति तर्कमात्रानुसारिभिस्तैस्तद्विप्लावितं। तर्कैः स्वपुरुषाणां स्वबुद्धिमात्रनिर्मितविग्रहो व्यवस्थित एव। आर्षमुक्तं। यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः। अभियु
द्वा ६ क्ततरैरन्यैरन्यथैवोपपाद्यत इति। ४८८ इत्थं च परस्परं वैमत्यादागमसंप्लागाच्च यावस्थितो व्याकरणागमः पतञ्जलिशिष्येभ्यः कालपरिवासाद्भ्रष्टः सन् ग्रन्थमात्रे पाठमात्र एव व्यव
स्थितो दाक्षिणात्येष्वित्याह॥ यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः॥ काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः। ४८९ तदेवमुक्तनूनकल्पसंज्ञानो व्याकरणागमः। ४९० अपक्वा
त्रान्तरेण चन्द्राचार्यादिभिरागमं लब्ध्वा तेन चोपायभूतेन सकलानि भाष्यावस्थितानि न्यायबीजानि तान्यनुसृत्य व्याकरणागमः पुनरपि स्फीततां नीत इत्यभिधातुमाह॥
॥ ॥पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः। स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः। ४९१ पर्वतात्त्रिकूटैकदेशाव तितिलिंगैकदेशादिति। तत्र ह्युपलतलेख्यवर्णरचि वि २
तो न लभत व्याकरणागमलिपि स्थितिकेन चिद्ब्रह्मराक्षसानीय चन्द्राचार्यवसुरातगुरुप्रभृतीनां दत्त इति तैरेव लुप्तप्रायव्याकरणस्य स्वरूपं तेन उपलभ्य सततं च शिष्याणां

९० 90 व्याख्यायत्र बहूनामखिलेनीतो विस्तरं प्रापितरस्यानुक्रम्यते॥ [४८१] अथ कदाचिद्योगेनो विचार्यते नत्र भगवता वसुरातगुरुणा समाय मागमः संज्ञाय वा स्वसारमणीत इति स्वरचितस्या
स्यग्रंथस्य गुरुपूर्वक्रममभिधातुमाह॥ ॥न्यायप्रस्थानमार्गांस्तानभ्यस्य संचदर्शनेप्रणीतो गुरुणास्माकमयमागमसंग्रहः [४८२] न्यायस्य प्रतिष्ठाप्रस्थानं तस्य मार्गो न्या
यप्रस्थानमार्गाः न्यायप्रतिष्ठितैर्बहुभिर्मीमांसा शितिया वत। न्यायप्रस्थानमार्गांस्तांस्तान संचदर्शने व्याकरणसिद्धान्तलक्षणमभ्यस्यासौ प्रणीतः। अनेन गुरुणा संज्ञायन त
थाममाय [redacted] मागमसंग्रहः प्रणीतः येन संदेहो भवेदपि तु सावधानेनेत्युक्तं भवति। अस्माकमिति बहुवचनादन्येषामपि सहाध्यायिनां ग्रहणम्। अथ वाम यानुतद
नुच्छेदायास्य मुपनिबंधः कृतः स्मानो बहुमानः प्रकटितः [४८३] नन्वेतावानेव किमयं काण्ड इत्यथो [redacted] को व्याकरणागमइत्याशंक्याह॥ ॥वर्त्मनामत्र केषांचिदहूत्कमा
त्रमुदाहृतं। कांडेत्रतीयेन्यक्षेणभविष्यति विचारणा॥ [४८३] अत्रास्मिन्वाक्यकांडे कांडइत्ययेकाकेषांचिदेव न्यायवर्त्मनां वस्तुमात्रं बीजमात्रं प्रदर्शितमिवं शिष्टं तु तत्तीयेऽस्म
परासिद्धान्त ४ यथं स्पष्टकांडेकांड इत्यनिष्पंदमस्ते न्यक्षेणादरविशेषेण स्वसिद्धांतवर्त्मनां विचारणायुक्तायुक्तविचारपूर्वकनिर्णीतिर्भविष्यतीति ततो नाय मेतावान् व्याकरणा
गमसंग्रह इति [४८३] ननु तत्र न्यायप्रस्थानमार्गाभ्यासेन किं कृत्स्नस्य दर्शनमेव निष्प्रयुक्तं किं न विचार्यत इत्याह॥ ॥प्रज्ञाविवेकं लभते भिन्नैरागमदर्शनैः। कियद्वा शक्य
स्वर मुन्नेतुं स्वतर्कमनुधावता॥ [४८४] नानाविधैरागमदर्शनैरागमसिद्धान्तैः खलु प्रज्ञाविवेकं लभते वैशारद्यमाप्नोतीति तत स्वनिः संदिग्धं स्वसिद्धांतमेवसपरिकर्तुं भिन्ना हेरंब०
गमदर्शनैः शाक्तिज्ञायते अन्यथाऽहंपरकीयागमस्वरूपेण प्रतिपन्नासौ प्रेक्षामेव तेषु तेषु चावस्थानेष्वनुसरतां किम्पच्छकामुन्नेतुं [redacted]

प्रतिविधातुं कदाचित्परमर्षयोऽपि योगजधर्मोऽसत्त्वताम भ्युपेयुः यावत्सदा योग्यसंपतः सिद्धं नमलमिति तद्योऽभ्यतेयेत्वाह क्षवः प्रायकल्पिकाव्यामलिनचित्तवृत्तयः शा
स्त्रादेवातीतानागतव्यवहितपदार्थस्वरूपं निश्चिन्वंतितेषां नानागमोपसेवयैवानुप्रसीदतिभगवतीप्रतिभेतियुक्तं एतदेव निरूपयितुमाह ॥ ॥तत्तदुक्त्यसमानानां
पुराणागमैर्विना । अनुपासितवृद्धानां विद्यानातिप्रसीदति ॥ प्रतिष्ठामुपगतैः पूर्वैरागमैर्बहुविधैर्विनास्वयमेवतत्त्वदिस्यथायथमेवोत्प्रेक्षमाणानां विकल्पतां
प्रतिपत्तृणां ग्रन्थोपनमेधाविरहिणां पंडितंमन्यानामभिमानाग्रहाघ्रातानां तेषां भगवती विद्या विशुद्धप्रज्ञाप्रतिभालक्षणा न प्रसीदतीत्यर्थः । किंतर्हि वृद्धो
पसेवाक्षालिताः आगमजन्यैर्विगलिताभिमानानामेवैषा भगवती प्रज्ञाप्रसादमुपयातीति सिद्धः । तदयमत्र संक्षेपसमुच्चयः । वाक्यानामपृथग्वादे विभागः परिकी
र्तितः । शास्त्रीयमेमांसकैः कीर्तनेवाक्यस्येतत्बलाबलविचारोऽपि शास्त्रीयोव्याप्तिनिर्णयात् ततस्थात्र समासेनवाक्यलक्षणनिर्णयः । संदेहः श्रागमेनापि
वाक्यभेदस्यदर्शितः स्फोट एव तु सिद्धं नैवाक्यं वाक्यप्रसाधितं परदार्शत्वनुमतो नेति याकरणोस्थितं ततोन्विताभिधानस्याभिहितान्वयकस्यचार्दभागार्थभागाभ्यां
दूषणज्ञातकीर्तनं । प्रसंगेनापरेप्यत्र वाक्यार्थाः षट्प्रदर्शिताः । अखंडवाक्यपक्षे च चोद्यपंचककीर्तनं । उपपत्तिः प्रतिनिधेर्नास्तीति प्रथमं पश्यन्तीकादि पदसंदे
होनोपपद्यतइत्यपिश्रुतिवाक्यविरोधतुष्कौ शैरेवबली यसी ॥ प्रतिष्ठितस्यान्यायस्याप्येवं प्रागः प्रसज्जते । अवांतराणांवाक्यानामुपपत्तिविरुध्यते । प्रासंगिकादिषु
तत्वालक्षणेष्वप्यसंभवः । प्राप्नोत्येवमखंडेऽस्मिन्वाक्ये दोषाउदाहृताः । अपोद्धारंसमाप्तिं सरोषास्त्वेतेनिराकृताः । संहितापांविभागेऽपि पदसोऽपिलयंगतो दृपा
न

91

ना

९९ दाशवधिंकन्तुतयोरर्थेः प्रकल्पनता। इतिदूषणमत्राधास्तदेवाकोचवाकाविते[११] तंत्रन्यासवशाद्वस्तवपक्षेदोषसंहतिः। वाकार्थस्यात्रभेदोपिविक स्यपरिकल्पितः[१२]

प्रतिभेदंचसिद्धांतेवाकार्थेउपपादितः। प्रविभागाश्रयादत्रप दार्थस्यापिसंभवः[१३] सचद्वादशधाभिन्नइत्यपत्रोपपादितं। प्रतिभालक्षणंसम्यग्विधान्तुसंहिते

कृतो[१४] पदभागार्थभागाश्चवित्तस्यप्रतिपादिताः। अन्वयव्यतिरेकाभ्यांविविक्ततोपपादितो[१५] सनिमित्ताचसाप्यत्रनीत्यातसमाश्रयाः। उपसर्गनिपाताश्चकर्म

प्रवचनीयकाः[१६] पदभेदाः प्रसंगेनलक्षणेनोपलक्षिताः[१७] सार्थकानर्थकत्वाभ्यांविचारेवणेनिष्ठिते[१८] कृतेथाखंडपक्षेत्रप्रतिष्ठामुपनायिनः। पदवादेथदोषाणांचतुर्णां

परिकीर्त्तनं[१९] समासेषुविरुद्धार्थप्राप्तिरादावुदाहृताः[२०] अध्यारोपितानांतथावाकेसाधनसाभिधायिता[२१] अर्थासंगतिरप्यत्रवक्ष्ये हेतुरा [redacted] हृता। प्रतु

संख्यादिषुतथानास्त्यर्थविपर्ययेषपि[२२] इतिवोद्यचतुष्केणपदवादःपराहतः। स्थापितेखंडपक्षेपिचोद्यसप्तकमाहितं[२३] द्वंद्वेसमासेनैवस्याद्द्व्यर्थस्याभिधायिका।

विभक्तिरितिदोषोत्रप्रथमंपरिकीर्त्तितो[२४] वाकार्थसमाप्तिस्तुसमासेकृतोपपद्यते। परामर्शेपिनैवस्यात्सर्वनाम्नभिरेवच[२५] अनुष्ठानंक्रमेणाथवाकार्थस

नज्ञातुचित। स्यात्क्रमेणानुष्ठानंशक्यं तेनकथंचन[२६] एकदेशस्यकरणेसमासेपर्यवर्णनात्पृथक्त्वथकृदातस्मा साचञ्याख्या प्रकीर्त्तिता[२७] नञ्समासेपदा

र्थस्यविकल्पेवहुभिःपुनः। प्राधान्यपरिकल्पापमाब्येपक्षाःपरिष्ठिताः[२८] पद्यखंडमिदंवाक्यंनैषास्याकल्पनाक्वचित्। दोषावेतावपिद्यास्यप्रक्रियामात्रमेवचा[२९] हेरेवं

शास्त्रप्रवृत्तावितिचनिराकरणमेतयोः। ततश्चाखंडपक्षस्यसवाधउपदर्शितः[३०] जहत्स्वार्थविकल्पेनवह्वीह्यादिगामिना। प्रस्तुतमतुदोष स्वपदवादेप्र

समुदायेऽर्थकारिता। अभिमन्यतइत्येतदखंडेनोपपद्यते॥३१॥ एतानिपंचचोद्यान्यपोद्धारस्यसमाश्रयात्॥ समर्थितानिवैसम्यगखंडं

वाक्यमिच्छता॥३२॥ अथाखंडपदावाक्यं ३४

पदाश्रयः ॥ ३७ ॥ उपात्तत्याग संग्राह्ये सर्वत्रैतिच दूषणम् ॥ सह प्राग्युक्तदोषैश्चाप्यैकाद ४

कीर्त्तितः ।[३१] प्रकृतसर्थः प्रत्ययार्थ इति भिन्नोपरस्परं ॥ यावत् स्थितो तयोरेकापायेनावगतिः कथं[३२] इहाः हन्तव्यतीति च साहृत्यासाद्यास्त्वेव कथम् ॥ पदार्थप्रतिदोषोऽये
पदवादे समुद्धृतः ।[३३] प्रत्ययदूषणमप्यर्थे एकस्मादेव वन्मतेः ॥ अन्नी स्यादेकथं च स्यात्सत्यतापदपद्धते ।[३४] स सर्वेऽयपदानां स्यात्प्रकृतिप्रत्ययार्थयोः । कथं लक्षणाना
स्त्वेषु सांकर्येण व्यवस्थितिः ।[३५] पदार्थमनर्थे वादे प्रतिपद्यान्यथा पुनः । वाक्यार्थे प्रति[redacted]पत्तिश्च रुद्यानैतत्समंतसां[३६] ससम्भे जेषु यपदेष्विति वा क्वचिदोजगुः ॥ तत्र
र्थानुपपत्तेश्च नास्ति वादः ।[३७] समीरिताः । पदवादे वेदे पास्कृपषकपक्षद्वयं पुनः ॥ व्याख्याभागार्थभागाभ्यां विस्तरेण विचक्षणे ।[३८] निरर्हतमतो युक्तो वाक्यवाद
परिग्रहः ॥ दोषः संक्षिप्य तिक्रान्तः सत्रकारैरभिसंमतः ।[४०] अपोद्धारात्र्यपादत्वेगौणमुख्यविचारणा ॥ ततः कृतासु निपुणं टीकाकारेण सादरं ।[४१] तत्साम्यस्य विभागो
पि ज्ञानानामुपपादितः । मुख्यानांतरीयकयोर[redacted]र्थयोरनिवर्तनं ।[४२] तत्तस्य च तुष्कस्यचिंतनं विहितं क्रमात् । व्याख्यार्थनिर्णयोर्पयाः सादरं परिकीर्त्तिताः ।[४३] तासर्थ
परिपाट्याश्चार्थतात्पर्यमपीति वा वाक्यनिर्णयः समासेन विचारितमतः रूपकृ[४४] उत्सर्गस्यापवादस्य विवेकः परिकीर्त्तितः । संज्ञाशब्दे च पञ्चतो निर्णयः परिवत्सरा
न[४५] प्रत्येकं समुदाये च समाख्यावाक्यनिश्चितिः । न्यायः संचिंतितश्चात्र लक्षितोऽप्यभिधीयते ।[४६] अथपूर्वोक्त संक्षेपद्वारेणाप्युपपादितः ॥ वाक्यवाक्यार्थ
निष्ठश्च पदनिष्ठश्च निर्णयः[४७] वाक्यैकवाक्यतायाश्च विचारोपि [redacted] निरूपितः ॥ साकांक्षत्वं निराकांक्षावाक्यानां परिकीर्त्तिता ।[४८] यद्वाचिंता
समासेप्यं हृत्क निरूपिता ॥ अथानन्तत्वापस्सिद्धिर्भाष्यानुगामस्तः ।[४९] अवतारेपि भाष्यस्य संग्रहे समुपागते ॥ निबंधहेतो शास्त्रस्य टीकाकारेणकी

न्यस्मा।

की।

९२ त्तितः। संग्रहार्थाद्यनुगुणरूपत्वं चोपपादितं॥ विज्ञानवनमथैतस्य संग्रहप्रतिपक्षतः। कृतमाचार्यदेवज्ञेराव्वेत्राविवर्त्तोऽस्ततः। अयमस्यान्न्याप्रसारस्यैवैप्रकरणगा
मिनः। मलभूतमवा प्याय पर्वतादागमं स्वयं। आचार्यवसुरातेन न्यायमार्गान्विचिंत्य चौ प्रणीतो विधिवत्स्वाऽसमम व्याकरणागमः। मयापि गुरुनिर्दिष्टाद्दू
ष्यान्न्यायाऽऽ विलुप्तयोऽ काण्डत्रयक्रमेणायं निबंधः परिकीर्त्तितः। ग्रंथकारेण ग्रंथेऽस्मिन् स्वस्मिन्गुर्वागमः स्फुटं। इत्येवं वाक्यकाण्डस्य प्रमेयविषयविष
यास्फुटं। संगतिः कीर्त्तिता लघ्वी समासेन निराकुला॥ विहृत्तनानांय: खलु सर्वत्र गीयते जगति। तत उपस्तवविरचिता राजानकम्मरव मेना म्नावैशशांक
ऊर्ध्वं छुले तद्वाक्यकाण्डं समाप्तं तः। पुण्यराजेन तस्योक्ता संगतिः कारिकाश्रिता॥ गुरवे भर्तृहरये शब्दब्रह्मविदे नमः। सर्वेसिद्धांतसंदोहसारं म्ने तन म प्रा॰ ग्रं॰ का ५
पायच॥ ५८॥ इति श्रीपुण्यराजकृता वाक्यपदीयद्वितीयकाण्डटीका समाप्ता॥ ॥शुभमस्तु सतताम्॥ ॥श्रीरामाय नमः शिव हर॥ ९५ ॥

न्याय व्याकरण
वाक्यपदीटीका
२२००



हेरंब